O15:1F00:1
A
317819
22/6
sin asiento

2312

श्री

अथ

गीतगोविं ख्यं

काव्यं

प्रारभ्यते

शके १८०० बं०

वि आ पो ०

317819



श्री

अथ

श्रीमत्कविराजजयदेवपंडितकृतं

गीतगोविंदाख्यं

काव्यं

प्रारभ्यते

श्लोकः॥ मेघैर्मेदुरमंबरंवनभुवः श्यामास्त
मालद्रुमैर्नक्तंभीरुरयंत्वमेवनदिमंराधेगृहं
प्रापय ॥ इत्थंनंदनिदेशतश्चलितयोः प्रत्य
ध्वकुंजद्रुमंराधामाधवयोर्जयंतियमुनाकू
लेरहःकेलयः ॥१॥

श्रीराधाकृष्णायनमः भद्राय भवतांभूयात्कृष्णः सद्भ-
क्तिभावितः॥ कालिंदीजलसंसर्गमेघश्यामोतिसुंदरः १
इह कविः प्रारिप्सितस्य निर्विघ्नपरिसमाप्त्यर्थं कृष्णस्मरण
रूपंवस्तुनिर्देशलक्षणं मंगलाचरणं तावदाचरति मेघैरिति
राधामाधवयोः रहःकेलयो यमुनाकूलेजयंतीत्यन्वयः राधा
कृष्णयोः रहः केलयः एकांतक्रीडाः यमुनाकूले यमुनातीरेज
यंति सर्वोत्कर्षेण वर्तंते कथंभूतयोः राधामाधवयोः प्रत्यध्व
कुंजद्रुमं अध्वनिमार्गे कुंजेलतागृहे द्रुमे वृक्षेच इत्थं इति नं
दनिदेशतः नंदाज्ञयाचलितयोः अथवा अध्वकुंजद्रुमा प्रति

कंरात्रोभीरुः भयशीलः अतिबालत्वात् तस्मादिमंपुरोवर्तिनं कृष्णंगृहं प्रापय एवंकरणेनंदस्यान्यास्मिन् विश्वासापभावात् ॥१॥

श्लोकः॥ वाग्देवताचरितचित्रितचित्तसद्मा
पद्मावतीचरणचारणचक्रवर्ती ॥ श्रीवासु
देवरतिकेलिकथासमेतमेतंकरोतिजय
देवकविः प्रबंधम् ॥२॥

इदानींकविः सरस्वतीलक्ष्म्योः कीर्तनपूर्वकं कृष्णस्य स्मरतक्रीडावर्णनं कर्तुमाह वाग्देवतेति जयदेवकविः एतं प्रबंधंकृष्णकेलिकथाप्रतिपादकग्रंथंकरोतीत्यन्वयः कथंभूतो जयदेवकविः वाग्देवताचरितचित्रितचित्तसद्मा वाग्देवतायाः सरस्वत्याश्चरितेन वचनरचनाचारविशेषेण-चित्रितंमंडितंचित्तसद्ममनोगृहंयस्यसः पुनःकथंभूतः पद्मावत्यालक्ष्म्याश्चरणेनचरणसंवाहनेनचक्रवर्तीनृपइव लक्ष्मीसेवीहिचक्रवर्तित्वंप्राप्तइति कथंभूतंप्रबंधंश्रीवासुदेवेति श्रीरूपाराधावासुदेवः श्रीकृष्णस्तयोः रतिकेलिकथयास्मरतक्रीडाकथनेनसमेतंयुक्तं ॥२॥

श्लोकः॥ यदिहरिस्मरणेसरसंमनोयदि
विलासकलासुकुतूहलं ॥ मधुरकोमल
कांतपदावलींशृणुतदाजयदेवसरस्वतीं ३

B4

यदीनि हे कृष्णभक्त तदानिहिं जयदेवसरस्वतीं शृणु इत्यन्वयः यदि यर्हि हरिस्मरणे कृष्णचिंतने सरसं सानुरागं तव मनः अस्तीत्यध्याहारः यदि यर्हि विलासकलासु विलासः श्रीकृष्णविलासः कलाचतुःषष्टिस्तासु कुतूहलमस्तीति कथंभूतां जयदेवसरस्वतीं मधुरा सरसा अर्थतः कोमला शब्दतः अतएव कांता मनोहरा पदावली पदसमूहो यस्यां सा ताम् ॥ ३॥

श्लोकः॥ वाचः पल्लवयत्युमापतिधरः संदर्भशुद्धिं गिरां जानीते जयदेव एव शरणः श्लाघ्यो दुरूहद्रुते ॥ शृंगारोत्तरसत्प्रमेयरचनैराचार्यगोवर्धनः स्पर्द्धी कोपि न विश्रुतः श्रुतिधरो धोई कविक्ष्मापतिः ॥ ४ ॥

कविरन्यग्रंथेभ्यो मद्ग्रंथे बहवो गुणाः संतीति द्योतयन् शार्दूलविक्रीडितेनाह वाच इति उमापतिधरो नाम कविर्वाचः वचनानि पल्लवयति विस्तारयति न तु गुणान् संदर्भशुद्धितः शब्दतश्च ग्रथनविशुद्धिं जयदेव एव परं जानीते नान्य इत्यर्थः शरणो नाम कविः दुरूहद्रुतेः विषमग्रंथस्य शीघ्रोच्चारतः श्लाघ्यः स्तुत्यः शृंगारेति शृंगारोत्तराणि शृंगारप्रधानानि संति उत्कृष्टानि प्रमेयाणि वा वचनानि तेषां रचनैः प्रबंधैः आचार्यगोवर्धनः स्पर्द्धी कोपि न विश्रुतः आचार्यगोवर्द्धनः कविः शृंगारप्रधानमेव प्रबंधं करोतीत्यर्थः

धोईनामकविक्ष्मापतिः कविराजः श्रुतिधरः श्रुत्याश्रवण मात्रेणैवधारयतिनपुनरर्थादिग्रहणे प्रवीणः इतिराजपदे नमहाहंकारकथनं ॥४॥

अथप्रथमप्रबंधो मालवरागेणरूपक तालेगीयते·

प्रलयपयोधिजलेधृतवानसिवेदं ॥ विहि
तवहित्रचरित्रमखेदं ॥ केशवधृतमीनश
रीरजयजगदीशहरे ॥१॥

कविरधुनाभक्तानुग्रहार्थं विप्राभावार्थंचदशावतार वर्णनमाह प्रलयेत्यादिजगदीशइत्यंतं अस्यगीतस्य मालवरागः रूपकतालः तल्लक्षणं नितंबिनीचुंबितवक्र पद्मः शुकद्युतिः कुंडलवान्किरीटी संगीतशालांप्रविश न्प्रदोषेमालाधरोमालवरागराजः रूपकेस्यात् द्रुतंलघु रिति हेकेशवधृतंमीनस्यशरीरंवेदोद्धरणार्थंयेनसः हेजगदीश हेहरेजयउत्कर्षेणवर्द्दस्व कस्मादित्यतआह त्वंप्रलयपयोधिजले कल्पांतसमुद्रजलेनिमग्नंवेदंधृतवा नसि कथंअखेदं अपरिश्रमंयथाभवतितथा पुनःकथं यथास्यात्तथाविहितेति विहितंकृतंवहित्रचरित्रंसमुद्रतर णकारणनौकाचेष्टितंयत्रक्रियायां ॥१॥

क्षितिरतिविपुलतरेतवतिष्ठतिपृष्ठे ॥ धर
णिधरणकिणचक्रगरिष्ठे ॥ केशवधृतक
च्छपरूपजयजगदीशहरे ॥२॥

शिवाजी ठ

क्षितिरिति हेकेशवधृतं कच्छपस्यरूपंयेनसः तत्सं-
बोधनं हेजगदीश हेहरेजय पूर्ववत् तवपृष्ठे क्षितिः पृथ्वी ति
ष्ठतीत्यन्वयः कथंभूतेपृष्ठे अतिविपुलतरे अतिक्रांतः वि
पुलतरपदार्थोयेन पुनः कथंभूते धरण्याः क्ष्मायाधरणेन
वहनेनयत्किणचक्रं मृतपिंडस्तेन गरिष्ठे हृदे ॥ २॥

**वसतिदशनशिखरेधरणीतवलग्ना ॥ श
शिनिकलंककलेवनिमग्ना ॥ केशवधृत
सूकररूपजयजगदीशहरे ॥ ३॥**

वसतीति हेकेशवेत्यादिपूर्ववत् धृतंसूकरस्यरूपंये
नतवदशनशिखरेदंताग्रभागेधरणी पृथ्वीलग्नासंबद्धा वस
ति तत्रदृष्टांतःकेव शशिनिचंद्रेनिमग्नाअंतः स्थिताकलं
ककलेव कलंकरेखेव ॥ ३॥

**तवकरकमलवरेनखमद्भुतशृंगं ॥ दलित
हिरण्यकशिपुतनुभृंगं ॥ केशवधृतनर-
हरिरूपजयजगदीशहरे ॥ ४॥**

तवेति हेधृतंनरहरेः रूपंनरसिंहस्यस्वरूपंयेनतत्संबो
धनं तवकरकमलवरे हस्तपद्मश्रेष्ठेनखमस्तीत्यध्याहारः
कथंभूतंनखं अद्भुतशृंगं आश्चर्यकरं शृंगमग्रभागोयस्य
अद्भुतत्वेहेतुमाह दलितः विदारितः हिरण्यकशिपोर्दैत्य
स्यतनुरेवभृंगोभ्रमरोयेन अन्यत्रभ्रमरेणकमलाग्रंदल्य
ते इहतुवैपरीत्येनाश्चर्यम् ॥ ४॥

छलयसिविक्रमणेबलिमद्भुतवामन ॥ प

दनरवनीरजनितजनपावन ॥ केशवधृत
वामनरूपजयजगदीशहरे ॥ ५ ॥

छलयसीति धृतंवामनस्यरूपंयेन हेअद्भुतवामन आ श्चर्यहेतुवामन त्वं विक्रमणेपादविक्षेपेकर्तव्ये बलिं असुरं छलयसि प्रवंचयसि कीदृशस्त्वमिति संबोधनंपदेति पदन खनीरेण पदनखाग्रसंबंधिजलेन गंगारूपेणजनितंकृतं जनपावनं लोकपावित्र्यंयेन ॥ ५ ॥

क्षत्रियरुधिरमयेजगदपगतपापं ॥ स्नप
यसिपयसिशमितभवतापं ॥ केशवधृत·
भृगुपतिरूपजयजगदीशहरे ॥ ६ ॥

क्षत्रियेति हेधृतभृगुपतिरूपधृतपरशुरामरूप क्ष त्रियरुधिरमये पयसिजगत्स्नपयसीत्यन्वयः क्षत्रियाणां शोणितविकारेजलेजगत्स्नापयसि स्नानेन फलमाह· कथं भूतंजगत् अपगतपापं गतकलुषं पुनः कथंभूतं शमित भवतापं दूरीकृतसंसारतापं ॥ ६ ॥

वितरसिदिक्षुरणेदिक्पतिकमनीयं ॥ द
शमुखमौलिबलिंरमणीयं ॥ केशवधृत
रघुपतिरूपजयजगदीशहरे ॥ ७ ॥

वितरसीति हेधृतरघुपतिरूप धृतरामशरीर त्वंर णेसंग्रामे दशमुखमौलिबलिं रावणमस्तकोपहारं दिक्षु दिशासु वितरसि ददासि कीदृशं दिक्पतिकमनीयं इंद्रादी· नांकाम्यं इच्छाविषयमित्यर्थः रमणीयं मनोहरं दिक्षु दश

दानात् ॥७॥

वहसिवपुषिविशदेवसनंजलदाभं ॥ हल·
हतिभीतिमिलितयमुनाभं ॥ केशवधृतह
लधररूपजयजगदीशहरे ॥ ८॥

वहसीति हेधृतहलधर रूपधृतबलभद्ररूप त्वंवपुषिव
सनंवस्त्रंधारयसि कथंभूतेवपुषि विशदेशुभ्रे कथंभूतं
वसनं जलदाभंसजलमेघसदृशं पुनः कथंभूतं हलहति·
भीत्यालांगलघातभयेनमीलिता उपस्थितायायमुनातद्वत्
आभादीप्तिर्यस्यतत्भयेनातिश्यामत्वंभवति ॥ ८॥

निंदसियज्ञविधेरहहश्रुतिजातं ॥ सदयहृ
दयदर्शितपशुघातं ॥ केशवधृतबुद्धशरीर
जयजगदीशहरे ॥ ९॥

निंदसीति हेधृतबुद्धशरीरधृतबुद्धावतार हेसदयहृ
दयदयासहितांतःकरणजय ननुवेदनिंदकस्यकथंस्तुति
रित्यत आह· त्वंयज्ञविधेः क्रतुविधानसंबंधि श्रुतिजातंवेद
वाक्यसमूहं निंदसिदूषयसि नतुसर्वमित्यर्थः सोपिकि
मितिनिंद्यते इत्यतआह· अहहकष्टंदयायांवादर्शितः बोधि
तः पशूनांघातोवधोयेनतादृशं वेदोपिपशूनांघातंबोधयती
त्यतअहोकष्टमित्येवनिंदसीतिभावः ॥ ९॥

म्लेच्छनिवहनिधनेकलयसिकरवालं ॥ धू
मकेतुमिवकिमपिकरालं ॥ केशवधृतक·
ल्किशरीरजयजगदीशहरे ॥ १०॥

म्लेच्छेति हे धृतकल्किशरीर धृत कल्क्यवतार शरीर त. त्वेषितमाह. त्वंम्लेच्छनिवहनिधने म्लेच्छानांनिवहाः समूहा स्तेषांनिधनेनाशनिमित्तंकिमपि अनिर्वचनीयं करवालंखड्गं कलयसिधारयसि कथंभूतंकरवालं धूमकेतुमिव औत्पातिकतारकापातमिव करालंभयानकं अथवाधूमकेतुरग्निस्तमिव ॥१०॥

श्रीजयदेवकवेरिदमुदितमुदारं ॥ शृणु सुखदं शुभदं भवसारं ॥ केशवधृतदशविधरूपजयजगदीशहरे ॥ ११ ॥

इतिश्रीगीतगोविंदेप्रथम प्रबंधः

धृतवानसीत्यादिभिर्वर्तमानप्रयोगैरवताराणांभगवतश्चलीलायाः नित्यत्वं दर्शितं एवंतत्तदवतारगुणैः स्तुतिंकृत्वासंप्रत्यवतारिणं स्तुवन्प्रार्थयते श्रीजयदेवेति हेकेशव. धृतानि दशविधानिरूपाणियेनतत्संबोधनं श्रीजयदेवकवेः इदंगीत उदितंभाषितंशृणु आकर्णयेतिभक्तजनंप्रत्युक्तिः कीदृशंउदारं मनोहरं सुश्राव्यत्वात् शुभदंकल्याणदायकं भवसारं संसारेधनरूपं ॥ ११ ॥

श्लोक ॥ वेदानुद्धरतेजगन्निवहते भूगोलमुद्बिभ्रते दैत्यंदारयते बलिंछलयते क्षत्रक्षयंकुर्वते ॥ पौलस्त्यंजयते हलंकलयतेकारुण्यमातन्वते म्लेच्छान्मूर्च्छयते दशाकृतिकृ

तेकृष्णायतुभ्यंनमः॥ १॥

उक्तानेवावतारान्पुनः संक्षेपेणकीर्तयति वेदानिति तु भ्यंकृष्णायनमः अस्तुइत्यन्वयः कथंभूताय वेदानुद्धरतेमीन रूपेण पुनः कथंभूताय जगंति —— वहतेधारयते कूर्मरूपेण भूगोलंपृथ्वीचक्रं उद्बिभ्रतेऊर्ध्वंधारयते वाराहरूपेण दैत्यंहिरण्यकशिपुंदारयते नृसिंहरूपेण बलिंबलिदैत्यं छलयते वंचयते वामनरूपेण क्षत्रक्षयं क्षत्रियनाशंकुर्वतेप रशुरामरूपेण पौलस्त्यंरावणंजयतेरामरूपेण हलंलांगलंकलयतेधारयते बलभद्ररूपेण कारुण्यंदयां आतन्वतेवि स्तारयते बुद्धरूपेण म्लेच्छान् अंत्यजान् मूर्च्छयतेनाशय ते कल्किरूपेण अतएवदशाकृतिकृते दशविधरूपधारिणे॥ १

अथद्वितीयप्रबंधो गुर्जरीरागेणप्रति मंठतालेगीयते

श्रितकमलाकुचमंडलधृतकुंडलए॥ कलि तललितवनमालजयजयदेवहरे॥ १॥

कविरिदानींगुर्जरीरागेण कृष्णंस्तौतिरागलक्षणं श्यामासुकेशीमलयद्रुमाणांमृदूल्लसत्पल्लवतल्पयाता श्रुतेः स्वराणांदधतीविभागंतंत्रीस्वरा दक्षिणगुर्जरीयंइति श्रि तेति हेदेव हेहरे जयजयस्वभक्तपक्षपातेसर्वोत्कर्षेण वर्त्तस्व श्रितेत्यादीनिसप्तपदाः पदानिसंबोधनानिज्ञातव्यानि एइतिपदं हेइत्यर्थः हेश्रितकमलाकुचमंडलश्रितं आश्रितं कमलायाः लक्ष्म्याः कुचमंडलंस्तनमंडलं येनहे धृतकुंड

लध्रतेकुंडलेयेनतस्यसंबोधनंकलिनेति कलिताधृताल लिनास्कंदरवनमालापुष्पदामयेन ॥१॥

दिनमणिमंडलमंडनभवखंडनए ॥ मुनि
जनमानसहंस जयजयदेवहरे ॥२॥

दिनमणीति हेदिनमणिमंडलमंडनसूर्यमंडलालंकार हेभवखंडन भक्तानांसंसारनाशक हेमुनिजनमानसहंस मुनिजनानांमानसे हंसइव मानसेसरसिहंसोस्तित द्वत जयजयेतिपूर्ववत् ॥२॥

कालियविषधरगंजनजनरंजनए यदु
कुलनलिनदिनेश ॥ जयजयदेवहरे ॥३

कालियेति कालियनाम्नः सर्पस्यगर्जनहिंसकहेजनरंजन यदुकुलेति यादवकुलकमलसूर्य ॥३॥

मधुमुरनरकविनाशनगरुडासनए सुर
कुलकेलिनिदान ॥जयजयदेवहरे॥ ४॥

मधुमुरेति मधुमुरनरकसंज्ञानांदैत्यानांनाशन गरुडासनगरुडएवआसनंयस्यसः सुरकुलेति सुरकुलानांदेवसमूहानांकेलेः क्रीडायाः सुखस्येतियावत् निदान आदिकारण ॥४॥

अमलकमलदललोचनभवमोचनए त्रिभु
वनभुवननिधान ॥जयजयदेवहरे॥ ५॥

अमलेति अमलकमलवत् निर्मलपद्मपत्रवत् लोचनेयस्यभवमोचनसंसारभंजकत्रिभुवनेति त्रिभुवनमेवभवनं

गृहंतत्ननिधानमिवनिधिरिव ॥५॥

जनकसुताकृतभूषणजितदूषणए सम
रशमितदशकंठ ॥ जयजयदेवहरे ॥ ६॥

जनकेति जनकसुतायाःसीतायाः कृतभूषण कृता लंकारजितो दूषणनामाराक्षसोयेन समरेति समरेसं· ग्रामेशमितोमारितोदशकंठोरावणोयेन ॥ ६॥

अभिनवजलधरसुंदरधृतमंदरए श्रीमु
खचंद्रचकोर ॥ जयजयदेवहरे ॥ ७॥

अभिनवेति अभिनवजलधरसुंदर धृतमंदरधृतमं दराचलश्रीमुखं लक्ष्मीमुखमेवचंद्रस्तत्रचकोरइव ॥७

तवचरणेप्रणतावयमितिभावयए कुरु
कुशलंप्रणतेषु ॥ जयजयदेवहरे ॥ ८॥

तवेति एवंभूतहेहरे जयजयेति तवचरणेवयंप्रणताः अतीवनम्राइति भावयजानीहि प्रणतेषुमादृशेषु कु· शलंकल्याणंकुरु ॥ ८॥

श्रीजयदेवकवेरिदंकुरुतेमुदम् ॥ मंगल
मुज्ज्वलगीतम् ॥ जयजयदेवहरे ॥ ९॥ × ११ बार भजनलय.

इतिश्रीगीतगोविंदेद्वितीयप्रबंधः

श्रीजयदेवेति हेदेव हेहरे जयजयेतिप्रार्थ्यते श्रीज यदेवकवेः इदंउदितंमंगलंगीतविशेषः मुदंहर्षंकुरुते शृण्वतांभक्तानामितिशेषः कथंभूत इदंमंगलं उज्ज्वलंगी तं तदनुगमनेरम्यंगीतंगानंयस्मिन् ॥ ९॥

श्लोक ॥ पद्मापयोधरतटीपरिरंभलग्न·
काश्मीरमुद्रितमुरोमधुसूदनस्य ॥ व्यक्ता
नुरागमिवखेलदनंगखेदस्वेदांबुपूरमनु
पूरयतुप्रियंवः ॥ १ ॥

अधुनाकविः कामोद्दीपकत्वात् वसंतस्यव्याजेन कृष्ण· क्रीडां वक्तुंभक्तान्प्रतिआशिषंब्रूते पद्मेति मधुसूदनस्य उरोवक्षस्थलंवः युष्माकंप्रियमभीष्टमनुपूरयतुसंपूर्णंकरोतु कथंभूतंमधुसूदनस्यउरः पद्मेति पद्मायाः लक्ष्म्याः पयोधरतटीस्तनपरिसरस्तस्यपरिरंभणेन आलिंगनेनलग्नंयत्काश्मीरंकुंकुमं केशरंतेनमुद्रितं चिन्हितं ममैवेदंवक्षः स्थलंनान्यस्यइतिभावः पुनःकथंभूतमिव व्यक्तानुरागमिव पुनःकथंभूतंउरः खेलदिति खेलन्खेलनगतिंकुर्वन्योऽनंगस्तस्यखेदेनश्रमतायासेनस्वेदांबुपूरोघर्मजलप्रवाहोयत्र ॥ १ ॥

श्लोक ॥ वसंतेवासंतीकुसुमसुकुमारैरव
यवैर्भ्रमंतीकांतारेबहुविहितकृष्णानुसर
णाम् ॥ अमंदकंदर्पज्वरजनितचिंताकुलत
याचलद्बाधाराधांसरसमिदमूचेसहचरी २

अधुनाविरहोत्कंठितायाः राधायाः काचित्सखीकृष्णवार्तांवक्तुमाह वसंतइति वसंतकालेकाचित्सहचरीसखीसरसं सविलासंइदंवक्ष्यमाणंराधांप्रत्यूचेअवदत् कथंभूतांराधां वासंतीकुसुमसुकुमारै र्माधवीपुष्पकोम

राधाकांतारेदुर्गमेवर्त्मनिभ्रामंतीं पुनःकथंभूतां बहुवि·
हितंवारंवारंदूतीद्वारेणकृतंकृष्णानुसंधानंयया पुनःक
थंभूतां अमंदउत्कंठंयथास्यात्तथाकंदर्पज्वरेणजनिता उत्पा
दितायाचिंतातत्कृतायाआकुलतातया कृत्वाचलंतीउद्ग
च्छंतीबाधापीडायस्याः ॥२॥

अथतृतीयप्रबंधो वसंतरागेणरूपक तालेगीयते

ललितलवंगलतापरिशीलनकोमलम लयसमीरे॥ मधुकरनिकरकरंबितकोकि लकूजतकुंजकुटीरे॥१॥ विहरतिहरि रिहसरसवसंते॥नृत्यतियुवतिजनेनस· मंसखिविरहिजनस्यदुरंते॥ध्रु०॥

पूर्वोक्तमर्थंगीतेनाह ललितेति एतस्यवसंतरागः रूपकतालः तल्लक्षणंशिखंडवर्होच्चयबद्धचूडः पुष्णान्पि कंचूतलतांकुरेण भ्रमन्मुदावासमनंगमूर्तिर्मत्तोमतंग· स्यवसंतरागइति हेसखिहरिः इहसरसवसंतेविहरति युवतिजनेनसमंनृत्यति चेतिध्रुवगतपदेनान्वयः हेराधे· हरिःकृष्णइह अस्मिन्मनोहरवसंतसमयेक्रीडति का· मिनीसमूहेन सहनर्तनंकरोतिच· कुंजस्थलेइत्यपेक्षायां सप्तमपद्यस्थितवृंदावनविपिनशब्देनान्वयः कीदृशेवि रहिजनस्यदुरंतेदुःखेनगमयितुंशक्ये इतिवसंतवृंदावन

...विशेषणानि ललितायाः मनोहरायाः लवंगलतायाः लवंगशाखायाः परिशीलनेनसंपर्केण कोमलोगंधमनोहर मलयसमीरोमलयानिलोयत्र अनेनवायोः सुगंधत्वेनशीतत्वादीन्युक्तानि मधुकरेति मधुकरनिकरेण भ्रमरसमूहेण करंबितैर्मिश्रितैः कोकिलैःकूजितः शब्दितः कुंजएवलतागृहमेवकुटीरोऽल्पाकुटीयत्र १

उन्मदमदनमनोरथपथिकवधूजनजनि
तविलापे ॥ अलिकुलसंकुलकुसुमसमू
हनिराकुलबकुलकलापे ॥ २ ॥

उन्मदेति उद्गतोमदमदनो हर्षकामोयत्र एवंभूतो मनोरथोयस्य एवंभूतोयः पथिकवधूजनः पांथस्त्रीजनस्तेनोत्पादितो विलापः परिदेवनंयत्र अलिकुलेति अलिकुलैः भ्रमरसमूहैः संकुलोव्याप्तः कुसुमसमूहस्तेन निराकुलो निःशेषेण आकुलः बकुलानां वृक्षाणां कलापः समूहोयत्र ॥ २ ॥

मृगमदसौरभरभसवशंवदनवदलमाल
तमाले ॥ युवजनहृदयविदारणमनसिज
नखरुचिकिंशुकजाले ॥ ३ ॥

मृगमदेति मृगमदस्यकस्तूरिकायाः सौरभरभसवशंवदाःस्वरभितोत्साहस्यायत्तवादिनी नवानूतना दलमालापत्रपंक्तिर्येषां ईदृशास्तमालायत्र नूतनपत्रस्तमालोमृ

नखानितद्वत् रुचिर्दीप्तिर्येषां एवंभूतानां किंशुकानां पलाशपुष्पाणां जालं समूहो यत्र ॥३॥

मदनमहीपतिकनकदंडरुचिकेशरकुसुमविकाशे ॥ मिलितशिलीमुखपाटलिपटलकृत-स्मरतूणविलासे ॥४॥

मदनेति मदनमहीपतेः कामनृपस्य कनकदंडछत्रं तद्वत् रुचिर्यस्य एवंभूतः केशरकुसुमविकाशो नागकेशरपुष्पप्राचुर्यं यत्र मिलितेति मिलिताः शिलीमुखाः भ्रमराः येषु तैः पाटलीपटलैः पाटलपुष्पसमूहैः कृतः स्मरतूणविलासः कामतूणीरचेष्टितं यस्मिन् तस्मिन् ॥४॥

विगलितलज्जितजगदवलोकनतरुणकरुणकृतहासे ॥ विरहिनिकृंतनकुंतमुखाकृतिकेतकिदंतुरिताशे ॥५॥

विगलितेति विगलितस्य शिथिलावयवस्य अतएव लज्जितस्य जगतः अवलोकनेन दर्शनेन तरुणकरुणैः तरुणकरुणवृक्षैः पुष्पविकाशव्याजेन कृतो हासो हास्यं यत्र विरहीति विरहिनिकृंतनानि वियोगमारकानि कुंतमुखाकृतीनि भल्लमुखाकाराणि यानि केतकीपुष्पाणि तैर्दंतुरिता व्याप्ता आशा दिशो यस्मिन् तस्मिन् ॥५॥

माधविकापरिमलललितेनवमालतिजाति

स्रुगंधौ ॥ मुनिमनसामपिमोहनकारिणि
तरुणाकारणबंधौ ॥ ६॥

माधविकेति माधविकायाः वासंतिलतायाः परिमले नगंधेन ललितेमनोहरे नवमालिकानिमालतीपुष्पाणिजातिः जातिपुष्पाणिताभ्यांस्रुगंधौ मुनिमनसामपिऋषिचित्तानामपिमोहनकारिणिमदनजनके तरुणानांयूनां अकारणबंधौसहजमित्रे॥६॥

स्फुरदतिमुक्तलतापरिरंभणमुकुलितपु
लकितचूते॥ वृंदावनविपिनेपरिसरपरिग
तयमुनाजलपूते॥७॥

स्फुरदिति वृंदावनविपिने हरिः क्रीडतीत्यन्वयः स्फुरंत्याश्चलंत्या अतिमुक्तलतायाः परिरंभणेन आलिंगनेनः मुकुलितः पुष्पितः पुलकितः हृष्टः आम्रवृक्षोयत्र कथंभूते वृंदावनविपिने परिसरेति परिसरेपर्यंत भुविपरिगतंप्राप्तंयत् यमुनाजलंतेनपूतेपविते॥७॥

श्रीजयदेवभणितमिदमुदयति हरिचरण
स्मृतिसारं॥ सरसवसंतसमयवनवर्णनम
नुगतमदनविकारं॥८॥

इतिश्रीगीतगोविंदे तृतीयप्रबंधः ३

श्रीजयदेवेति श्रीजयदेवकवेरिदंभणितं उदयति उदयंप्राप्नोतुइत्यर्थः हरिचरणयोः स्मृतिः स्मरणंसारोमुख्योयत्र सरसंरुमनोहरं वसंतसमयसंबंधिनोवनस्यवर्ण

नंयत्र अनुगतः अनुकृतः मदनविकारो कामविलासो यस्मि
न् ॥८॥

श्लोक ॥ दरविगलितमल्लीवल्लिचंचत्पराग
प्रकटितपटवासैर्वासयन्काननानि ॥ इह
हिदहतिचेतः केतकीगंधबंधुः प्रसरदसम
बाण प्राणवद्गंधवाहः ॥ १ ॥

वियोगिनांदुःसहंवसंतवायुंवर्णयति दरेति इहवसं
तेगंधवाहोवायुः विरहिणांचेतः दहतीत्यन्वयः अर्थात्किं
कुर्वन् दरविगलितायाः ईषद्विकसितायाः मल्ल्याः मल्लि
कायावल्लीषु लतासुचंचद्भिरुद्गच्छद्भिः परागैःपुष्परजोभिः
प्रकटितपटवासैः स्फुटीकृतपटवासचूर्णैः काननानि वना
नि वासयन् सुरभीकुर्वन् पुनः कथंभूतः केतकीपुष्पाणां
गंधस्य बंधुर्मित्रं प्रसरंतोयेअसमबाणाः कामबाणास्तेषां
प्राणवत् प्राणइव ॥१॥

श्लोकः ॥ उन्मीलन्मधुगंधलुब्धमधुपव्याधू
तचूतांकुरक्रीडत्कोकिलकाकलीकलकलै
रुद्गीर्णकर्णज्वराः ॥ नीयंतेपथिकैः कथंकथ
मपिध्यानावधानक्षण प्राप्तप्राणसमासमा
गमरसोल्लासैरमीवासराः ॥ २ ॥

वसंतवासराणामनंगोद्दीपकत्वमाह उन्मीलदिति
अमीवसंतसंबंधिनोवासराः दिवसाः पथिकैर्मार्गस्थै
र्विरहिभिः कथंकथमपिकेनापिदुःखेननीयंते उल्लंघ्यं

नेकथंभूताः वासराः उन्मीलदिति उन्मीलंश्चासौ मधुगं धश्च पुष्परसगंधस्तत्रलुब्धायेमधुपाः भ्रमरास्तैर्व्याधूताः कंपिताः येचूतांकुराःआम्रांकुरास्तेषुक्रीडतां कोकिलानां काकलीकलकलैः सूक्ष्माव्यक्तमधुरध्वनिकोलाहलैः कष्टजनकत्वेनउद्गीर्णः प्रकाशितः कर्णज्वरः श्रवणोपतापोयेषुकथंनीयत इत्यतआह ध्यानेचिंतने अवधानंचित्तैकाग्र्यंतेनक्षणं अल्पकालं प्राप्ताया अनुभूतायाः प्राणसमायाः समागमरसेनसंबंधस्वरूपरसेन उल्लासोयेषांते ॥२

श्लोकः ॥ अनेकनारीपरिरंभसंभ्रमस्फुरन्मनोहारिविलासलालसं ॥ मुरारिमारादुपदर्शयंत्यसौसखीसमक्षंपुनराहराधिकां ॥३॥

अनेकेति असौसखीराधिकांपुनराह इत्यन्वयः कथंभूतासखी आरात् दूरे वर्तमानं समक्षंयथास्यात्तथा कृष्णंउपदर्शयंती विषयंकारयंती कथंभूतं हरिं अनेकनारीणांपरिरंभसंभ्रमेणालिंगनादरेणस्फुरन् इतस्ततो गच्छन् मनोहारी मनोज्ञोयोविलासः क्रीडातत्रलालसं आदरवंतम् ॥३॥

अथचतुर्थप्रबंधो रामकरिरागेणरूपकतालेगीयते.

चंदनचर्चितनीलकलेवरपीतवसनवनमाली ॥ केलिचलन्मणिकुंडलमंडितगंडयु

गस्मितशाली ॥ १ ॥ हरिरिहमुग्धवधूनि
करेविलासिनिविलसतिकेलिपरे ॥ ध्रु० ॥

अमुमेवश्लोकोक्तमर्थंगीतेनाह चंदनेतिरामकरिरागः तस्यलक्षणं स्वर्णप्रभाभास्वरभूषणाचनीलंनिचोलंस्वतनोवहंती कांतोपदोपांतमधिश्रितापिमनोन्नतारामकरिप्रदिष्टाइति १ हेविलासिनिराधे इहमुग्धवधूनिकरेमनोहरकामिनीसमूहे हरिर्विलसति क्रीडतीत्यन्वयः कथंभूते मुग्धवधूनिकरे केलिपरेक्रीडातत्परे कथंभूतोहरिः चंदनेति चंदनेनमलयजेन चर्चितंरेखाकारेणानुलिप्तंनीलंकलेवरंशरीरंयस्य पीतंस्वर्णवर्णंवसनंवस्त्रंयस्यवनमालायस्यास्तीति ततः प्रत्येकंकर्मधारयः पुनः कथंभूतः केलिनाक्रीडयाचलती येमणियुक्तेकुंडलेताभ्यांमंडितशोभितंगंडयुगंयस्यस्मितेनईषद्धास्येनशालतेशोभते ततः कर्मधारयः ॥ १ ॥

पीनपयोधरभारभरेणहरिंपरिरभ्यसरा
गं ॥ गोपवधूरनुगायतिकाचिदुदंचितपं·
चमरागं ॥ २ ॥

पीनेति हेराधेकाचित्गोपवधूर्गोपांगनापीनपयोधरभरेणाविपुलकुचगौरवातिशयेनसरागंयथापरिरभ्य आलिंग्यहरिं अनुपश्चादुदंचितंपंचमरागंगायतिगानंकरोति २

कापिविलासविलोलविलोचनखेलनज
नितमनोजं ॥ ध्यायतिमुग्धवधूरधिकंम

धुसूदनवदनसरोज ॥३॥

कापीति काचिन्मुग्धवधूर्मनोहरगोपांगना अधिकामतिशयेनमधुसूदन वदनसरोजं कृष्णास्य मुखांबुजं ध्यायतिचिंतयति विलासेनविलोलयोर्विलोचनयोः खेलनेनसंचारेण जनितउत्पादितोमनोजः कामोयेनतत् ॥३॥

कापिकपोलतलेमिलितालपितुंकिमपिश्रुतिमूले॥ चारुचुचुंबनितंबवतीदयितंपुलकैरनुकूले ॥ ४ ॥

कापिकपोलेति कापिनितंबवतीगोपांगनादयितं कृष्णंकपोलतले गंडदेशेचारुमनोज्ञं यथास्यात्तथाचुचुंबचुंबितवती कथंभूता किमपिकार्यंलपितुं वक्तुं श्रुतिमूलेकर्णप्रदेशेमीलितासंलग्ना कीदृशेकपोलतले पुलकैरोमोद्गमैः अनुकूलेप्रेमप्रियकथने ॥४॥

केलिकलाकुतुकेनचकाचिदमुंयमुनाजलकूले॥ मंजुलवंजुलकुंजगतंविचकर्षकरेणदुकूले ॥५॥

केलीति काचिद्गोपीकेलिकलाकुतुकेनशृंगाररसक्रीडातात्पर्येण हेतुनाकरेण हस्तेनामुं कृष्णंदुकूले वस्त्रेविचकर्ष आकृष्टवती कथंभूतंअमुं यमुनाजलकूले यमुनाजलोपलक्षिते कूलेतीरे मंजुलोमनोहरोयोवंजुलकुंजो वेतसलतागृहंतत्रगतंवर्तमानं ॥५॥

करतलतालतरलवलयावलिकलितकल

स्वनवंशे ॥ रासरसे सहनृत्यपराहरिणा युवतीप्रशशंसे ॥ ६ ॥

करतलेति काचित्युवतीगोपांगनाहरिणाकृष्णेनप्र शशंसेस्तुता रासरसेगोपक्रीडानुरागे सहनृत्यपराकृष्ण समकालंनृत्यति कथंभूतेरासरसे करतलयोर्हस्तयो स्तालेनचपेटध्वनिना तरलयाचंचलया वलयावल्याकंकण पंक्त्या कलितः मिश्रितः कलस्वनवंशोऽव्यक्तमधुरशब्दस हितो वंशोवेणुर्यत्र ॥ ६ ॥

श्लिष्यति कामपिचुंबति कामपिरमयति कामपिरामां ॥ पश्यति सस्मितचारुतरामप रामनुगच्छतिवामां ॥ ७ ॥

श्लिष्यतीति हेराधे श्रीकृष्णः कामपिगोपिकांश्लि ष्यति आलिंगति तथाकामपिचुंबति तथाकामपिरामांरम यति क्रीडयति अपरांनायिकांस्मितचारुहासमनोहरं यथास्यात्तथापश्यति अपरांवामां सुंदरीमनुगच्छतीत्यर्थः ७

श्रीजयदेवकवेरिदमद्भुतकेशवकेलिरह स्यं ॥ वृंदावनविपिने ललितंवितनोतुशु भानियशस्यं ॥ ८ ॥

इतिश्रीगीतगोविंदे चतुर्थः प्रबंधः

श्रीजयदेवेति श्रीजयदेवकवेरिदंगीतं शुभानि कल्या णानि वितनोतु अर्थात् भक्तानां गीतंकीदृशं अद्भुतं आ श्चर्यकरं केशवस्यकृष्णस्यकेलिरहस्यं क्रीडाहर्षोपत्र अ

द्भुतत्वंयुगपत्सर्वासांप्रीत्युत्पादनात् वृंदावनविपिने वृंदावन नाम्नि वने ललितं नानारसान्वितमित्यर्थः यशस्यं यशसे हितं यशस्करमित्यर्थः ॥८॥

श्लोकः॥ विश्वेषामनुरंजनेनजनयन्नानं दमिंदीवर श्रेणीश्यामलकोमलैरुपनय न्नंगैरनंगोत्सवं॥ स्वच्छंदंव्रजसुंदरीभि रभितः प्रत्यंगमालिंगितः शृंगारः सखिमू र्तिमानिवमधौमुग्धोहरिः क्रीडति ॥१॥

विश्वेषामिति हेसखिराधेमधौवसंते मुग्धोमनोहरो. हरिः कृष्णः क्रीडतीत्यन्वयः कइव मूर्तिमान् शरीरधारी शृंगाररसइव किंकुर्वन् अनुरंजनेन अनुरागेणविश्वेषांस र्वेषां भक्तानां आनंदं संतोषं जनयन् पुनः किंकुर्वन् इंदीवर श्रेणीनामिव नीलकमलपंक्तीनामिव श्यामलकोमलैःकृ- ष्णमनोहरैरंगैरवयवैः अनंगोत्सवं कामहर्षं उपनयन् उ त्पादयन् पुनः कथंभूतः स्वच्छंदं स्वेच्छया व्रजसुंदरीभिः गोपीभिः अभितः सर्वतो भावेन प्रत्यंगं प्रत्यवयवेन आलिं गितः गोपीभिरालिंगनेयया यदंगंप्राप्तंतया न देवालिंगि तमितिभावः श्यामोभवतिश्शृंगारः सितो हासः प्रकीर्ति तइतिशृंगारविशेषणान्यप्येतानि पदानि ॥१॥

श्लोकः॥ अद्योत्संगवसद्भुजंगकवलक्ले शादिवेशाचलप्रालेयप्लवनेच्छयानुसर- तिश्रीखंडशैलानिलः॥ किंचित्स्निग्धर

लंतिकुहुः कुहूरितिकलोत्तालाः पिकानां
गिरः ॥ २ ॥

मलयानिलदुःसहत्वेकारणमाह अद्येति हेराधे अद्यइदानींवसंतसमये श्रीखंडशैलानिलः मलयजपवनः उत्संगे क्रोडेवसंतोयेभुजंगाःसर्प्पास्तेषांकवलक्लेशादिवग्रासोपतापादिव ईशानचलंहिमाचलंप्रालेयप्लवनेच्छयातुहिनमज्जनेच्छयानुसरति अनुगच्छतिकिंच पक्षांतरेपिकानांगिरोवाण्यः स्निग्धरसालमौलिमुकुलानि कोमलचूतस्तबककुड्मलानि आलोक्यदृष्ट्वा हर्षोदयात् आनंदोदयात् उन्मीलंति उद्गच्छंति कथंभूतागिरः कुहुः कुहूरिति कलोत्तालाः कुहूःकुहूरित्याकारेणाव्यक्तमधुरशब्देनोत्तालाः प्रकाशाः ॥ २

श्लोकः॥ रासोल्लासभरेणविभ्रमभृतामाभीरवामभ्रुवामभ्यर्णंपरिरभ्यनिर्भरमुरःप्रेमांधयाराधया ॥ साधुत्वद्वदनंसुधामयमिति व्याहृत्यगीतस्तुतिव्याजादुद्भटचुंबितःस्मितमनोहारीहरिःपातुवः॥ ३ ॥

इतिश्रीकविराजश्रीजयदेवकृतेगीतगोविंदे महाकाव्येसामोददामोदरोनाम प्रथमः सर्गः ॥ १

कविः कथोपक्रमंरचयन्का लोकानाशिषयति रासोल्लासे

ति हरिः कृष्णः वः युष्मान्पातु इत्यन्वयः कथंभूतो हरिः रा
सोल्लासभरेण गोपीक्रीडायांहर्षातिशयेनविभ्रमभृतां
शृंगारविलासधारिणीनां आभीरवामभ्रुवांगोपिकानांअ
भ्यर्णसमीपंनिर्भरंगाढंयथातथाउरः वक्षः स्थलंपरिरभ्य
आलिंग्यराधयाउद्धूतं मकरंयथास्यात्तथागीतस्तुतिव्याजा
त् गानप्रशंसाछलेनचुंबितः ननुभवतुना कश्चिद्भ्रमः प्र
त्यक्षंयुवतिगणंपश्यंत्यातया कथंचुंबितस्तत्राह प्रेमांध
या प्रेम्णा हर्षातिशयेनांधया कृष्णंविनान्यन्नपश्यतीतित
याकिंकृत्वा त्वद्वदनंत्वन्मुखंसुधामयममृतमयंसाधुशो
भनं इतिव्याहृत्यउक्त्वा कथंभूतोहरिः स्मितमनोहारीरा
धायाः चुंबनकौशलंदृष्ट्वा स्मितेनईषद्धास्येन मनोहर्तुंशी
लंयस्यसः ॥३॥ ॥ इतिश्रीगीतगोविंदटीकायांप्रथमः
सर्गः समाप्तः ॥१॥

अथद्वितीयसर्गःप्रारभ्यते.

श्लोकः ॥ विहरतिवनेराधासाधारणप्रण
येहरौ विगलितनिजोत्कर्षादीर्ष्यावशेन
गतान्यतः ॥ क्वचिदपिलताकुंजेगुंजन्मधु
व्रतमंडली मुखरशिखरेलीनादीनाप्यु
वाचरहः सखीं ॥१॥

विहरतीति राधारहः एकांतेसखींउवाच कथंभूतारा
धा वनेवृंदावनेहरौ कृष्णेविहरतिक्रीडतिसति विगलि
तनिजोत्कर्षात् गतनिजभाग्यात् ईर्ष्यावशेन असहिष्णुत

या अन्यतोन्यस्मिन्स्थलेगता कथंभूते हरौ साधारणप्रणये अन्यगोपीतुल्यप्रेम्णि अतएवक्वचिदपि लताकुंजे लतागृहे लीनाएसा कथंभूतेकुंजे गुंजतांगंभीरंशब्दंकुर्वतां मधुव्रतानांभ्रमराणां मंडल्यासमूहेन मुखरशिखरेशब्दायमानाग्रभागे अतएवदीनापिदुःखितापि ॥१॥

अथपंचमप्रबंधोगुर्जरीरागेणरूपकतालेगीयते.

संचरदधरसुधामधुरध्वनिमुखरितमोहनवंशं ॥ चलितदृगंचलचंचलमौलिकपोलविलोलवतंसं ॥१॥ रासेहरिमिहविहितविलासं स्मरतिमनोममकृतपरिहासं ॥ ध्रु०॥

श्लोकोक्तमर्थंगीतेनाह संचरदिति हेसखिममममनः हरिं स्मरतिगोचरं करोति सर्वानुभूतविषयत्वात् कथंभूतं हरिं संचरताउद्गच्छता अधरसुधयामधुरेणअधरामृतमनोहरेणध्वनिनाशब्देन मुखरितः शब्दितो मोहननामावंशो येन पुनःकीदृशंचालतेनिचलितः अवर्जितः दृगंचलः कटाक्षोयेन चंचलः दोलायमानोमौलिः शेखरोयस्य कपोलयोर्गंडस्थलयोर्विलोलौचंचलौ वतंसौ कर्णाभरणेयस्यतंततःप्रत्येकंकर्मधारयः पुनःकीदृशं इहरासेगोपीक्रीडायां विहितःकृतः विलासोक्रीडायेनमयासह कृतः परीहासः नर्म येन तम् ॥१॥

चंद्रकचारुमयूरशिखंडकमंडलवलयित

केशं ॥ प्रचुरपुरंदरधनुरनुरंजितमेदुरमु
दिरसुवेशं ॥ २ ॥

चंद्रकेति चंद्रकेणविचित्रवर्णचिन्हेनचारुणांमयूर-शिखंडकानांमयूरपिच्छात्सानां मंडलेनसमूहेन वलयिताः वलयाकारेण वेष्टिताः केशाःयेन अतएवप्रचुरेणविस्तीर्णेनपुरंदरधनुषा इंद्रधनुषा अनुरंजितश्चित्रितो मेदुरोनिबिडः स्निग्धोयोमुदिरोमेघस्तद्वत्सुवेशं सुंदरम् ॥ २ ॥

गोपकदंबनितंबवतीमुखचुंबनलंबित-
लोभं ॥ बंधुजीवमधुराधरपल्लवमुल्लसि
तस्मितशोभं ॥ ३ ॥

गोपेति गोपकदंबस्यगोपसमूहस्यनितंबवतीनां स्त्रीणांमुखचुंबनेन लंबितः लोभोयेन पुनः कीदृशं बंधुजीवपुष्पवत् मधुरोमनोहरोऽधरपल्लवो ओष्ठपल्लवो यस्यपुनः कीदृशंउल्लसितेनविकासितेनस्मितेनशोभायस्यतम् ॥ ३ ॥

विपुलपुलकभुजपल्लववलयितवल्लवयु
वतिसहस्रं ॥ करचरणोरसिमणिगणभू
षणकिरणविभिन्नतमिस्रं ॥ ४ ॥

विपुलेति विपुलाः बहुलाः पुलकारोमोद्गमाययोस्ताभ्यां भुजपल्लवाभ्यां वलयितंवेष्टितं वल्लवानांआभीरा-णांयुवतीसहस्रंगोपिकावृंदंयेन पुनःकीदृशं करोचर

मणिगण युक्तभूषणानां किरणैर्दास्यां विभिन्नं नाशितं तमिस्रमंधकारो येन सः तं ॥ ४॥

जलदपटलचलदिंदुविनिंदकचंदनतिलकललाटं॥ पीनपयोधरपरिसरमर्दननिर्दयहृदयकपाटं॥५॥

जलदेति पुनः कीदृशंहरिं जलदपटलेमेघसमूहेचलतः इंदोश्चंद्रस्यविनिंदकंसमानं चंदनतिलकंचंदन कृततिलकंयत्र तादृशंललाटंयस्य अभूतोपमेयं क्वचिज्जलदपटलचलदिंदुविनिंदकचंदनबिंदुललाटमितिपाठः तदाजलदपटलेचलन्संचरन् यइंदुश्चंद्रस्तस्यविशेषेणनिंदकस्तिरस्कारकः चंदनबिंदुर्मंडलाकृतितिलकोललाटेयस्य तं पुनः कीदृशं पीनौमांसलौयौपयोधरौस्तनौतयोः परिसरस्यपर्यंतदेशस्यमर्दनेनिर्दयंदयारहितंहृदयकपाटं कपाटवद्विस्तीर्णं हृदयं यस्यतादृशं ॥५॥

मणिमयमकरमनोहरकुंडलमंडितगंडमुदारं॥ पीतवसनमनुगतमुनिमनुजसुरासुरवरपरिवारं॥६॥

मणिमयेति मणिमयेन मणिरूपेण मकरवन्मनोहराभ्यां कुंडलाभ्यां मंडितोलंकृतोगंडोगंडस्थलंयस्य पुनः कीदृशंमहांतं उदारंअभीष्टदातारं वापुनः कीदृशंपीतवसनंवस्त्रंयस्य महत्त्वमाह अनुगताआश्रितायेमुनिवराः शु

कनारदादयः मनुजाः परीक्षिदादयः सुरवराब्रह्मरुद्राद
यः असुराप्रल्हादादयस्तेपरिवाराः परिजनाः यस्यताहशी
हंद्वांतेवरपदस्यतेषांवराइतियहणं ॥६॥

विशदकदंबतलेमिलितंकलिकलुषभयंश
मयंतं॥ मामपिकिमपितरंगदनंगहशामन
सारमयंतं॥७॥

विशदेति विशदकदंबतलेमिलितंउपस्थितं पुनःकी
हशं कलिकलुषात्कलिकालजातपापाद्भयंतन्नाशयंतं पु
नःकीहशंमां अपिकिमपिअनिर्वचनीयं यथास्यात्तथा त
रंगन्उल्लंघन् अनंगयोगोयस्यांता हश्याहृष्यामनसात्हृदये
नचरमयंतं ॥७॥

श्रीजयदेवभणितमतिसुंदरमोहनमधुरि
पुरूपं॥ हरिचरणस्मरणंप्रतिसंप्रतिपुण्य
वतामनुरूपं॥८॥ इतिश्रीगीतगोविंदे
पंचमः प्रबंधः॥५॥

श्रीजयदेवेति श्रीजयदेवभणितंपुण्यवतांभक्तानां
हरिचरणयोः स्मरणंप्रतिअनुरूपं योग्यंभवतु इत्यध्या
हारः कथंभूतं अतिसुंदरंमोहनं मोहकारकं मधुरिपोः
रूपंकृष्णस्यरूपंयस्मिन् ॥८॥

श्लोक॥ गणयतिगुणग्रामंभ्रामंभ्रमाद
पिनेहतेवहतिचपरितोषंदोषंविमुंचति
दूरतः॥ युवतिषुचलत्तृष्णोकृष्णोविहारि

णिमांविनापुनरपिमनोवामंकामंकरोति
करोमिकिं ॥१॥

इदानींराधायाः कृष्णोवसतश्चेतसोवश्यत्वमाह हेस
खि ममममनश्चित्तंपुनरध्यधुनापिकृष्णेकामभिच्छांकरोति
किंकरोमिनिवृत्तोउपायांतरंनास्तीत्यर्थः युवतिषुगोपी
षुचलत्तृष्णेजाताभिलाषे पुनःकीदृशे मांविनाविहारिणि
क्रीडाशीले कीदृशंमनःवामंअवश्यमित्यर्थः वामत्वेकार
णमाह ममनः सापराधस्यापिकृष्णस्यगुणग्रामंगुण
समूहं गणयतिभ्रमादपिभ्रामंविस्मरणंनेहतेनचेष्टते-
भ्राममपीतिपाठेभ्रामंक्रोधंनेहतेनवांछति तद्गुणाकर्ण
नेनपरितोषंसंतोषंवहतिदोषंमदीयावज्ञादिकंदूरतए
व मुंचतिपरित्यजति ॥१॥

अथषष्ठप्रबंधोमालवरागेणएकताली
तालेगीयते·

निभृतनिकुंजगृहंगतयानिशिरहसिनि
लीयवसंतं ॥चकितविलोकितसकलदि
शारतिरभसभरेणहसंतं ॥१॥ सखिहे
केशिमथनमुदारंरमयमयासहमदनमनो
रथभावितयासविकारं ॥ ध्रु०

पुनरपिराधागीतेनसखीमाह· निभृतेति हेसखित्वंके
शिमथनंकृष्णंमयासहरमयक्रीडांकारय कीदृशंकृष्णं·
उदारंमहांतं कथंभूतयामया मदनस्यमनोरथःइच्छा·

स्मिन्भावो रत्याख्यः संजातो यस्याः कथंभूतं कृष्णं साधि कारं भावसहितं कीदृश्या मया निभृतं गूढं यन्निकुंजगृहं गतया प्राप्तया कथंभूतं कृष्णं निशि रात्रौ रहसि एकांतस्थले निलीय तिरोहितो भूय वसंतं तिष्ठंतं कथंभूतया मया च कितं सभयं यथा तथा विलोकिता दृष्टाः सकला दिशा यया पुनः कथंभूतं कृष्णं रतेरभसउत्साहस्तस्य भरेण आधिक्ये न हसितं सस्मितमुखं अस्मिन्गीते पूर्वार्द्धं राधाविशेषणं उत्तरार्द्धं कृष्णस्येति बोद्धव्यं ॥१॥

प्रथमसमागमलज्जितया पटुचाटुशतैर नुकूलं ॥ मृदुमधुरस्मितभाषितया शिथि लीकृतजघनदुकूलं ॥ २॥

प्रथमेति प्रथमसमागमेन नूतनसान्निध्येन लज्जितया लज्जायुक्तया कथंभूतं कृष्णं वैलक्ष्यदूरीकरणाय पटुचाटुशतानि कुशलानि यानि चाटुशतानि स्तवशतानि तैरनुकूलं आनुकूल्यकारकं मृदु कोमलं मधुरं स्मितपूर्वकं भाषितं यस्याः सा तया शिथिलीकृतं जघनदुकूलं जघनस्थितं पट्टवस्त्रं येन तं ॥ २॥

किसलयशयननिवेशितया चिरमुरसि ममैव शयानं ॥ कृतपरिरंभणचुंबनया परिरभ्य कृताधरपानं ॥ ३॥

किसलयेति किसलयशयने पल्लवकृतशय्यायां निवेशितया कथंभूतं कृष्णं ममैवोरसि वक्षःस्थले चिरं शयानं

कं आलिंगनपूर्वकं चुंबनं यया सा तया कथंभूतं कृष्णं परिरभ्य आलिंग्य कृतं अधरपानं ओष्ठपानं येन सः तं ॥३॥

अलसनिमीलितविलोचनया पुलकावलि
ललितकपोलं ॥ श्रमजलसिक्तकलेवरया
वरमदनमदादतिलोलं ॥४॥

अलसेति अलसेन सुरतसौख्येन निमीलिते मुद्रिते नेत्रे यस्याः सा तया पुलकावल्या रोमांचपंक्त्या ललितौ मनोहरौ कपोलौ यस्य तं श्रमजलेन सुरतजनितेन वारिणा सिक्तं कलेवरं शरीरं यस्यास्तया वरमदनमदात् उत्तमकामजनितहर्षात् अतिलोलं अतिचंचलं सतृष्णमित्यर्थः ॥४

कोकिलकलरवकूजितया जितमनसिजतंत्रविचारं ॥ श्लथकुसुमाकुलकुंतलया नखलिखितघनस्तनभारं ॥५॥

कोकिलेति कोकिलकलरववत् अव्यक्तध्वनिवत् कूजितं शब्दो यस्यास्तया जितः मनसिजस्य कामस्य तंत्रविचारः शास्त्रसिद्धांतो येन सः तं श्लथाः शिथिलाः कुसुमैः पुष्पैराकुलाः व्याप्ताः कुंतलाः चूर्णकुंतला यस्याः सा तया नखेन लिखितश्चिह्नितो घनो निबिडः स्तनभारो येन सः तं ॥५॥

चरणरणितमणिनूपुरया परिपूरितसुरतवितानं ॥ मुखरविशृंखलमेखलया सकचग्रहचुंबनदानं ॥६॥

चरणेति चरणयोः पादयोः रणितौ शब्दितौ मणियुक्त नूपुरौ यस्याः परिपूरितं संपूर्णं कृतं सुरतवितानं सुरत समूहो येन तं मुखरा शब्दायमाना विशृंखला उन्मुक्ता मेखला कांची यस्याः सा तया सकचग्रहं कचग्रहणसहितं चुंबनदानं यस्य तं ॥ ६॥

रतिसुखसमयरसालसया दरमुकुलित
नयनसरोज॥ निःसहनिपतिततनुलतया
मधुसूदनमुदितमनोजं ॥७॥

रतिसुखेति रतिसुखसमये सुरतसुखकाले प्रीत्या अलसया अलसयुक्तया दरमुकुलितनयनसरोजं ईषन्मीलितनेत्रकमलं निःसहं असमर्थं निपतिता तनुलता शरीरलता यस्यास्तया कथंभूतं कृष्णं मधुदैत्यं सूदयतीति तं उदितः जातो मनोजः कामो यस्य तं ॥७॥

श्रीजयदेवभणितमिदमतिशयमधुरिपु
निधुवनशीलं॥ सुखमुत्कंठितराधिकया
कथितं वितनोतु सलीलं ॥ ८॥

इति श्रीगीतगोविंदे षष्ठः प्रबंधः

श्रीजयदेवेति इदं श्रीजयदेवेन भणितं उक्तं गीतं कर्तृ सुखं पारलौकिकं सुखानि ऐहिकानि च वितनोतु विस्तारयतु केषां पठतां शृण्वतां च कथंभूतं श्रीजयदेवभणितं अतिशयमधिकं मधुरिपोः कृष्णस्य निधुवनशीलं सुरतचरितं यस्मिन् पुनः कीदृशं उत्कंठितया गोपवध्वा राधिकया कथितं स-

लीलं शृंगाररसक्रियासहितं ॥८॥

श्लोकः॥ हस्तस्रस्तविलासवंशमनृजुभ्रू वल्लिमद्वल्लवी वृंदोत्सारिदृगंतवीक्षित मतिस्वेदार्द्रगंडस्थलं॥ मामुद्वीक्ष्यविलज्जितस्मितसुधामुग्धाननंकानने गोविंदं व्रजसुंदरीगणवृतं पश्यामिहृष्यामिच १

अधुनात्सुकंठयासख्यानीयमानासागोपीगणवृतंकृष्णं दृष्ट्वा परावृत्यसखीमाह हस्तेति हेसखि गोविंदं अहं पश्यामि हृष्यामि हर्षप्राप्नोमिच पश्यामीति वर्तमान सामीप्याद्वर्तमानता कथंभूतं गोविंदं कानने वृंदावने व्रजसुंदरीगणेन गोपीसमूहेन वृतं वेष्टितं ननुसपत्नीभिः परिवृतं दृष्ट्वा कथंतेहर्ष इत्यतआह मांउद्वीक्ष्य दृष्ट्वा हस्तात्स्रस्तोध्वस्तोविगलितः विलासवंशोक्रीडावंशोयस्यतं अनृजुभ्रूवल्लिमतीनां कुटिलभ्रूलतायुक्तानांगोपीनांसमूहे उत्सारिऊर्द्ध्वतिर्यग्गामिदृगंतेन कटाक्षेण वीक्षितमीक्षणंयस्यतं मय्यागतायांभियादृगंतन्वेषयान्यगोपीरपसारयंतमितिभावः अतिस्वेदेनातिघर्मेणार्द्रगंडस्थलंयस्यतं विलज्जितास्मितंसलज्जाहास्यं तदेवसुधामृतंतयामुग्धमाननं मनोहरंमुखंयस्यतं॥१॥

श्लोकः॥ दुरालोकस्तोकस्तबकनवकाशोकलतिका विकाशःकासारोपवनपवनोपि व्यथयति॥ अपिभ्राम्यद्भृंगीरणितरम-

पीयानमुकुलप्रसूतिश्चूतानांसखिशि
खरिणीयंस्करवयति ॥२॥

पुनः विभावयन्नाह दुरालोकेति हेसखिदुरालोक्य
तेवियोगिनामुद्वेगजनकत्वात् स्तोकोस्यस्तबकः गुच्छो
यस्यनवाशोकलतिकायाः विकाशःउद्योतः मांव्यथयतिपी
डयतिकिंच कासारोपवनस्यसरोवरनिकटवनस्य पवनो
पिमांव्यथयति कासारइत्यनेनवायोः शैत्यंउपवनसंबंधि
त्वेनसौगंध्यं वृक्षैरुपहतगतित्वेनमांद्यंच ध्वनितं अपिच
चूतानामाम्राणांइयंमुकुलप्रसूतिः कलिकोद्भेदोमांनसः
खयति कथंभूताप्रसूतिः भ्राम्यंतीनांचलंतीनां भ्रमरांग
नानांरणितैः शब्दितैः रमणीयामनोज्ञापीत्यर्थः शिखरि
णीप्रशस्ताग्रभागवती भृंगीणांचलनंनायकान्वेषणार्थमि
तिध्वनितं शिखरिणीनामकं छंदइतीदंसूचितं ॥२॥

श्लोकः॥ साकूतस्मितमाकुलाकुलगल
द्धम्मिल्लमुल्लासितभ्रूवल्लीकमलीकदर्शि
तभुजामूलार्द्धदृष्टस्तनं॥ गोपीनांनि
भृतंनिरीक्ष्यललितकांचिच्चिरंचिंतयन्नं
तर्मुग्धमनोहरोहरतुवःक्लेशंनवःकेश
वः॥३॥ ॥इतिश्रीकविराजश्रीजय
देवकृतेगीतगोविंदेमहाकाव्येअक्लेशके
शवोनामद्वितीयःसर्गः॥२॥

अधुनाकविः लोकानाशिषयति साकूतेति नवरंट

गारस्तरूणोवाकेशवः वः युष्माकंभक्तानांक्लेशंदुःखंह
रतुदूरीकरोतु कीदृशः साकूतंसाभिप्रायंस्मितमीषद्धा
स्यंयत्र गोपीनांनिभृतंगोप्यभावंनिरीक्ष्यदृष्ट्वा कांचि
द्दयितां अंतर्मनसिचिरंचिंतयन् मुग्धमनोहरः मोहयुक्त
सुंदरः कथंभूतंनिभृतं आकुलाकुलोत्यंतास्तव्यस्तःग
लन्उन्मुक्तीभवन् धम्मिल्लः केशपाशोयत्र उल्लासिताउ
र्ध्वैःकृताभ्रूवल्ली।यत्रअलीकेनज्रृंभणादिच्छलेनदर्शिताः
भुजाबाल्लार्द्धहस्तकृतना यस्मिन्भुजोच बालाश्चार्द्धहस्तो
चस्तनोचेतिद्वंद्वः॥३॥ ॥इतिश्रीगीतगोविंदटीका
यांद्वितीयःसर्गः॥२॥

अथतृतीयसर्गआरभ्यते·

श्लोकः॥ कंसारिरपिसंसारवासनाबंध·
शृंखलां॥ राधामाधायहृदयेतत्याजव्रज
सुंदरीः॥१॥

एवंराधायाः विरहमुक्त्वा कृष्णस्यापिविरहव्यथांतस्या
माह कंसारिरपि कृष्णोपिराधांहृदयेमनसिआधायस्था
प्य· व्रजसुंदरीर्गोपीस्तत्याजत्यक्तवान् कीदृशींराधांसं·
सारेवासनासंस्कारस्तस्याबंधायशृंखलांनिगडरूपांसौं
दर्यवतीर्बह्वीरपितत्याजेतिराधायांकृष्णस्यानुरागातिश
योध्वनितः॥१॥

श्लोकः॥इतस्ततस्तामनुसृत्यराधिका
मनंगबाणव्रणखिन्नमानसः॥ कृतानुता

पः सकलिंदनंदिनीतटांतकुंजेनिषसाद माधवः ॥ २॥

पुनः किंकृतवान् इतस्ततेति समाधवः कलिंदनंदिन्या यमुनायास्तटांत कुंजेतीरलतागृहेनिषसाद स्थितवान् किं कृत्वा इतस्तत अनेकस्थानेपुनां राधिकां अनुसृत्यान्वेष्य कीदृशः अनंगबाणव्रणेन कामशरक्षतेनेन खिन्नं दीनं मनोयस्य कृतोनुतापो पश्चात्तापो येनसः ॥ २॥

अथसप्तमप्रबंधः गुर्जरीरागेणप्रतिमंठतालेगीयते.

मामियंचलिताविलोक्यवृतंवधूनिचयेन ॥ सापराधतयामयापिनवारितातिभयेन ॥ १॥ हरिहरिहतादरतयागता साकुपितेव ॥ ध्रु० ॥

कृतानुतापस्त्वमेष हरीत्येन मामिति गीतस्यास्य गुर्जरीरागः प्रतिमंठतालः तयोर्लक्षणं प्राक्कथितं हरिहरीति खेदानुकारे साराधा हतादरतया हतबहुमानत्वेन कुपितेवकोपं प्राप्येवगता अन्यस्थानेगता नतुसाकुपितात्वया कथंज्ञातातत्राह मांकृष्णंवधूनिचयेन गोपीसमूहेन वृतंवेष्टितं विलोक्य चलिता इतोगता इतिभिन्नैववाक्यरचना तर्हि सागच्छंतीत्वयाकिंनतनिवारितातत्राह मयापिकृष्णेनापि सापराधतयाकृतापराधत्वेन हेतुना अतिभयेन नवारिता पद्यार्थ्यमुक्तेन मयाअतिभयेनातिशयितं भयंय

स्येति ॥१॥

किंकरिष्यतिकिंवदिष्यतिसाचिरंविरहेण
किंजनेनधनेनकिंममजीवितेनगृहेण ॥२॥

किंकरिष्यतीति साराधाचिरंविरहेणचिरकालमहि योगेन किंकरिष्यति विरहतापशांत्यर्थंकमुपायंकरिष्य-तीत्यर्थः किंवदिष्यति ननुएतावतातस्यामेवकोवाग्रहः अन्यगोपीजनस्यधनादिनाचित्तव्यावर्तनंकर्तव्यंतत्राह तांराधांविनाममजनेनलोकेनकिं तद्वियोगेनसर्वजनपरित्यागात् धनेनकिं ननुधनंविनागृहसौख्यंनस्यात्तत्राह गृहेण किंप्रयोजनं नकिमपि तद्वियोगेनवनवासांगीकारात् ननु सुखास्पदं गृहंविनासुखंनस्यात्तत्राह ममसुखेनकिंतां विना सर्वंनिष्फलमित्यर्थः सैवमेसुखरूपेतिभावः ॥२॥

चिंतयामितदाननंकुटिलभ्रूरोषभरेण ॥
शोणपद्ममिवोपरिभ्रमताकुलंभ्रमरेण ३

चिंतयामीति अहंतस्याः राधायाः आननंमुखंचिंतयामिस्मरामि कीदृशमाननं रोषभरेणक्रोधातिशयेन कुटिलेवक्रेभ्रुवौयत्र किमिव उपरिभ्रमताशोणपद्ममिव अत्र रोषारुणेमुखे शोणपद्मसादृश्यंबोध्यं वारंवारंरोषाद्भ्रकीभवंत्योर्भ्रुवोर्भ्रमद्भ्रमरोपमाबोध्या ॥३॥

तामहंहृदिसंगतामनिशंभृशंरमया
मि ॥ किंवनेनुसरामितामिहकिंवृथावि
लपामि ॥४॥

मतिशयेनरमयामि क्रीडयामीतिभावः इहवनेतारांधाकि
मनुसरामिस्हदिसंगतत्वादेवतृथा व्यर्थमेव किंविलपामि
विलापंकरोमि॥४॥

तन्विखिन्नमसूयया हृदयंतवाकलया
मि॥ तन्नवेद्मिकुतोगतासिनतेनतेनु
नयामि॥५॥

हृदिसंगतांतां मत्वाह तन्वीति हेतन्वि असूयया अस
हिष्णुत्वेन दुःखितंतवहृदयं आकलयामि तर्कयामितत्तस्मा
दहं नवेद्मिनजानेकुतः कुत्रगतासि तेनकारणेनतेतुभ्यं
नानुनयामि नप्रसादयामि क्रियार्थोपपद मितिचतुर्थी
तेइति॥५॥

दृश्यसेपुरतोगतागतमेवमेविदधासि
किंपुरेवससंभ्रमंपरिरंभणंनददासि॥६

दृश्यसेइति हेराधेत्वंममपुरतः अग्रेगतागतंगमना
गमनमेवविदधासि करोषीतिदृश्यते तर्हिंपुरेवपूर्ववत्
ससंभ्रमं सवेगं परिरंभणमालिंगनंकिंकेन कारणेन नद
दासि विरहिणोहिचित्तानुषंगात्सर्वतस्तामेव पश्यंति॥६

क्षम्यतामपरंकदापितवेदृशंनकरोमि
देहिसुंदरिदर्शनंममम न्मथेनदुनोमि॥७

क्षम्यतामिति हेसुंदरि पूर्वकृतमपराधंक्षम्यतां अ
परमीदृशंतवापराधंकदापिनकरोमिनकरिष्यामि अतएव

B4

भवामि ॥ ७॥

वर्णितंजयदेवकेन हरेरिदंप्रणतेन ॥ किंदु
बिल्वसमुद्रसंभवरोहिणीरमणेन ॥ ८॥

इतिश्रीगीतगोविंदेसप्तमप्रबंधः

वर्णितमिति जयदेवकेनस्वार्थेकःइदंगीतंवर्णितं कीदृशेनजयदेवकेन हरेः प्रणतेनकृष्णस्याराधनपरेणपुनः कीदृशेन किंदुबिल्वंजयदेवकुलंतदेवसमुद्रस्तस्मात्संभवोयस्य एतादृशोरोहिणीरमणश्चंद्रइव यथासागरादुत्पन्नश्चंद्रस्तथा किंदुबिल्वोत्पन्नोजयदेवइति यद्वा किंदुबिल्वशासनं ॥ ८॥

श्लोक ॥ हृदिबिसलताहारोनायंभुजंगम
नायकः कुवलयदलश्रेणीकंठेनसागरल
द्युतिः ॥ मलयजरजोनेदंभस्मप्रियारहिते
मयि प्रहरनहरभ्रांत्यानंगक्रुधाकिमुधा
वसि ॥ १॥

इदानींकामएवमेदुःखं प्रयच्छतीतितमुपालंभगोचरं करोमीत्याशयेनाह हृदीति हेअनंगत्वंमयिहरभ्रांत्या महादेवभ्रमेण नप्रहरमाप्रहारंकुरुक्रुधाकोपेन किमुकिमिति धावसिमारयितुंधावनंकरोषि कीदृशेमयिप्रियारहिते राधावियोगिनिमयिहरभ्रांत्या नप्रहरप्रहारंमाकुरु सर्वदाप्रियायुक्तो अहंत्वधुना प्रियारहित इतिमयिहरभ्रमो नयुक्त इतिभावः हरभ्रांतिंपरिहरति हेकाममम हृदि

बिसलतायाः हारो मृणाललता याहारस्तद्विरहजन्यसंताप शांत्यर्थं धृतः नायंभुजंगम नायकः शेषः इयंमेकंठेकुवल यदलानांनीलोत्पलानांश्रेणीपंक्तिः शैत्यायधृतानतु सागर लद्युति हालाहलदीप्तिः इदंमलयजरजोचंदनलेपोसर्वां गे तापशांत्यर्थं धृतंनतुभस्मविभूतिः ॥१॥ 317819

श्लोकः॥ पाणौमाकुरुचूतसायकममुंमाचा
पमारोपयक्रीडानिर्जितविश्वमूर्छितजना
घातेनकिंपौरुषं॥ तस्याएवमृगीदृशोम
नसिजप्रेंखत्कटाक्षानिलज्वालाजर्जरि
तमनागपिमनोनाद्यापिसंधुक्षते ॥२॥

पुष्पसायकत्वेनकामः प्रसिद्धोतः इमान् चूतमंजरी रूपानेवबाणान् धनुष्यारोप्यमांताडयिष्यतीति शंकयापु नरपि कामायैव दैन्यंकरोति पाणाविति हेक्रीडानिर्जित विश्वक्रीडयालीलयाजितंभुवनंयेनसः अमुंचूतसायकं आम्रपुष्पबाणंपाणौहस्तेमाकुरु चापंधनुःमारोपयसश रंमाकुरु हस्तेपिचेत्करोषितर्ह्यमुंसायकंमासंधेहीत्य र्थः हेमनसिजमदन यतः मूर्छितस्य मूर्छांप्राप्तस्य मादृशजनस्याघातेनपीडयाकिंतेपौरुषंकस्तवपुरुषार्थः नकिमपीत्यर्थः मूर्छितत्वेकारणमाह तस्याएवमृगीदृ शो हरिणीनयनायाः तस्याएवेति विरहाधिक्येन राधानाम ग्रहणाशक्तिः प्रतिपाद्यते प्रेंखंतोचलंतो कटाक्षाएवान लाः वन्हयस्तेषां श्रेण्याप तस्याजर्जरितंखंडखंडीभूतंम-

317819

ममनः मनागपिस्वल्पमपि नाद्यापिसंधुक्षते स्वस्थंनभवति कश्चित्कटाक्षाशुगोति पाठः तदाकटाक्षएवाशुगाबाणाः ॥२

श्लो० ॥ भ्रूपल्लवोधनुरपांगतरंगितानि बाणागुणःश्रवणपालिरितिस्मरेण ॥ तस्यामनंगजयजंगमदेवतायामस्त्राणिनिर्जितजगंतिकिमर्पितानि ॥ ३ ॥

ननुतत्कटाक्षादिचिंतनादेवतवदुःखंभवतिमदनस्यतर्हिकोपराधस्तत्राह भ्रूपल्लव इति इतीत्थंप्रकारेणस्मरेण कामेनतस्यां राधायां अस्त्राणि अर्पितानि स्थापितानि किंतर्कयामि किंवितर्केनन्वस्त्राणिवीरेणस्वहस्ते स्थापयितुमुचितानिनत्वन्यत्रेत्याह निर्जितानि जगंतियैस्तानितैरेवास्त्रैर्जगत्त्रयंजित्वा तत्रस्थापितानीतिभावः तर्ह्यन्यत्रकिं स्थापितानीत्याह अनंगस्यकंदर्पस्यजये त्रैलोक्यविजये जंगमदेवतायांगमनशील देवतारूपायां इतीतिकिं भ्रूपल्लवोभ्रूलतातदेवधनुः अपांगतरंगितानि कटाक्षनिरीक्षणानिएवबाणाः श्रवणपालिः कर्णप्रदेशएवगुणः प्रत्यंचा ३

श्लोकः ॥ भ्रूचापेनिहितःकटाक्षविशिखोनिर्मातुमर्मव्यथांश्यामात्माकुटिलःकरोतुकबरीभारोपिमारोद्यमं ॥ मोहंतावदयंचतन्वितनुतांबिंबाधरोरागवान्सद्वृत्तस्तनमंडलस्तवकथंप्राणैर्ममक्रीडति ॥ ४ ॥

अधुनामनोविषयीकृताराधा प्रतिस्वीयदुःखमाह

भ्रूचापइति हेतन्विकृशांगि भ्रूचापेभ्रुवावेवचापेधनुस्तत्रनिहितः अर्पितः कटाक्षविशिखः कटाक्षबाणः धर्मव्यथांमर्मपीडांतावन्निर्मातुकरोतु विशिखस्यमर्मव्यथाजनकत्वंयुज्यतएवेतिभावः अनुचश्यामात्माश्यामवर्णः कुटिलः वक्राकारः कबरीभारोपि केशसमूहोपिमारोद्यमंकामौन्नत्यंतावत्करोतु योंतर्मलिनः कुटिलश्चभवतिसोन्यमारणायत्तएवेतिसूचितं अयंचबिंबाधरः बिंबोष्ठः मोहंतनुतां विस्तारयतां कथंभूतोबिंबाधरः रागवान्लोहितवर्णः रागिणोविषयिणः मोहोममत्वंयुज्यतएव सद्वृत्तः साधुवर्तुलः तवस्तनमंडलः ममप्राणैः कथंक्रीडति ये सद्वृत्ताःसन्मार्गप्रवर्तकास्तेतुपरप्राणघातकाः नभवंति विरोधनामालंकारः॥४॥

श्लोकः॥ तानिस्पर्शसुखानितेचतरलास्निग्धादृशोर्विभ्रमास्तद्वक्त्रांबुजसौरभंसचसुधास्यंदीगिरांवक्रिमा॥ साबिंबाधरमाधुरीतिविषयासंगेपियन्मानसंतस्यांलग्नसमाधिहंतविरहव्याधिःकथंवर्तते॥५॥

तानीति तान्येवस्पर्शसुखानि यानिपुरानाधिकासंगमात्तुभूतानि एतेनत्वगिंद्रियविषयलाभः तेचतरलाश्चंचलाः स्निग्धाः प्रेमान्विताः दृशोश्चक्षुषोर्विभ्रमाविलासाः एतेनरूप नंदेसवक्त्रांबुजसौरभंवदनकमलसुरभित्वं ए

तेनगंधत्वं सचरूधास्यंदीअमृतद्रवयुक्तः गिरांवचसां यः वक्रिभावकृत्वंएतेनशब्दः साच्चबिंबाधरमाधुरीबिंब सदृशौष्ठमाधुर्यंतदेवएतेनरसः इत्येवंप्रकारेणविषया संगेपितस्यारूपरसस्पर्शादीनांसाभिध्येपि ममानसं मनस्तस्यांराधायांलग्नसमाधिप्राप्तस्थानंचेद्यदितदाहं तइतिखेदेविरह व्याधिः व्यथाकथंवर्ततेध्यानयुक्तस्ययो गिनोव्याधिनाशात् ॥५॥

श्लो० ॥ तिर्यक्कंठविलोलमौलितरलोत्तंसस्य वंशोच्चरद्दीतस्थानकृतावधानललनालक्षैर्नसंलक्षिताः ॥ संमुग्धेमधुसूदनस्य मधुरेराधामुखेंदौमृदुस्पंदंकंदलितास्चिरंददतुवः क्षेमंकटाक्षोर्मयः ॥६॥

इतिश्रीकविराजश्रीजयदेवकृतेगीतगोविंदेमहाकाव्येमधुसूदनोनाम तृतीयः सर्गः ॥३

अधुनाकविः सर्गांतेभक्तानाशिषयति तिर्यक्कंठेति मधुसूदनस्यकृष्णस्यकटाक्षोर्मयः कटाक्षदर्शनतरंगाः वः युष्माकंभक्तानांक्षेमंकल्याणंददतु प्रयच्छंतु कीदृशाः मधुरेसुंदरे राधायाः मुखमिंदुरिवतस्मिन् संमुग्धे अव्यक्ते मृदुस्पंदं किंचिच्चलनंच यथास्यात्तथा पल्लविताः इंदुदर्शनात्तरंगाःअतीवभवंतीतिकटाक्षाणांतरंग साम्यं नन्वन्यासुपश्यंतीषु कथंराधामुखचंद्रएवपल्लवि

ताउर्म्मयः अतआह वंशादुच्चरं त्सु वेणोर्निर्गच्छत्सु गीत स्थानेषु गानपदेषु कृतावधानैर्दत्तमनोभिर्ललनालक्षैर्गोपांगनासहस्रैर्नसंलक्षिताः नज्ञाताः कथंभूतस्यमधुसूदनस्य तिर्यग्वक्रः कंठोयस्यविलोलश्चंचलो मौलिर्मस्तकः किरीटोवायस्य तरलश्चंचलउत्तंसःअवतंसोयस्यसः पश्चात्कर्मधारयः लक्षपदंबहुत्वोपलक्षकमुग्धोहरिर्विरहीत्यर्थः ६

अथचतुर्थःसर्गःप्रारभ्यते·

श्लो०॥ यमुनातीरवानीरनिकुंजेमंदमास्थितम्॥ प्राहप्रेमभरोद्भ्रांतंमाधवंराधिकासखी॥१॥

इदानींराधासखीकृष्णंप्रत्याह यमुनेति राधिकायाः सखीमाधवंकृष्णंवक्ष्यमाणंप्राह· उक्तवती कीदृशं माधवं यमुनायास्तीरेयः वानीरनिकुंजः वेतसोपलक्षितलतागृहंतस्मिन्मंदंतूष्णीं आस्थितं आसीनंपुनः कीदृशं प्रेम्णा राधायां प्रेमातिशयेनउद्भ्रांतं उद्विग्नचित्तं कथंमायिप्रसादं यास्यतीत्युद्भ्रांतं॥१॥

अथअष्टमप्रबंधः कर्णाटकरागेणएकतालीतालेगीयते·

निंदतिचंदनमिंदुकिरणमनुविंदतिखेदमधीरं॥ व्यालनिलयमिलनेनगरलमिवकलयतिमलयसमीरं॥१॥ साविरहेतवदीना माधवमनसिज विशिखभया

दिव भावनयात्वयिलीना ॥ ५० ॥

उक्तश्लोकार्थं गीतेनाह निंदतीति अस्यकर्णाटकरागः
तल्लक्षणं कपोलपाणिर्गजदंतपत्रमेकं वहन् दक्षिणकर्ण
पूरे संस्तूयमानः स्फुरच्चारणौघैः कर्णाट रागः सितनी
लकंठः इति अत्रगीते विरहोत्कंठा वर्णनीया वासकशय्या
सोत्कंठा स्वाधीनभर्तृका तथा कलहांतरिता चापि विप्र·
लब्धानसारिका खंडिताप्रोषिता चैव वनिताः स्याष्टसंभृताः
तत्रोत्कंठालक्षणं भरतोक्तं यस्याः समुचितेप्यन्हि प्रवासी
नैतिवल्लभः सास्मरानलसंतप्ता विरहोत्कंठितामता इति
गीतार्थस्तु हे माधव साराधा तवविरहे सति दीनादुःखिता त्व
यित्वाद्विषये भावनया अनुचिंतनेन कामबाणः कृष्णात्हृद
ये प्रविश्य स्थितां मां न पीडयिष्यतीति भावनया लीना प्रवि
ष्टा कस्मादिव मनसिजविशिखभयादिव केन प्रकारेणे
त्याह हे कृष्ण साराधा चंदनं निंदति इंदुकिरणं चंद्रदीधि
तिं अनुलक्षीकृत्य अधीरं अनल्पखेदं विंदति लभते म
लयसमीरं मलयवातं व्यालनिलयं सर्पस्थानं चंदनवृक्ष·
स्तस्य मिलनेन स्पर्शनेन गरलमिव विषमिव कलयति म
न्यते ॥ १ ॥

अविरलनिपतितमदनशरादिव भवदव
नाय विशालं ॥ स्वहृदयमर्मणि वर्म करो·
ति सजलनलिनीदलजालं ॥ २ ॥

अविरलेति हे कृष्ण साराधा स्वहृदयमर्मणि सजल

नलिनीदलजालंसजलकमलिनीपत्रसमूहमेववर्मतनु त्रंकरोति कस्मैप्रयोजनायभवद्वनायस्त्वत्हृदयस्थितस्य भवतोरक्षणाय कस्मादिवअविरलंनिरंतरंपतितोयोम दनशरः कामबाणास्तस्मादिव कीदृशंवर्मविशालंविस्ती· र्णं त्वंतस्यात्हृदयेसर्वदाइतिभावः ॥२॥

कुसुमविशिखशरतल्पमनल्पविलासक लाकमनीयं॥व्रतमिवतवपरिरंभसुखा यकरोतिकुसुमशयनीयं॥३॥

कुसुमेति कुसुमशयनीयंपुष्पशय्यांकरोति कीदृशं अनल्पविलासकलाभिः बहुतरक्रीडाभिः कमनीयंसुंद रं पुष्पशय्यास्वयमेवमनोज्ञा इयंशय्याविरचनाकुशला शय्याभावेपुष्पशय्यांकरोतीत्यर्थः कमिव कुसुमवि· शिखः कामस्तस्यशराः पुष्पाणितान्येवतल्पंशय्याताहृ शं व्रतमिवशरशय्याशयनरूपं दारुणं व्रतमिति भावः किमर्थं व्रतमित्यतआह· तवपरिरंभसुखाय आलिंगन सुखंप्राप्तुमित्यर्थः ॥३॥

वहतिचगलितविलोचनजलधरमानन· कमलमुदारं॥विधुमिवविकटविधुंतुद दंतदलनगलितामृतधारं॥४॥

वहतीति साराधाउदारंमनोज्ञं आननकमलंवहति धारयति कीदृशंचलितं उच्छ्वसितंयद्विलोचनजलंनेत्रा श्रु तद्धारयतीति कमिव विधुमिव कीदृशंविधुंविकटे

नदारुणेन महताविधुंतुदस्य राहोर्दंतेन दलनाद्गलितामृत धारायस्मात् ॥ ४ ॥

विलिखतिरहसिकुरंगमदेनभवंतमसमशर भूतं ॥ प्रणमतिमकरमधोविनिधायकरेच शरंनवचूतं ॥ ५ ॥

विलिखतीति हेकृष्ण साराधा असमशरभूतं कंदर्पस्व रूपंभवंतंत्वां रहसिएकांतेकुरंगमदेन मृगमदेन कस्तूरिक याविलिखति अधः कामरूपस्यभवतोधस्तान्मकरंकाम वाहनंविनिधाय कृत्वाकरेहस्तेनवचूतंनूतनाम्ररूपं शरं बाणंचविनिधायसंस्थाप्य प्रणमतिपूजानंतरं प्रणामोयु ज्यतएव मकरस्यध्वजत्वे प्रसिद्धेवाहनत्वेपिनदोषः ॥ ५

प्रतिपदमिदमपिनिगदतिमाधवतवचरणे पतिताहं ॥ त्वयिविमुखेमयिसपदिसुधा निधिरपितनुतेतनुदाहं ॥ ६ ॥

प्रतिपदमिति हेकृष्ण साराधाप्रतिपदं प्रतिक्षणं इद मपिनिगदति इदंकिं हेमाधव हेकृष्ण तवचरणे अहं पति- ता किमित्यतआह त्वयिविमुखेपराङ्मुखे सति मयि सप दितत्क्षणं सुधानिधिरपि चंद्रोपि तनुदाहं शरीरपीडां तनु तेविस्तारयति यतश्चंद्रो प्येवंकुरुते अतस्तवचरणे पतिता ६

ध्यानलयेनपुरःपरिकल्प्यभवंतमतीवदु रापं ॥ विलपतिहसतिविषीदतिरोदितिचं चतिमुंचतितापं ॥ ७ ॥

ध्यानेति हे कृष्ण अतीवदुरापं दूतिद्वारापि दुर्लभं मयं तं ध्यानलयेन चित्तैकाग्र्यविशेषेण पुरोग्रे परिकल्प्य कल्पनां कृत्वा मयि स्नेहं इदानीमपि नकरोतीति विलापं करोतीति हसति नवदर्शनेन विषीदति हास्यानंतरं आनर्थक्यात् अतएव रोदिति चंचतिस्थानांतरंगच्छतिस्थानांतरे आलिंगनादिकं करिष्यतीति अतएव तापं मुंचति मनस्तापं त्यजति ॥७॥

श्रीजयदेवभणितमिदमधिकंयदिमनसा नटनीयं॥ हरिविरहाकुलबल्लवयुवतिः सखीवचनंपठनीयं॥८॥

इतिश्रीगीतगोविंदेअष्टमप्रबंधः

श्रीजयदेवेति श्रीजयदेवेन भणितं कथितं गीतं मनसा चित्तेन अधिकं सातिशयं यदि नटनीयं नृत्यितव्यं तदा हरिविरहेण कृष्णवियोगेनाकुलायाः बल्लवयुवत्याः राधायाः सखीवचनं गीतरूपं पठनीयं श्रीजयदेवगीते चिदमतिशयितव्यमिति भावः॥८॥

श्लोकः॥ आवासोविपिनायतेप्रियसखीमालापिजालायतेतापोपिश्वसितेनदावदहनज्वालाकलापायते॥ सापित्वद्विरहेण हंतहरिणीरूपायतेहाकथं कंदर्पोपियमायतेविरचयन्शार्दूलविक्रीडितं १

गीतोक्तमर्थंश्लोकेनाह अवासइति हे कृष्ण हंतेतिखे

मृगीरूपमिवाचरति कथमित्यत आह आवासः गृहंविपि नायते वनमिवाचरतीति त्वद्विरहात् प्रियसखीमालापि सखीसमूहोपि स्वेच्छागमननिवारकतयाजालायतेजालमिवाचरति तापोपि देहदाहोपि श्वसितेन श्वासोच्छ्वासेन दावदहनज्वालाकलापायते अरण्यवह्निज्वालापरंपरेवाचरति कंदर्पोपिकथंयमायतेयम इवाचरति हाशब्दः स्वात्मनोदुःखाधिक्य सूचनार्थः कीदृशः कंदर्पः शार्दूलविक्रीडितं व्याघ्रचेष्टितं विरचयन् मृगीमरणंशार्दूलादेव भवति ॥१॥

अथनवमप्रबंधो देशाखरागेणएकतालीतालेगीयते॥

स्तनविनिहितमपिहारमुदारं ॥सामनुते कृशतनुरिवभारं॥१॥ राधिकाविरहेतव केशव॥ ध्रु०॥

इदानीं सखी पुनरपिराधायादुःखचेष्टितंगीतेनाह स्तनेति गीतस्यास्य देशाखरागः एकतालीतालः तल्लक्षणं आस्फोटनादिः कृतरोमहर्षो नियुन्द्धसन्नद्ध विशालबाहुः हे केशवकृष्ण तवविरहेजातेसति साराधा एवंचेष्टते कीदृशमित्यत आह कृशतनुः विरहकृशशरीरा सा स्तनविनिहितमपिस्तनयोःस्थापितंउदारंबहुमूल्यं हारमपिभारमिवमनुते १

सरसमसृणमपिमलयजपंकं॥ पश्यति विषमिववपुषिसशंकं ॥२॥

सरसमिति साराधा सरसमसृणं सार्द्रचिक्कणं द्रव रूपमलयजपंकमपि चंदनलेपमपि वपुषि सशंकं विषमि वपश्यति नवविरहात् ॥२॥

श्वसितपवनमनुपमपरिणाहंमदनदहन-
मिववहतिसदाहं ॥३॥

श्वसितेति साराधाश्वसितपवनं निश्वासवायुंमदन दहनमिव कामाग्निमिववहतिधारयति वायोरपिदाहकत्वा त् कीदृशं अनुपमः उपमारहितः परिणाहो विशालतायः स्यतं अतिदीर्घं सदाहं उष्णत्वाद्दाहयुक्तं ॥३॥

दिशिदिशिकिरतिसजलकणजालं ॥ नय
ननलिनमिवविगलितनालं ॥४॥

दिशीति साराधासजलकणजालं अश्रुबिंदुसमूह सहितं नयनमेवनलिनं पद्मंदिशिदिशिभवद्दर्शनवांछया विकिरतिक्षिपति कीदृशमिवगलितदंडमिव सर्वतः प श्यतीत्यर्थः ॥४॥

नयनविषयमपिकिसलयतल्पं ॥ कलय
तिविहितहुताशविकल्पं ॥५॥

नयनेति साराधानयनविषयमपिनेत्रगोचरमपिकि सलयतल्पंपल्लवशयनीयं नकलयतिनजानाति कथंभूतं विहितः कृतः हुताशस्याग्नेः विकल्पः संशयोयत्रतं अति संतापजनकत्वात् तादृशं गणयतिमनुते ॥५॥

त्यजतिनपाणितलेनकपोलं ॥ बालशशि

नमिवसायमलोलं ॥ ६॥

त्यजतीति सापाणितलेन हस्ततलेन कपोलंगंडस्थलं नत्यजति शंकितत्वात् कमिव सायं संध्याकाले अलोलंनिश्चलं बालशशिनमिव द्वितीयाचंद्रमिव हस्तेनाच्छादितत्वात् संध्यासाम्यं ॥ ६॥

हरिरितिहरिरितिजपतिसकामं ॥ विरहविहितमरणेवनिकामं ॥ ७॥

हरिरिति सानिकाममतिशयेन सकामं साभिलाषं हरिहरिरितिजपति कथंभूतेवविरहेणत्वद्वियोगेनविहितं कृतंमरणं यस्याः सेव अन्येपिमरणे हरिरितिमंत्रंजपंति ॥ ७॥

श्रीजयदेवभणितमितिगीतं ॥ स्रवयतु केशवपदमुपनीतं ॥ ८॥

इतिश्रीगीतगोविंदेनवमः प्रबंधः

श्रीजयदेवोक्तं इति पूर्वगीतं केशवएव पदंविश्रांतिस्थानंयस्य तत्भक्तं स्रवयतु कीदृशंउपनीतंउपस्थितीकृतं ८

श्लो० ॥ सारोमांचतिसीत्करोतिविलपत्युत्कंपतेताम्यति ध्यायत्युद्भ्रमतिप्रमीलतिपतत्युद्यातिमूर्छत्यपि ॥ एतावत्यतनुज्वरे वरतनुर्जीवेन्नकिंतेरसा त्स्वर्वैद्यप्रतिमप्रसीदसियदित्यक्तोन्यथा हस्तकः ॥ १॥

अधुना सातवविरहेणा वस्थंप्राप्ता इतिसूचयन्सा

र्दूलविक्रीडितवृत्तेन श्लोकेनाह सारोमांचतीति हेस्ववैद्यप्र तिम अश्विनीकुमारतुल्य यदित्वंप्रसीदसि प्रसन्नोभवासि वरतनुः सुकुमारांगीसाराधा एतावति अतनुज्वरेसति तव रसात्किंनजीवेत् अपिजीवेदेव रसः श्रृंगारः औषधंच अ न्यथाप्रसंगताभावे हस्तकः हस्तालंभस्त्यक्तः ज्वरेसतिए ताव्याधयोभवंति तेतस्यांवर्तंतइत्याह साराधारोमांचति सरोमांचाभवतीत्यर्थः सीत्करोति सीत्कारशब्दंकरोतीत्यर्थः विलपति विलापंकरोति उत्कंपतेसकंपाभवति भ्राम्य- तिग्लानियुक्ताभवति ध्यायति चिंतयति उद्भ्रमतिउच्चैर्भ्रां ताभवति प्रमीलतिनेत्रनिमीलनंकरोति पततिशय्यारो गच्छति उद्यातिउच्चैर्गच्छति मूर्च्छांप्राप्नोति ज्वरिणः पुरु षस्यएतावद्भवतीति ॥१॥

श्लो॰ ॥स्मरातुरांदैवतवैद्यहृद्य त्वदंग संगामृतमात्रसाध्या ॥ विमुक्तबाधांकु रुषेनराधा मुपेंद्रवज्रादपिदारुणोसि २

उपेंद्रवज्रावृत्तेनाह स्मरातुरामिति हेदैवतवै- द्यवत् अश्विनीकुमारवत् हृद्यसुंदर हेउपेंद्र इंद्रानुज त्वंराधांविमुक्तबाधांत्यक्तपीडांनकुरुषे अतोवज्रात्कुलि शादपिदारुणोसि अधिकविषमोसि स्मरातुरांकामार्तां पुनः कीदृशीत्वदंगसंगस्तवशरीरसंबंधएवामृतंतन्मात्रे णसाध्याप्रतिकार्या ॥२॥

श्लोकः ॥ कंदर्पज्वरसंज्वराकुलतनोरा

श्चर्यमस्याश्चिरं चेतश्चंदनचंद्रमःकमलि नीचिंतासुसंताम्यति ॥ किंतुक्षांतिव शेनशीतलतनुंत्वामेवमेकंप्रियं ध्याय तीरहसिस्थिताकथमसौक्षीणाक्षणंप्रा णिति ॥ ३ ॥

एवंविधापि राधात्वच्चिंतनेनैवजीवतीत्याह कंदर्पेति हेकृष्ण अस्याराधायाश्चेतोमनः चिरंचिरकालं चंदनस्यचं द्रमसः कमलिन्याश्चचिंतासुस्मरणेष्वपिसंताम्यतिग्लानिं प्राप्नोति इदंमहदाश्चर्यं कीदृश्याः अस्याःकंदर्पज्वरेणता पेनयः संज्वरः पीडातेनाकुलाचंचलातनुः शरीरंयस्यास्त स्याः किंतुरहसिएकांतेस्थितासौराधात्वामेवएकं असाधा रणंप्रियंवल्लभंध्यायति क्षणंमुहूर्तंक्षांतिवशेन क्षांत्याउक्त तयात्वक्षांतिवशेनेतिपाठः तदाअस्मिन्क्षणेनायातः क्ष णांतरेआगमिष्यतीति अनुरागेणकथंप्राणितिजीवतीति कथमितिप्रश्नेकीदृशीक्षीणा कृशांगी ॥ ३ ॥

श्लोकः ॥ क्षणमपिविरहःपुरानसेहेन यननिमीलनखिन्नयाययाते ॥ श्वसिति कथमसौरसालशाखांचिरविरहेणविलो क्यपुष्पिताग्रां ॥ ४ ॥

पुनरपिउद्दीपनविभावेनाविरहोद्रेकंपुष्पिताग्रावृत्तेन। ह क्षणमिति हेकृष्ण ययाराधयातेवियोगः पुरापूर्वंक्ष णमपिनसेहेनसोढः कीदृश्याराधया नयननोर्नेत्रयोर्निमी

लनेननिरंतरदर्शनयातान्यक्षाणिमेषेणारविन्नयादुःखितया
असौराधाचिरविरहेण तवचिरवियोगेन कथंकेनप्रकारेण श्व
सितिजीवतीतिमज्ञायते किंकृत्वा वसंतेपुष्पितोमज्ञागोयस्या
स्तांरसालस्याम्रस्यशाखांविलोक्यदृष्ट्वा॥४॥

श्लोकः॥ वृष्टिव्याकुलगोकुलावनरसादु
धृत्यगोवर्धन बिभ्रद्वल्लवकंदरीभिरधि
कानंदाच्चिरंचुंबितः॥ कंदर्पेणतदर्पिता
धरतटीसिंदूरमुद्रांकितो बाहुर्गोपतनोस्त
नोतुभवतांश्रेयांसिकंसद्विषः॥५॥

इतिश्रीकविराजश्रीजयदेवकृतेगीतगो
विंदेमाहाकाव्येस्निग्धमाधवो
नामचतुर्थःसर्गः

इदानींकथोपक्रमस्यकर्त्ता कविर्भक्तानाशिषयति शा
र्दूलविक्रीडितवृत्तेन वृष्टीति गोपतनोर्गोपशरीरस्य कंस
द्विषः कृष्णस्यबाहुर्हस्तोभवतस्तवभक्तस्येत्यर्थः श्रेयांसि
कल्याणानि तनोतुविस्तारयतु कथंभूतः बाहुः वृष्ट्याज
लवर्षेण व्याकुलस्यदुःखितस्य गोकुलस्य गोपसमूहस्य
अवनंपालनंतत्ररसोनुरागोवीर्यंवातस्मात् गोवर्द्धनं पर्वतं
उद्धृत्य उत्पाट्यचिरंसप्ताहं बिभ्रत्धारयन् पुनःकीदृशः
वल्लवीभिः गोपीभिरधिकानंदं ददाति हर्षाच्चुंबितः कंदर्पे
णकामवशात्ताभिर्गोपीभिः अर्पिताःस्थापिताः अधरतस्य
एवसिंदूरचिन्हानि लोहितत्वात् तैरंकितश्चिन्हितालिप्यितः

अथपञ्चमसर्गः प्रारभ्यते

श्लोक॥ अहमिह निवसामियाहि राधामनु
नयमद्वचनेनचानयेथाः॥ इतिमधुरिपुणा
सखीनियुक्तास्वय मिदमेत्यपुनर्जगादरा
धाम्॥१॥

इदानीं कृष्णप्रेरितासखीराधामाह अहमिति इति मधुरिपुणाकृष्णेन नियुक्ताप्रेरितासखीस्वयमेत्य इदंवक्ष्यमाणंराधांपुनर्जगादऊचे इतीतिकिं हेसखि अहमिहकुंजे निवसामिस्थितोस्मि त्वंराधांप्रतियाहि अनुनयंच सांत्वय मद्वचनेनमद्वच सा राधामानयेथाश्च आनयस्व- इति॥१॥

अथदशमप्रबंधो वराडिरागेणरूपक तालेगीयते

वहतिमलयसमीरेमदनमुपनिधाय॥स्फु
टतिकुसुमनिकरेविरहिहृदयदलनाय॥१
तवविरहेवनमालिसखिसीदति॥ध्रु०॥

यत्सखीजगादतदेवगीतेनाह वहतीति गीतस्यास्य वराडीरागः रूपकतालः तल्लक्षणं विनादयंती दयितंसुकेशी स्फकंकणा चामरचालनेन कर्णेदधानास्फरगुच्छं वरांगनेयं कथितावराडी अभिसारिकानायिकावर्णनीया रसिकरसत्वे संस्कृताप्राकृतामिश्रा ततोपभ्रंशभाषणात

नः प्रियतरावेश्यासर्वतश्चाभिसारिका इति तस्याः लक्ष णंभरतेनोक्तं लज्जांहित्वासमाकृष्ययौवनेनमदेनवा अभि सारयतेकांतंकीर्तितासाभिसारिका गीतार्थस्तु हेसखि राधे त्वद्विरहेत्वद्वियोगेवनमालीकृष्णः सीदति दुःखितोभ वति कस्मिन्सति मदनं कामं उपनिधाय साहाय्यंकृत्वा म लयसमीरे दक्षिणसंबंधिनि पवनेवहतिसति विरहिणां वियोगिनां हृदयदलनाय आस्फोटनाय कुसुमानां निकरे समूहेस्फुटति सति विकसतिसति ॥१॥

दहतिशिशिरमयूखेमरणमनुकरोति॥ पततिमदनविशिखेविलपतिविकलतरो ति ॥२॥

दहतीति हेराधे सः कृष्णः शिशिरमयूखेहिमकरेद हतिसतिसंतापं जनयतिसति मरणमनुकरोति दशम्यव स्थाजनितपीडामनुभवतिस्वत्प्राप्त्याशयाकष्टेन जीवनंधा रयतीत्यर्थः मदनविशिखेकामबाणेपततिसति अतिवि लपति अतिशयेनविलापंकरोति कीदृशः कृष्णः विकल तरः विह्वलतरः ॥२॥

ध्वनतिमधुपसमूहेश्रवणमपिदधाति ॥म नसिवलितविरहेनिशिनिशिरुजमुपयाति॥३

ध्वनतीति मधुपिबंतितेमधुपाभ्रमरास्तेषांसमूहेध्वन तिशब्दंकुर्वतिसतिश्रवणौकर्णौ अपिदधाति अंगुल्यग्रेणा- च्छादयति मनसि वलितविरहेसति निशिनिशि प्रतिरात्रिं

रुजंपीडांउपयाति प्राप्नोति ॥ ३॥

वसतिविपिनविताने त्यजति ललितमपिधाम॥
लुठति धरणिशयने बहुविलपति तवनाम॥४

वसतीति साविपिनविताने अरण्यविस्तारे वसति तिष्ठ ति ललितमपि धामसुंदरमपिगृहंत्यजति पृथ्वीशय्यायांलु ठति विचेष्टते तवनाम बहु अनेकवारं विलपति अथवाधाम शरीरं अखिललावण्यास्पदं श्रीविग्रहमपित्वां विनानाशास्त इत्यर्थः॥ ४॥

भणतिकविजयदेवहरिविरहविलसितेन॥
मनसिरभसविभवे हरिरुदयतुसुकृतेन॥५

इतिश्रीगीतगोविंदेदशमप्रबंधः

भणतीति कविजयदेवइतिहरेर्विरहस्य वियोगस्य वि- लसितेन विलासितेन भणति सति वियोगचेष्टितं कथय तिसतीत्यर्थः हरिः कृष्णः मनसिजयदेवसंबंधिचित्ते सु कृतेन पूर्वेणार्जितपुण्येन हेतुनाउदयतुउदयंप्राप्नोतु की दृशेमनसि रभसस्यहर्षस्यविभव आधिक्यं यस्मिन् ॥५॥

श्लोकः॥ पूर्वं यत्र समं त्वयारतिपतेरासा दिताः सिद्धयस्तस्मिन्नेवनिकुंजमन्मथम हातीर्थेपुनर्माधवः॥ ध्यायंस्त्वामनिशंज पन्नपितवैवालापमंत्रावलीं भूयस्त्वत्कुच कुंभनिर्भरपरीरंभामृतंवांछति॥१॥

किंचत्वत्प्राप्त्यर्थंतपः करोतीत्याह पूर्वमिति श्रीकृ

ष्णाः तस्मिन्नेवनिकुंजमन्मथमहातीर्थे निकुंजमेव लतागृह मेव मन्मथमहातीर्थं कामतीर्थंतत्र पुनस्त्वां अनिशंवारं वारं ध्यायन् तवैवआलापमेव संभाषणमेव मंत्रावलीं मंत्रा क्षरसमूहं जपन्निव भूयः पुनरपि त्वत्कुचकुंभनिर्भरपरीरं भामृत त्वदीयस्तनकलशागाढालिंगनं पीयूषमिवामृतमिव वांछति तस्मिन्कस्मिन् यत्रमहातीर्थे त्वयासमं पूर्वं रति पतेः कामस्यसिद्धयोमनोरथाः आसादिताः प्राप्ताः यथा सिद्धिप्राप्त्यनंतरं मोक्षामृतं प्राप्यते तद्वत् ॥१॥

अथएकादशप्रबंधः केदाररागेणएक तालीतालेगीयते.

रतिसुखसारेगतमभिसारे मदनमनोहर वेष ॥ नकुरुनितंबिनिगमनविलंबनमनु सरतंहृदयेशं ॥१॥ धीरसमीरेयमुना तीरे वसतिवनेवनमाली ॥ गोपीपीनपयो धरमर्दन चंचलकरयुग शाली ॥ ध्रु०

इति पदार्थपाठः कुत्रचिदस्ति गोपीपीनपयोधरयो र्मर्दनेन चंचलेनकरयुगेनाढ्यः आढ्यः शालीतिविरव्या तः हेराधे यमुनातीरेवने यमुनातीरविषयेवने अथवावेत स वने वनमालीश्रीकृष्णोवसति किंभूतेवने धीरः मंदः समीरः वायुर्यत्र एतेनवायोरप्येविध्यमुक्तं तस्याम्यस्या लोकं ठा जनिता इतिध्रुवपदम् हेनितंबिनि त्वंतंवनमा लिनमनुसरअनुगच्छ गमनविलंबनं अभिसाराय काला

तिकमंनकुरु माकृथाः हेनितंबिनि बृहन्नितंबत्वाच्चलितुं नशक्नोतीति तात्पर्यं किंभूतं रतिसंभोगसुखसारमुक्रूसंयंत्र अभिसरंतिपतंतेऽस्मिन्नित्यभिसारः संकेतस्थानंत त्रगतंमासे पुनः कथंभूतं तवमनस्तदधीनमित्यर्थः अथ वात्हृदयेवर्तमानं तंवनमालिनमितियोज्यं किंभूतं आयुर्वेद मिति केवलसुखहेतुत्वात् शुभेव अपित्व॥१॥

नामसमेतंकृतसंकेतं वादयतेमृदुवेणुं॥
बहुमनुतेतनुतेतनुसंगतपवनचलितमपिरेणुं॥२॥

नामसमेतमिति हेराधेहरिः मृदुवेणुं कोमलवंशंवादयते मृद्विति क्रियाविशेषणं कथंयथास्यात् तवनामाक्षरसंयुक्तं कृतसंकेतं यथा स्यात्तथा च पुनः ततोवनेतनुसंगतपवनचलितं रेणुं अपिबहुमनुते कथंयथाभवति अतनु अनल्पं यथाभवति॥२॥

पततिपतत्रेविचलतिपत्रेशंकितभवदुपयानं॥ रचयतिशयनंसचकितनयनंपश्यतितवपंथानं॥३॥

पततीति हेराधेकृष्णः शयनंरचयति तवपंथानं पश्यति कथंभवति सचकितनयनं यथास्यात् किंभूतं तवपंथानं शंकितभवत्याउपयानं आगमोयत्रतं पुंवद्भावः भवती शब्दस्यपुंस्त्वं कसति पतत्रे पक्षिणि पतति वृक्षांतरंगच्छति सति पुनः कसति वृक्षपत्रे चलति सति॥३॥

मुखरमधीरंत्यजमंजीरंरिपुमिवकेलिसुलोलं॥ चलसखिकुंजंसतिमिरपुंजंशीलयनीलनिचोलं॥४॥

हेसखिराधे त्वंकुंजंचल अभिसारानुरूपां सामग्रीं शिक्षयति मंजीरंनूपुरंत्यज किंभूतंनूपुरं अधीरंअतंअतएवमुखरं वाचालं अभिसारोचितं नजानाति अथवा साध्वेतन्मंजीरस्य मुखरस्ययतोनिमित्तवन्नैमित्तिकं कुतः मंजीरे अधुनाविस्फुरत्से पुनःकिंभूतं केलौक्रीडायां सुलोलं अतएवरिपुमिव अपिचनीलनिचोलंनीलंकृष्णं वस्त्रंशीलय परिधेहि किं विशिष्टंकुंजं तिमिरपुंजेनसहितं अथवासतिमिरं पुंजंयथास्यात्तथा चलउद्योतहीनाभिसारोयुक्तः॥४॥

उरसिमुरारेरुपहितहारेघनइवतरलबलाके॥ तडिदिवपीतेरतिविपरीतेराजसिसुकृतविपाके॥५॥

हेपीते पीतवर्णेगौरि त्वंमुरारेः उरसिसुकृतविपाकेउदारपरिणामे राजसि राजशिष्यसि वर्तमानसामीप्येलट् किंविशिष्टेउरसि उपहितहारे आरोपितहारे कथंकस्मिन्निव तरलबलाके घनइवमेघइव चंचलपक्षिविशेषे केवतडिदिव कदा रतिविपरीते पुरुषायितस्मरतसमयेउपहितहारउरः तरलबलाकाघनेनोपमीयते सापितातडिता तस्या पुरुषायितत्वेचलत्वं॥५॥

विगलितवसनंपरिहृतरशनंघटयजघनम

पिधानं॥ किसलयशयने पंकजनयने निधि
मिव हर्षनिदानं॥ ६॥

हे राधे किसलयशयनीये वर्तमाने पंकजनयने पुंडरीका
क्षे जघनं घटय रोपय किंभूतं विगलितवसनं स्वयमेव ततए
व परित्यक्तरशनं त्यक्तमेखलं अतएव वसनाभावात् अपिधा
नं पिधानरहितं अतएव निधिनोपमीयते किमिव निधिमि
व किंभूतं निधिं हर्षनिदानं हर्षस्य आदिकारणं॥ ६॥

हरिरभिमानी रजनिरिदानीमियमपि याति
विरामं॥ कुरु मम वचनं सत्वररचनं पूरय
मधुरिपुकामं॥ ७॥

अपिच हरिरिति हे राधे सत्वररचनं शीघ्रसाधनं यथा
स्यात्तथा मम वचनं कुरु किंतन्मम वचनं मधुरिपुकामं शीघ्र
णवांछां पूरय पूरय ते किं स्यात् हरिरभिमानीत तोलाघवं न स
हते पश्चात्वारयिष्यति पश्चादपि करिष्यसे चेत् इदानीमेव कु
रु अन्यथेयं रात्रिरपि विरामं अवसानं यातिगच्छति अभिसा
रिक कालोपि यास्यति वर्तमानं यथा स्यात्॥ ७॥

श्रीजयदेवे कृतहरिसेवे भणति परमरम
णीयं॥ प्रमुदितहृदयं हरिमतिसदयं नम
त सुकृतकमनीयं॥ ८॥ इति श्रीगीतगोविं
दे महाकाव्ये एकादशः प्रबंधः॥

हे वैष्णवाः हरिं नमत नमस्कुरुत किंभूतं हरिं जयदे
वे सदयं किंविशिष्टे जयदेवे परमरमणीयं इदं पूर्वोक्तं भ

पति कथंवप्रमुदितहृदयं किंभूते कृतहरिसेवे किंभूतं हरिं सुकृतमिवकमनीयं सुकृतेनवाकमनीयं अभिलसणीयम् ॥८॥

श्लोकः॥ विकिरतिमुहुः श्वासान्नाशांपुरो मुहुरीक्षते प्रविशतिमुहुः कुंजंगुंजन्मुहु र्बहुताम्यति ॥ रचयतिमुहुः शय्यांपर्याकुलंमुहुरीक्षते मदनकदनक्लांतः कांतेप्रियस्तववर्तते ॥१॥

इदानीं सत्वरगमनाय प्रोत्साहयति हेकांते तवप्रियः मदेनेनकदनेन कदनंग्लानिः क्लांतः प्राप्तोवर्तते तथाविधः सन् किंकरोतीत्याह त्वंनागतैवेति कृत्वामुहुः श्वासान्विकिरतिनिश्वासधाराः मुंचतिनागतैवेतिकृत्वापुरः अग्रेमुहुर्वारंवारंआशाः दिशःईक्षते विलोकयति व्याकुलतया कस्याः दिशआगमिष्यतीति सर्वादिशः एककालमवलोकयति तत्राप्यदृष्ट्वा बहिर्निर्यातस्तत्रैव निन्हुतइवनिषत्तीति मुहुर्मुहुः प्रविशति वारंवारंकुतोनागता किंकेनापिनिवारिता उतकुतोभयाद्वा इत्यादितस्यागमनहेतुं विमृश्यमुहुर्वारंवारं अव्यक्तशब्दं ताम्यतितापयति अथवावृथेदंविमर्शनं आगमिष्यत्येवेतिमुहुः शय्यांरचयति तथाप्यदृष्ट्वापर्याकुलंयथास्यात्तथा समानुरागादधुनागमिष्यत्येवेति मुहुरीक्षते इतिकदनशब्दस्यतात्पर्यं हरिणीच्छंदः दीपकालंकारः॥१॥

श्लोकः॥ त्वद्वाक्येनसमंसमग्रमधुनाति

ग्मांशुरस्तंगतो गोविंदस्य मनोरथेनत्वसमं प्राप्तंतमः सांद्रतां॥ कोकानांकरुणस्वनेनस दृशीदीर्घामदभ्यर्थनातन्मुग्धेविफलंविलंबन मसौरम्योभिसारक्षणः॥२॥

इदानीं सांप्रतमेवगंतुं सांप्रतमिति हेतुमाह त्वद्वाक्येनेति हेमुग्धेसुंदेत्वद्वाक्येनासूयामानसहितेनसमं सह समयं सामग्र्येणाधुनाइदानीं तिग्मांशुः सूर्यः अस्तंगतः असूयामानसहितः सूर्योस्तंगतः अभिसरणकालोयमित्यर्थः गोविंदस्य कृष्णस्य मनोरथेन इदानीं राधा आगमिष्यतीति वांछयासमंसहतमः अंधकारः सांद्रतां निबिडतां प्राप्तंतमसिअभिसरणं योग्यमित्यर्थः दीर्घामदभ्यर्थनाशीघ्रंगम्यतामिति मदीयाभ्यर्थना कोकानांचक्रवाकानां करुणस्वनेन विरहदयाशब्देनसदृशी यथाकोकानांकरुणस्वनोनानाप्रकारः श्रूयते तथामदीयाः काकूक्तयः संप्रतिकार्येभवंतीत्यर्थः तस्माद्धेतोर्विलंबनंविफलं असौ अभिसारक्षणोअभिसारकालो रम्योगमनयोग्य इत्यर्थः सहोक्तिरलंकारः शार्दूलविक्रीडितवृत्तं॥२॥

श्लो०॥ आश्लेषादनुचुंबनादनुनखोल्लेखादनुस्वांतजात्प्रोद्बोधादनुसंभ्रमादनुरतारंभादनुप्रीतयोः॥ अन्यार्थंगतयोर्भ्रमान्मिलितयोः संभाषणैर्जानतोर्दंपत्योर्निशिकोनकोनतमसिव्रीडाविमिश्रोरसः॥३॥

अभिसारे रसाधिक्यं भवतीत्याह आश्लेषादिति दंपत्योर्जायापत्योस्तमसि अंधकारे व्रीडा विमिश्रो लज्जायुक्तः कः रसो न भवेत् इति न अपितु सव्रीडः सर्व एव शृंगारादिः रसो भवत्येव कथंभूतयो र्दंपत्योः अन्यार्थे परस्त्री परपुरुषार्थे गतयोः संकेतस्थानं प्राप्तयोः पुनः कीदृशयोः भ्रमाद्भ्रांतेः गाढांधकारे रसात् मिलितयोः संगतयोः अनंतरं आश्लेषादि विशेषणानि योजनीयानि तत्र एवं संभोगक्रमः प्रथमं आलिंगनं ततश्चुंबनं ततो नखक्षतं ततः कामोद्बोधः ततः संत्वरः ततो मैथुनं ततः प्रीतिस्ततो भावनमिति क्रममाह आश्लेषादिति आश्लेषादालिंगनादनु पश्चान्नखोल्लेखादनु नखक्षतात् पश्चात्स्वांतजात्प्रोद्बोधादनु कामबोधात्पश्चात्संभ्रमादनु वेगात् पश्चाद्रतारंभात् अनुसरतो द्योगात् पश्चात्प्रीतयोस्तयोः पुनः कीदृशयोः संभाषणे रालापे जनितोः नममेयं भार्या नायं मम पतिरिति ३

श्लो० ॥ सभयचकितं विन्यस्यंती दृशं तिमिरे पथि प्रतितरु मुहुः स्थित्वा मंदपदानि वितन्वती ॥ कथमपि रहः प्राप्ता मंगैरनंगतरंगिभिः सुमुखि सुभगः पश्यन् सत्वामुपैतु कृतार्थताम् ॥ ४ ॥

इदानीं त्वत्ताभात्कृष्णः कृतार्थो भवतीत्याह सभयेति हे सुमुखि सुवदने राधे सुभगः सौभाग्यवान् सकृष्णस्त्वां पश्यन् कृतार्थतां उपैतु प्राप्नोतु कीदृशीं त्वां तिमिरे अं

धकारसहिते पथिमार्गेसभयचकितंभयविस्मयाभ्यांस
हितंयथास्यात्तथा दृशंनेत्रंविन्यस्यंतींनिरीक्षयंतीं निबि
डांधकारदर्शनाद्रूपं अंधकारेनिःशंकागमनात्ताद्विस्मयः
पुनःकीदृशीं प्रतितरुपतिवृक्षेमुहुःपुनःपुनःस्थित्वा
मंदंशनैर्मंदानिचरणव्यापारान्धितन्वतीमेप्रियतमोअत्रै
वागमिष्यतीति मंदंचरणारविंदंधारयंतीतिभावः पुनः
कीदृशीं कथमपि अंधकारस्यनिबिडत्वात्केनापिप्रकारे
णरहः एकांतस्थलंप्राप्तां पुनःकीदृशीं कामस्ययस्तरंगः
पुनरुद्बोधःसयेषुतेकामोल्लासाःयैर्वातरंगैरूरुपादादिभि
रुपलक्षितांउपलक्षणेतृतीया ॥४॥

श्लो०॥ राधामुग्धमुखारविंदमधुपस्त्रैलो
क्यमौलिस्थली नेपथ्योचितनीलरत्नमव
नीभारावतारक्षमः॥ स्वच्छंदंव्रजसुंदरीज
नमनस्तोषप्रदोषश्चिरं कंसध्वंसनधूमके
तुरवतु त्वांदेवकीनंदनः ॥५॥

इतिश्रीकविराजश्रीजयदेवकृतं गीतगोविं
दमहाकाव्ये अभिसारिकावर्णनेसाकांक्ष
पुंडरीकाक्षोनामपंचमःसर्गः ५

इदानींकविः सर्गांतेभक्तजनमाशिषयति राधेति देव
कीनंदनः श्रीकृष्णः त्वांभक्तंचिरंअवतुदुरितात्रक्षतु कीदृ
शः कृष्णः राधायामुग्धंसुंदरंयन्मुखारविंदं मुखकमलं
तस्य मधुपोभ्रमरइवलोलत्वान्मुखपालकर्तृत्वाच्च पुनःकी

दृशः अवन्याभारावतारे क्षमः समर्थः अवनिभारावतारां तकः इति वा पाठः तदावन्याभुवः भाररूपोऽवतारो येषामसु राणां तेषामंतको नाशकः पुनः कीदृशः स्वच्छंदानां स्वाधीनानां व्रजसुंदरीजनानां गोपीनां मनस्तोषे चित्तप्रतीतो प्रदोषे रात्रिमुखमिव रात्रिमुखे हि नार्यस्तुष्यंति पुनः कीदृशः त्रैलोक्यस्य लोकत्रयस्य या मौलिस्थली वृंदाटवी तस्या नेपथ्योचितमलंकारयोग्यं नीलरत्नमिवास्थितः पुनः कीदृशः कंसस्य मातुलस्य मारणे धूमकेतुरिव स्थितः राधागमने साकांक्ष इत्यर्थः ॥५॥ इति गीत० टी० पंचमः सर्गः ॥५

अथ षष्ठः सर्गः प्रारभ्यते ॥

श्लो० ॥ अथ तां गंतुमशक्तां चिरमनुरक्तां लतागृहे दृष्ट्वा ॥ तच्चरितं गोविंदे मनसिजमंदे सखी प्राह ॥१॥

अथेति अथशब्दो मंगलार्थः अनंतरं वा सखी गोविंदे कृष्णांतिकमागत्येत्यर्थः तच्चरितं राधाचरितं प्राह उक्तवती किं कृत्वा लतागृहे तां राधां आगंतुं अशक्तां दृष्ट्वा कीदृशीं राधां चिरं अनुरक्तां अनुरागिणीं कीदृशे गोविंदे मनसिजेन कामेन मंदे पीडिते ॥१॥

अथ द्वादशप्रबंधो गुणकरीरागेण रूपकतालेन गीयते ॥

पश्यति दिशि दिशि रहसि भवंतं ॥ त्वदधरमधुरमधूनि पिबंतं ॥१॥ नाथ हरे जय ना

थहरे सीदति राधावासगृहे॥ ध्रु०॥

गुणकरीरागः रागलक्षणं रतोत्सुका कांतपथप्रतीक्षा मालापयंती मृदुपुष्पतल्पे इतस्ततः प्रेरितदृष्टिरार्ता श्यामा तनुर्गौणकरी प्रदिष्टा इति अस्मिन्वासकशय्यावर्णने वासवेश्मनि कल्पिततल्पेवा समागमविधिं विदधाना पश्यति प्रियसमागमशय्यां पश्यति स्मप्रियवासकशय्या इति पश्यतीति हेनाथ हेहरे द्विरुक्तिः साराधा तववासगृहे सांकेतिक निकुंजमंदिरे तव त्वत्तः हेतोः सीदति अवसन्ना भवति कथमित्यत आह साराधा एकांते स्थिता सती दिशिदिशि भवंतं त्वां पश्यति अवलोकयति कीदृशं त्वां अधरवत् नायकाधरामृतवत् मधुराणि मधूनि माध्वीकानि पिबंतं १

त्वदभिसरणरभसेन वलंती॥ पतति पदानि कियंति चलंती॥ २॥

नन्वेवं चेत्सा र्हि किमिति नागतेत्यत आह त्वदभिसरणेन त्वाभिसारे रभस उत्साहस्तेन वलंती अभिमुखीभवंती कियंति कति पयानि पदानि चलंती सती पतति त्वद्विरहमूर्छया गंतुं असमर्थेत्यर्थः॥ २॥

विहितविशदबिसकिसलयवलया॥ जीवति परमिह तव रतिकलया॥ ३॥

हा कष्टमेवं चेद्दशा कातर्हि कथं जीवतीत्यत आह हे कृष्ण साराधा तव रतेः कलया स्मरतलेशचिंतनेन इह समये परं केवलं जीवति जीवनहेतुरन्यो नास्तीत्यर्थः कीदृशी विहिताः

कृताः विशदाः शुभ्रा बिसकिसलयाः मृणालांकुरा एव वलयाः कंकणानि यस्याः सा ॥३॥

मुहुरवलोकितमंडनलीला ॥ मधुरिपुरहमिति भावनशीला ॥४॥

मुहुरिति साकीदृशी पूर्वपदेनान्वयः पुनः पुनः अवलोकिता मंडनलीला अलंकारविलासो यया तेन विना निरर्थकमिति पुनः पुनः वदति इति पुनः कीदृशी अहं मधुरिपुः कृष्ण इति भावनं ध्यानमेव शीलं स्वभावः स इत्थं यस्याः सा ॥४॥

त्वरितमुपैति न कथमभिसारं ॥ हरिरिति वदति सखी मनुवारं ॥५॥

तदेवाह त्वरितमिति हरिः मच्चित्तापहारी अभिसारसंकेतस्थलं त्वरितं शीघ्रं कथं कस्माद्धेतोः नोपैति नागच्छतीत्यनुवारं सखी वदति ॥५॥

श्लिष्यति चुंबति जलधरकल्पं ॥ हरिरुपगत इति तिमिरमनल्पं ॥६॥

अपि चाश्लिष्यतीति सा हरिरुपगतः प्राप्त इति बुद्ध्याऽनल्पं बहुतिमिरमंधकारं श्लिष्यति आलिंगति चुंबति च कीदृशं तिमिरं जलधरकल्पं मेघसदृशं स्निग्धत्वान्नीलत्वाच्च कृष्णसाम्यं तिमिरस्य ॥६॥

भवति विलंबिनि विगलितलज्जा ॥ विलपति रोदिति वासकसज्जा ॥७॥

भवतीति भवति त्वयि विलंबिनि विलंबं कुर्वति सति वि

गलितलज्जा गतलज्जा सा राधा विलपति हे निःकृप कथमे तावदोदास्यं मयि त्वयाचरितमिति विलापं करोति रोदिति अश्रूणि मुंचति कीदृशी वासकसज्जा विहितसंविधानेत्यर्थः लक्षणंतूक्तमेव ॥७॥

श्रीजयदेवकवेरिदमुदितं ॥ रसिकजनंत नुतामतिमुदितं॥८॥ इतिश्रीगीतगोविंदे द्वादशप्रबंधः॥

श्रीजयदेवेति श्रीजयदेवकवेः उदितं भाषितं इदं गीतं रसिकजनं शृंगाररसभावनाभावितांतःकरणं अतिमुदितं अतिशयेन हर्षयुक्तं तनुतां करोत्वित्यर्थः॥८॥

श्लो०॥ विपुलपुलकपालिः स्फीतसीत्कारमंतर्जनितजडिमकाकुव्याकुलंव्याहरंती ॥ तवकितवविधायामंदकंदर्पचिंतां रसजलनिधिमग्नाध्यानलग्नामृगाक्षी॥१॥

इदानींतस्याः त्वदेकपरत्वमाह हे कितवधूर्त सा मृगाक्षी मृगशावलोचना तवरसजलनिधिमग्ना त्वच्छृंगाररससागरे निमग्नालीना बभूवेत्यध्याहारः किंकृत्वा अमंदकंदर्पस्य महतः कामस्य चिंतां स्मरणं विधाय दृढं कृत्वा ध्यानेन तवैवचित्ते लग्ना तत्परा रससागरमग्नाया श्चेष्टितमाह विपुलामहती पुलकावली रोमांचपंक्तिर्यस्याः सा ध्यानकल्पितनवकरस्पर्शेन रोमांचितेत्यर्थः किंकुर्वती त्वद्दृत्तं दंतक्षतादिकं परिकल्प्य स्फीतसीत्कारं प्रवृद्धसीत्कारं यथास्यात्तथा

था व्याहरंती अंतरभ्यंतरेजनितउत्पादितः जडिमाजडत्वंय स्यां क्रियायां नद्यथातथा काकुनाध्वनिना ध्वनिविकार विशे षेणाकुलंयथास्यात्तथा व्याहरंती ध्यानेन नवस्तनालंभनाध रपाननीवीबंधनोन्मोचनासक्तं परिकल्प्य मुंच मुंचनन मामामि तिनिषेधवाक्यंवदंतीत्यर्थः ॥१॥

श्लोक ॥ अंगेष्वाभरणंकरोतिबहुशः पत्रेपि
संचारिणि प्राप्तंत्वा परिशंकतेवितनुतेश
य्यांचिरध्यायति ॥ इत्याकल्पविकल्पतल्पर
चनासंकल्पलीलाशतव्यासक्तापिविनात्वया
वरतनुर्नैषानिशांनेष्यति ॥२॥

अंगेष्विति एषावरतनुः सुंदरांगी एषेतिबुद्ध्याप्रत्यक्षी कृत्यवदति राधा अंगेषु हस्तादिषुआभरणं अलंकारंबहु शः करोति अनेनाकल्पः कथितः पत्रेपि वृक्षपत्रेपि संचारि णिपक्ष्यादिनाचलतिसति त्वामागतंपरिशंकते सर्वतोवित र्कयतीत्यर्थः अनेनविकल्पः अपिचत्वामागतं ज्ञात्वातवकाम केलिनिमित्तं शय्यांवितनुतेकुरुते अनेनतल्पः कथितः चिरं बहुकालंध्यायति त्वदागमनोपायं चिंतयति रचनेयंदर्शिता कृष्णसंगमेमया इदमिदं कर्तव्य मित्यनेन संकल्पलीलाशत मुक्तं इतिपूर्वोक्तप्रकारेण आकल्पोभूषणं विकल्पस्तर्कः त ल्परचनाशय्यारचना संकल्पलीलाशतं एतेषुव्यासक्तापित्वया विनात्वामृतेनिशांरात्रिंननेष्यति प्रभातं प्रापयितुंसमर्था नभविष्यतीत्यर्थः ॥२॥

श्लोकः॥ किंविश्राम्यसि कृष्णभोगिभवने
भांडीरभूमीरुहि भ्रातर्यासि नदृष्टिगोचर
मितःसानंदनंदास्पदं॥ राधायावचनंतदध्व
गमुखान्नंदांतिके गोपतो गोविंदस्य जयंति
सायमतिथिप्राशस्त्यगर्भागिरः॥३॥

इतिश्रीकविराजश्रीजयदेवकृतगीतगोविं
देमहाकाव्येवासकसज्जावर्णनेसोत्कंठ
वैकुंठोनामषष्ठःसर्गः॥६॥

अधुनाकविः सर्गांतेभक्तानाशिषयति किमिति गो
विंदस्य कृष्णस्य गिरः वाचः जयंतिसर्वोत्कर्षेण वर्त्तते की
दृशाःगिरः सायंकालेतिथीनांप्राशस्त्यं प्रशंसातद्गर्भेआश
येयासांताः व्याजोक्तिनामालंकारः कथंभूतस्यगोविंद
स्य नंदांतिकेनंदगोपपार्श्वे तत्ताहकसंकेतसूचनारूपंअ
ध्वगमुखाभिःस्खलराधायाः वचनंगोपतःगोपनंकुर्वतः श्रुण्व
तः किंतद्वचनंतत्राह हेभ्रातः पथिकइतिकोमलामंत्रणे
भांडीरभूमिरुहि भांडीरनाम्निवटवृक्षे किंविश्राम्यसि वि
श्रामंमाकुर्याः तत्रहेतुः कृष्णश्वासौभोगीचतस्यभवनेका
लसर्पवासे पक्षे कृष्णस्यभोगिनः शृंगारिणोविलासगृहे
पक्षद्वयेनेहस्थेयमितिश्लिष्टपदोपादानं श्लेषालंकारस्त
त्र तर्हिक्कयामीत्यत आह इतोवदात् दृष्टिगोचरं प्रत्य
क्षीक्रियमाणंतत्सानंदं सकल सिमत्तनंदस्यास्पदं नंदगोप
गृहंनयासि अपितु याहीतिराधावचनंअध्वगमुखान्नंदांति

केश्शृण्वतो गोविंदस्य गिरो जयंतीत्यर्थः सोत्कंवउत्कंठासहितो वैकुंठःश्रीकृष्णोयत्र॥ ३॥

अथसप्तमसर्गः प्रारभ्यते

श्लो०॥ अत्रांतरेचकुलटाकुलवर्त्मपातसं
जातपातकइवस्फुटलांछनश्रीः॥ वृंदाव-
नांतरमदीपयदंशुजालैर्दिक्सुंदरीवदन
चंदनबिंदुरिंदुः॥ १॥

अधुनाचंद्रोदयव्याजेनराधायाविरहव्यथाधिक्यंवर्णयन्नाह अत्रांतरइति अत्रांतरेस्मिन्नवसरे इंदुश्चंद्रः अंशुजालैः किरणसमूहैः वृंदावनांतरं वृंदावनमध्यप्रदेशं अदीपयत् प्रकाशितवान् विप्रलंभहेतुत्वं दर्शयन् विशिनष्टि कीदृशः इंदुः स्फुटाव्यक्तालांछनश्रीः कलंकशोभायस्य कथंभूतइव कुलटानां कृष्णाभिसारिकाणां कुलस्यसमूहस्यवर्त्मपातः संकेतमार्गप्रतिरोधकस्तेनसंजातमुत्पन्नंपातकंयस्यतादृशइव कृपानकृतः कलंकोव्यक्तोभवतीति चंद्रस्योद्दीपनत्वमाह पुनःकीदृशः दिशएवसुंदर्यः नायिकास्तासांवदनस्यमुखस्यचंदनबिंदुः श्रीखंडतिलकइवस्त्रीतिलकोवर्तुलोभवति असतीनांचंद्रोदयेगमनाभावाद्धर्मपातः अत्ररूपकोत्प्रेक्षेलंकृती ॥१॥

श्लो०॥ प्रसरतिशशधरबिंबेविहितविलं
बेचमाधवेमधुरा॥ विरचितविविधविलापं
सापरितापंचकारोच्चैः॥ २॥

अत्रविप्रलब्धानायिकावर्ण्यते तल्लक्षणंभरते प्रविल सदनुरागादूतिकांप्रेक्ष्य पूर्वंसरागसमपिधायकापिसंकेतभू यो नमिलतिखलुयस्याः वल्लभोदैवयोगात् प्रवदति भरतस्तां नायिकांविप्रलब्धांप्रसरतीति साराधाविरचितः कृतः विवि धोनानाप्रकारोविलापोयत्र उच्चैर्महांतंपरितापंदुःखंचकारकृ तवती कसति शशधरबिंबेचंद्रमंडलेप्रसरतिउद्गच्छति सति माधवेकृष्णे विहितविलंबेसंकेतागमनंप्रतिकालातिक्रम कृतवतिसति ॥२॥

अथत्रयोदशप्रबंधो गौडमालवरागेणप्रति मठतालेगीयते

कथितसमयेपिहरिरहहनययौवनं ॥ ममवि फलमेतदनुरूपमपियौवनं ॥१॥ यामिहेक मिहशरणंसखीजनवचनवंचिता ॥ ध्रु० ॥

विलापमेवगीतेनाह कथितेति गीतस्यास्यमालवगौडी रागः प्रतिमंठस्तुतालः हे इतिस्वचित्तसंबोधनं इहनिर्जने वनेसख्याएवजनस्यवचनैः कृष्णागमनवेदकैर्वंचिताप्रता रिता अहंकंपुरुषंशरणं रक्षितारं यामिगमिष्यामि किंतु कमेवजलमेवशरणंयामि जलप्रवेशोवरमित्यर्थः किमित्य तआह अहहेत्याश्चर्येहरिः कृष्णः कथितसमयेपिउक्तका लेपि वनंवृंदावनंसंकेतस्थानंनययौनजगाम कृष्णोपभो गाभावात् ममैतदनुरूपं यो ग्यमपियौवनं विफलंनिरर्थ कम्॥१॥

यदनुगमनायनिशिगहनमपिशीलितं ॥ ते
नममहृदयमिदमसमशरकीलितं ॥ २॥
यदिति मयायस्यकृष्णस्यानुगमनार्थस्फुरतेन संतोष
यितुंनिशिरात्रौ गहनमपिनिर्जनवन मपि शीलितंसेवितं
तेनकृष्णेन हेतुना ममइदंहृदयंमदीयंचित्तं असमशरेण
कामेनकीलितंविद्धं कृष्णागमनाभावात् ॥ २॥

ममरणमेववरमतिवितथकेतना ॥ किमि
तिविषहामिविरहानलमचेतना ॥ ३॥
ममेति इहवनेअचेतनाज्ञानशून्याविरहानलंवियो
गाग्निंकिमितिविषहामिंसहामि तस्मान्ममरणं एववरं
श्रेष्ठं मरणेविरहानलाभावात् कीदृशीअहं अतिवित
थं अतिव्यर्थमेवशरीरंयस्याः कृष्णेनशरीरसौंदर्योपभो
गाभावात् ॥ ३॥

मामहहविधुरयतिमधुरमधुयामिनी ॥
कापिहरिमनुभवतिकृतसुकृतकामिनी ॥ ४॥
मामिति अहहेतिदुःखानुकारे मधुरमधुयामिनी
मनोज्ञावसंतरात्रिर्मांविधुरयतिविक्लवयति कापिकृतं
सुकृतंपुण्यंयस्यातादृशीकामिनीकांताहरिं कृष्णमनुभ
वतिउपभुंक्ते ॥ ४॥

अहहकलयामिवलयादिमणिभूषणं ॥ ह
रिविरहदहनवहनेनबहुदूषणं ॥ ५॥
अहहेति अहंवलयादिमणिभूषणं कंकणप्रभृतिभु

कालंकारं हरिविरहदहनवहनेन कृष्णवियोगधारणेन हे
तुनाबहुदूषणं अतिशयापरं कलयामिमन्येप्रियदर्शनेनस्त्री
णांअलंकारसाफल्यमितिभावः॥५॥

कुसुमसुकुमारतनुमतनुशरलीलया॥
स्रगपिहृदिहंतिमामतिविषमशीलया॥६

कुसुमेति स्रगपिपुष्पमालापिअतनुशरलीलयाकं
दर्पबाणविलासेन मांहृदिहंति किंदृशींमांकुसुमवत्सु
कुमाराकोमलातनुःशरीरंयस्याःसा कीदृश्या अतनुशर
लीलया अतिविषमं अतिदारुणंशीलंस्वभावोयस्याःत
या बाणेनाहिक्षतंक्षिपतेनपुष्पादिना॥६॥

अहमिहनिवसामिनगणितवनवेतसा॥
स्मरतिमधुसूदनोमामपिनचेतसा॥७॥

अहमिति गणितवनवेतसा गणिताप्रतिवनंकृष्णम
न्वेषयंत्यापरिसंख्यातावनवेतसवृक्षायया सा अहंइहकुं
जेकिंननिवसामि अपितुवसाम्येव अहंतुनअसमर्थाशिं
स्खालनेपि एवंविधामपिमांमधुसूदनः कृष्णश्चेतसापिन-
स्मरति आश्चर्यमित्यर्थः

हरिचरणशरणजयदेवकविभारती॥ वस
तुहृदियुवतिरिवकोमलकलावती॥८॥
इतिश्रीगीतगोविंदेत्रयोदशःप्रबंधः॥

हरीति हरिचरणौरक्षितारौयस्यसचासौजयदेवक
विस्तस्य भारतीगीतरूपासरस्वती भक्तानांहृदिमनसिव

सतु कीदृशीभारती कोमलाअनिष्ठुरवर्णा कलावतीकथित कलायुक्ताच केव युवतिरिव यथानायकस्हृदये कोमलकलावतीसुकुमारांगी चतुःषष्टिकामकलायुक्ताच नायिका वसति ॥८॥

श्लोकः॥ तत्किंकामपिकामिनीमभिसृतःकिं
वाकलाकेलिभिर्बद्धोबंधुभिरंधकारिणिव
नोपांतेकिमुभ्राम्यति ॥ कांतःक्लांतमना
मनागपिपथिप्रस्थातुमेवाक्षमः संकेती
कृतमंजुवंजुललताकुंजेपियन्नागतः ॥१॥

कृष्णास्यविलंबेतर्कमाह तत्किमिति कांतःकृष्णः संकेतीकृतः अभिसरणस्थानंसंपादितः योमंजुर्मनोहरः वंजुललताकुंजः वेतसलतागृहं तस्मिन्नपि यस्मान्नागतः नायातः तस्मात्कारणात्कामपि कामिनींनायिकामभिसृतः तदभिमुखंगतः किंवाथवा बंधुभिर्मित्रैः कलाकेलिभिः हास्यादिक्रीडाभिर्बद्धः यंत्रितःअथवाअंधकारिणितमोयुक्ते वनोपांतेकिं भ्राम्यति तमसिमार्गभ्रमात् भ्रमणंयुज्यतएव अभ्यस्तस्यभ्रमाभावइतिचेत्तत्राह क्लांतमनाः मन्निमित्तं समाकुलमंतः करणंयस्यसन् पथिमनागपि अल्पमपिप्रस्थातुं आगंतुंअक्षमःकिंअसमर्थःकिं अत्रअपिशब्दःकिमर्थःउक्तार्थेयंनायिकाउक्ताभवतिसायस्याः संकेतंनागतः प्रियः तस्यनागमने हेतुंचिंतयंत्याकुलायथेति संशयाक्षेपालंकारोयम् ॥१॥

श्लो०॥ अथागतंमाधवमंतरेणसखीमियं
वीक्ष्यविषादमूकाम॥ विशंकमानारमितं
कयापिजनार्दनंदृष्टवदेतदाह॥२॥

अथेति अथानंतरंइयं राधामाधवंकृष्णमंतरेणविना आगतांसखींवीक्ष्यदृष्ट्वा एतद्गीतेनवक्ष्यमाणमाह कीदृशीं सखींविषादेनकार्यासिद्ध्यामूकां वक्तुमक्षमां कीदृशीराधा जनार्दनंकृष्णं कयापिकामिन्यारमितंक्रीडितं विशंकमाना तर्कयंती कथं दृष्टवत् कामिन्यासहितंकृष्णं दृष्टेत्यर्थः य द्वादृष्टाभिधीयतेतथाप्राहेत्यर्थः उक्तिः एषाउन्मादतः अत्रो पेंद्रवज्रावृत्तम्॥२॥

अथचतुर्दशप्रबंधो वसंतरागेणएकताली
तालेगीयते

स्मरसमरोचितविरचितवेषा॥ गलितकु
सुमदलविलुलितकेशा॥१॥ कापिचपला
मधुरिपुणाविलसतियुवतिरधिकगु-
णा॥ ध्रुवपदं॥

दृष्टवदित्युक्तंतद्गीतेनाह गीतस्यास्यवसंतरागः स्मरे ति हेसखि कापियुवतिः कामिनीमधुरिपुणा कृष्णेनसह- विलसतिक्रीडति कीदृशीसाअधिकगुणा अतिशयित- सौंदर्यादिगुणैर्युक्ता स्मरसमरोचितः कामयुद्धयोग्यः विरचितःकृतवेषोलंकारादिर्ययासा पुनः कीदृशीगलिता निकुसुमानि येभ्यः तादृशाः दरविलुलिताईषदितस्ततो-

व्यस्ताः केशाः यस्याः साविपरीतरतियुक्ता ॥ १ ॥

हरिपरिरंभणवलितविकारा ॥ कुचकलशोपरि तरलितहारा ॥ २ ॥

हरेः परिरंभणेनालिंगनेनवलितः संभक्तोललितोमनोहरोवा विकारोकामभावोयस्याः साकुचकलशयोरुपरिस्तनघटयोर्मस्तके तरलितश्चंचलो हारोयस्याः सा ॥ २ ॥

विचलदलकललिताननचंद्रा ॥ तदधरपानरभसकृततंद्रा ॥ ३ ॥

विचलदिति विचलद्भिः कंपमानैरलकैः चूर्णकुंतलैः ललितः सुंदरः आननचंद्रो मुखचंद्रोयस्याः सा पुनः कीदृशी तस्यकृष्णस्य ओष्ठपान हर्षेण कृता तंद्रा रतिसुखालुभव निद्रायया सा ॥ ३ ॥

चंचलकुंडलदलितकपोला ॥ मुखरितरशनजघनगतिलोला ॥ ४ ॥

चंचलेति चंचलाभ्यां कुंडलाभ्यां दलितौ संघृष्टौ कपोलौ यस्याः सा पुनः कीदृशी मुखरिता शब्दसहिता रशना कांची यस्मिन्जघने तस्यगत्याचांचल्येन लोलाचंचला ॥ ४

दयितविलोकितलज्जितहसिता ॥ बहुविधकूजितरतिरसरसिता ॥ ५ ॥

दयितेति दयितस्य कृष्णस्य विलोकनेन मुखवीक्षणेन लज्जितं संजातलज्जं हसितं हास्यं यस्याः सा पुनः कीदृशी बहुविधपिकशिखिकलहंसादीनामिवनानाप्रकारकूजितं

यत्रएतादृशोरतिरसः क्रीडारसस्तेनरसितादृशा ॥५॥

विपुलपुलकपृथुवेपथुभंगा ॥ श्वसितनिमीलितविकसदनंगा ॥ ६॥

विपुलेति विपुलाबहुलाः पुलकारोमांचायस्याः पृथुर्महान्वेपथुः कंपोभंगइवयस्याः सा च पुनः कीदृशी श्वसितंसुरतायासेनजनितोनिःश्वासः निमीलितं परमानंदावास्थाजनितं नेत्रनिमीलितंच ताभ्यांविकसन्प्रकटीभवन् अनंगः कामोरेतोलक्षणोयस्याः सा निमीलितेत्यनेनच्युतकालः सूचितः ॥६॥

श्रमजलकणभरसुभगशरीरा ॥ परिपतितोरसिरतिरणधीरा ॥७॥

श्रमेति श्रमजलकणभरेण सुरतायासघर्मजलाधिक्येन सुभगंमनोज्ञं शरीरं यस्याःसा एतेनसात्विकभावोत्पत्तिःसूचिता सात्विकाभावाः पूर्वमुक्ताः पुनःकीदृशी उरसि परिपतिता कृष्णवक्षस्थलं प्राप्यस्थिता रतिः सुरतंरणइव तत्रधीरा ॥७॥

श्रीजयदेवभणितं हरिरमितं ॥ कलिकलुषंजनयतुपरिशमितं ॥८॥ इतिश्रीगीतगोविंदेचतुर्दशः प्रबंधः ॥

श्रीजयदेवेति श्रीजयदेवभणितमुक्तं वर्णितमित्यर्थः यद्धरेः रमितं कृष्णस्य संभोगः तत्कलेः कलियुगस्यकलुषपापं गायकानां श्रोतॄणांचपरिशमितं शांतं जनयतु शमन-

करोतु॥८॥

श्लो०॥ विरहपांडुमुरारिमुखांबुजद्युतिरयं तिरयन्नपिवेदना॥ विधुरतीवतनोतिमनोभुवः सुहृदयेहृदयेमदनव्यथां॥१॥

विरहेति अये हेसखि चंद्रदर्शनविषादेन सखीं प्रतिब्रूते अयंविधुश्चंद्रः ममहृदयेमदनव्यथां कामपीडांअतीवात्यर्थेनतनोति विस्तारयति उद्दीपकविभावनत्वात् कीदृशोविधुः विरहेणमद्वियोगेनपांडुधूसरयन्मुरारेः मुखांबुजं कृष्णास्यवदनकमलंतस्यद्युतिरिवद्युतिर्यस्यसः पुनःकीदृशः वेदनामपितिरयन् आच्छादयन् व्यथाजनकत्वेहेतुमाह मनोभुवः कामस्यसुहृन्मित्रं॥१॥

अथपंचदशप्रबंधो गुर्जरीरागेणएकतालीतालेगीयते·

समुदितमदनेरमणीवदनेचुंबनवलिताधरे॥ मृगमदतिलकंलिखतिसपुलकं मृगमिवरजनीकरे॥१॥ रमतेयमुनापुलिनवने॥ विजयीमुरारिरधुना॥ध्रु०॥

पूर्वगीतेन कस्याश्चिद्विपरीतरतमुक्तं अधुनाकस्याश्चित्स्वाधीनभर्तृकायानायककर्तृकांक्रीडामाह समुदितेति· स्वाधीनभर्तृकालक्षणं यस्यारतिगुणाकृष्टः पतिःपार्श्वंनमुंचति चित्रविभ्रमैर्युक्ता स्वाधीनपतिकायथा इतिगुर्जरी रागः हेसखि अधुना अस्मिन्कालेयमुनापुलिनेयद्वनंतस्मिन्

विजयीजयशीलोमुरारिः कृष्णोरमतेक्रीडति कथंरमतइत्य
तआह रम्यतेस्यामितिरमणीतस्याः सुखेसपुलकंरोमांच
सहितंयथास्यात्तथा मृगमदतिलकं कस्तूर्याः तिलकंलिख
ति कीदृशेवदने समुदितः समुपचितः मदनः कामोयत्रस
कामइत्यर्थः चुंबनेनवलितः कमुखीकृत्यसंकोचितःअध
रोयस्य तस्मिन् चुंबनंदत्वातिलकंलिखतीत्यर्थः कस्मिन् क
इव रजनीकरेचंद्रे मृगमिवलिखतीत्यर्थः ॥१॥

घनचयरुचिरेरचयतिचिकुरेतरलिततरुणा
नने ॥ कुरबककुसुमंचपलासुषमंरतिपति
मृगकानने ॥२॥

घनेति तस्याः घनचयरुचिरे मेघसमूहमनोहरे चिकुरेके
शेजातावेकवचनं कुरबककुसुमं अम्लानपुष्पंवा कोटिपुष्पं
वा रचयतियथास्थानमर्पयति पुनः कीदृशे तरलितानिचं
चलीकृतानि तरुणानामाननानि मुखानियेन अतिसुंदर तया
वीक्षणार्थं कीदृशंकुसुमं चपलावत् विद्युदिव सुषमा शो
भायस्य लक्ष्यलक्षितयालोहितत्वाच्चविद्युत्साम्यं पुनःकी
दृशे रतिपतिः कामः सएवमृगस्तस्य कानने यथामृगवासो
वने तथाचिकुरे कामइति कामजनकेइत्यर्थः अस्मिन्नेवमेघे
विद्युद्दर्शनतरुणानांमेघसमयः कामजनकइतिमेघोदयेह
रिणानामतिसुखमुत्पद्यते ॥२॥

घटयतिसुघनेकुचयुगगगनेमृगमदरुचि
रूषिते ॥ मणिसरममलंतारकपटलंनख

पदशशिभूषिते ॥३॥

पदयतीति स्तघनेनिविडे कुचयुगगगनेस्तन द्वयाकाशे अमलंनिर्मलंमणिसरंमुक्ताहारमेव तारकपटलंनक्षत्रसमूहंघटयति योजयति मृगमदरुचिः कस्तूरिकादीप्तिस्तया रूषिते पुनःकीदृशे नखपदंनखक्षतं तदेवशशी द्वितीयाचंद्रस्तेन भूषिते अलंकृते गगनपक्षे शोभिताघनामेघायस्मिन्नित्यभूतोपमार्थः ॥३॥

जितबिसशकलेमृदुभुजयुगलेकरतलनलिनीदले॥ मरकतवलयंमधुकरनिचयंवितरतिहिमशीतले॥४॥

जितेति मृदुभुजयुगले कोमलबाहुद्वये मरकतवलयं मरकतखचितकंकणमेव मधुकरनिचयं भ्रमरसमूहं वितरतिददाति विरचतीत्यर्थः कीदृशेभुजयुगले जितबिसशकलेजितंसदृशीकृतंमृणालखंडंयेन पुनःकीदृशे करतलमेव नलिनीदलंपद्मपत्रंयत्र हिमवत्शीतलेसंतापहरत्वात् पद्मिनीपत्रयुक्ते बिसशकले भ्रमरसमूहस्तिष्ठतीति रूपकालंकारः॥४॥

रतिगृहजघनेविपुलापघनेमनसिजकनकासने॥ मणिमयरशनंतोरणहसनंविकिरतिकृतवासने॥५॥

रतीति रतेःशृंगारस्यगृहेआश्रयेजघनेनितंबे मणिमयरशनंमुक्तामयीमेखलां विकिरतिददाति कीदृशेजघनेवि

पुलंमहत्तरं अपघनंशरीरंयस्य अतिमांसलइत्यर्थः पुनः कीदृशे मनसिजस्य कामस्य कनकनिर्मितेसिंहासने इव कीदृशंमणिमयरशनं तोरणस्यवंदनमालिकायाहसनंउ पहासोयस्मात् यदाराजासिंहासनेउपविशति तदावंद नमालिकाबध्यते पुनः कीदृशे कृतंदत्तंवासनंवस्त्रंयस्मि न् वस्त्रोपरिमेखलांबध्नातीत्यर्थः यद्वा कृतंकामेन वासनं स्थानंयत्रतादृशे ॥ ५॥

चरणकिसलयेकमलानिलयेनखमणिग-
णपूजिते॥ बहिरपवरणंयावकभरणंज-
नयतिहृदियोजिते ॥ ६॥

चरणेति चरणकिसलयं पदमेवपल्लवंतस्मिन् यावकभ रणं अलक्तकपूरणंजनयति करोतीत्यर्थः कीदृशेचरणकि सलये हृदियोजिते कृष्णानुरागातिशयात् स्वहृदयमार्पि तेस्वहृदयेतस्याश्चरणं कृत्वायावकंरचयतीत्यर्थः कीदृशे हृदिकमलायाः निलयेआश्रये कीदृशेकिसलये नखाएव मणिगणाः पुष्परागादि रत्नसमूहास्तैः पूजिते अर्चिते कीदृ शंयावकभरणं बहिरपवरणं बाह्यमाच्छादकंयत्तद्विरती ति ॥ ६॥

रमयतिसुदृशंकामपिसदृशंखलहलधरसो-
दरे॥ किमफलमवसंचिरमिहविरसंवदसखि
विटपोदरे॥ ७॥

रमयतीति हेसखिखलेदुर्जने बलभद्रस्यसोदरे भ्रात

रिकृष्णे कामपि स्त्रदृशं शोभने दृशौ नेत्रे यस्यास्तां नायिकां सदृशं यौवनरूपगुणादिभिस्तुल्यं यथास्यात्तथा रमयतिस ति क्रीडति सति इहविटपोदरलतागृहे अफलं निष्प्रयोजकं विरसं रसरहितं यथास्यात्तथा चिरं बहुकालं किमवसं स्थितास्मि हेसखित्वंवद कथय हलवाहकस्य सोदरइ निसाभिप्रायं खलइति क्रोधविभावना ॥ ७॥

इहरसभणने कृत हरिगुणने मधुरिपुपदसेवके॥ कलियुगचरितं नवसतु दुरितं कविनृपजयदेवके॥ ८॥ इतिश्रीगीतगोविंदे पंचदशः प्रबंधः॥

इह मयि कवीनां नृपे जयदेवके कलियुगेचरितमाचरितं कलियुगेनचरितं वादुरितं पापं नवसतु नतिष्ठतु प्रार्थनायांलोट् कीदृशे रसस्य शृंगाररसस्य भणनं कथनं यस्य मधुरिपोः कृष्णस्यचरणसेवके कर्तरिप्रत्यय अतएवकृतं हरेर्गुणानांगुणनं चिंतनं येन ॥ ८॥

श्लोकः॥ नायातः सखिनिर्दयोयदिशठस्त्वं दूतिकिंदूयसे स्वच्छंदं बहुवल्लभः संरमते किंतत्रते दूषणम्॥ पश्याद्यप्रियसंगमाय दयितस्याकृष्यमाणंगुणैरुत्कंठार्तिभरादिवस्फुटदिदं चेतः स्वयंयास्यति॥ १॥

कृष्णस्यागमनात् दुःखितांसखीमाश्वासयंत्याह नायातइति हेसखि हेदूति दूत्यकर्मकुशले यदिनिर्दयः दया

रहितः शठः धूर्तो वंचकः कृष्णो नायातः तर्हि किं त्वं दूयसे संतप्ता भवसि अनागमने कारणमाह बह्वोवल्लभास्त्रियो यस्य सः कृष्णः स्वच्छंदं स्वेच्छया तत्र स्थाने रमते क्रीडति तेतव किं दूषणं कः अपराधः न कोपीत्यर्थः तर्हि कथमत्रा गमिष्यतीत्यत आह पश्येति हे सखि अथेदानीं मम इदं चे तोमनः प्रियसंगमाय कृष्णसंभोगार्थं स्वयमेव यास्यति इ ति त्वं पश्य जानीहि कीदृशं चेतः दयितस्य कृष्णस्य गुणैः सौंद र्यादिभिः आकृष्यमाणं वशीकृतं पुनः कीदृशं उत्कंठा औत्सु क्यं आर्तिः कामपीडा तयोः भरोतिशयस्तस्माद्विस्फुटत् बहिर्भवत् अपरमपि वस्त्वंतरसंकुले स्थाने स्थितं वस्तु सा कर्याद्बहिर्भवतीति स्फुटत् विदलदिति वा अन्योपि गुणैः रज्जु भिराकृष्टः सन् प्रयातीति अन्योन्यालंकारः ॥१॥

अथ षोडश प्रबंधो देशांकरागेण रूपकताले गीयते।

अनिलतरलकुवलयनयनेन ॥ तपति न सा किसलयशयनेन ॥ सखि या रमिता वनमालिना ॥ ध्रु० ॥१॥

देशांकरागः अनिलेति हे सखि या नायिका वनमालिना कृष्णेन रमिता क्रीडिता सा किसलयशयनेन नवपल्लवश य्यायां न तपति नोपतप्ता भवति अथवा या वनमालिना अर मिता मादृशी सा किसलयशयनेन तपति अपितु तपत्ये वेति काकु कीदृशेन वनमालिना अनिलेन वायुना तरलं च

चलं यत्कुवलयं नीलोत्पलं तत् इव नयने यस्य स तेन सार्द्रंरसा वलोकनादितिभावः अस्मिन् गीते संभोगवियोगौ ज्ञातव्यौ १

विकसितसरसिजललितमुखेन ॥ स्फुटति नसा मनसिजविशिखेन ॥ २ ॥

विकसितेति विकसितं प्रफुल्लितं यत्सरसिजं कमलं तद्व मनोहरं ललितं आननं यस्य स एवंभूतेन वनमालिना यारमिता सा मनसिजविशिखेन कामबाणेन नस्फुटति न विद्धा भव तीति संभोगे वियोगे तु नस्फुरत्येवेति काका ॥ २ ॥

अमृतमधुरमृदुतरवचनेन ॥ ज्वलति नसा मलयजपवनेन ॥ ३ ॥

अमृतेति अमृतवत् मधुराणि मनोज्ञानि मृदुतराणि अतिकोमलानि वाक्यानि यस्य तेन वनमालिना यारमिता सा मलयजपवनेन मलयानिलेन नज्वलति नसंदीप्यते संभोगे वियोगे तु सा नज्वलति अपितु ज्वलत्येव ॥ ३ ॥

स्थलजलरुहरुचिकरचरणेन ॥ लुठति न सा हिमकरकिरणेन ॥ ४ ॥

स्थलेति स्थलोद्भवजलरुहाणां पद्मानां रुचिरिव रुचि र्येषां तादृशौ करौ चरणौ च यस्य तेन वनमालिना या रमिता सा हिमकरस्य किरणेन चंद्रस्य दीप्त्या न लुठति नोतप्ता भवति इति संभोगे वियोगे तु नतपति अपितु तपत्येव स्थलपद्म स्यातिलोहितत्वेनोपादानं ॥ ४ ॥

सजलजलदसमुदयरुचिरेण ॥ दलति न सा

हृदि चिरविरहेण ॥५॥

सजलेति सजलजलदसमुदयवत् सोदकमेघोदयवत् रुचिरः सुंदरस्तेन वनमालिना यारमिता साहृदिमनसि विरहभरेणविरहाधिक्येन न दलति न विदीर्यते इति पूर्ववत्ज्ञेयं ५.

कनकनिकषरुचिशुचिवसनेन ॥ श्वसति न सापरिजनहसनेन ॥ ६॥

कनकेति कनकनिकषस्यसुवर्णरेखायारुचिरिव शुचिविमलं वस्त्रंयस्य पीतांबरेणेत्यर्थः तेनवनमालिनायारमितासापरिजनहसनेन लोकहास्येन सखीहास्येन नश्वसति संभोगे वियोगेतु परिजन हसनेन सपत्नीहसनेननश्वसति अपितु श्वसत्येव ॥ ६॥

सकलभुवनजनवरतरुणेन ॥ वहति न सा रुजमतिकरुणेन ॥७॥

सकलेति सकलभुवनेत्रैलोक्येयेजनाः युवानस्तेभ्योपिवरेणश्रेष्ठेनतरुणेन यूना अतिकरुणेनातिदयावतावनमालिनायारमिता सारुजंपीडांनवहतिइतिसंभोगे वियोगेतु सारुजंवहत्येव कीदृशेनकृष्णेन करुणांदयां अतिक्रांतेन निर्दयेनेत्यर्थः ॥ ७॥

श्रीजयदेवभणितवचनेन ॥ प्रविशतु हरिरपि हृदयमनेन ॥८॥ इतिश्रीगीतगोविंदेषोडशः प्रबंधः ॥

अनेन श्रीजयदेवभणितं यद्वचनंगीतरूपंतेन हरिः कृष्णो

पितद्दयं भक्तानां चित्तं प्रविशतु पुण्यदातृत्वात् कीदृशमिदं दयं हरिचरणचिंतनात् विनष्टपापमितिभावः ॥ ८॥

श्लोकः ॥ मनोभवानंदनचंदनानिलप्रसीदरे
दक्षिणमुंचवामतां ॥ क्षणंजगत्प्राणविधाय
माधवंपुरोममप्राणहरोभविष्यसि ॥१॥

पीडयंतं मलयानिलंप्रार्थयते मनोभवेति हेचंदनानिलमलयसंबंधिवातप्रसीदममोपरिप्रसन्नोभव रेइत्याक्षेपसंबोधनंदुःखकारित्वात् दक्षिण त्वं वामतांप्रतिकूलतां मुंचत्यज चंदनसंसर्गित्वात्तववक्रत्वंनोचितमितिभावः ननु मयि वामत्वं नास्तीत्यतआह हेमनोभवानंदन काममानंदयसीति तदुद्बोधनेनैवमत्प्रातिकूल्यमाचरसीत्यर्थः यदित्वं वामतामपि नमुंचसि तदा हेजगत्प्राणजगतांप्राणभूत क्षणं अल्पकालं माधवंपुरोविधाय कृष्णमग्रेकृत्वा ममप्राणहरोभविष्यसि प्राणगमनसमयेहि कृष्णदर्शनं अतिदुर्लभं इतिजगतांप्राणस्यप्राणसंरक्षणंसमुचितमितिभावः दक्षिणस्यवामत्वंजगत्प्राणस्य प्राणहरत्वमिति विरोधनामालंकारस्य ॥१॥

श्लो॰॥ रिपुरिवसखीसंवासोयंशिखीवहि
मानिलो विषमिवसुधारश्मिर्दुनोतिमनो
गमम॥ हृदयमदयेतस्मिन्नेवंपुनर्वलतेबला
त् कुवलयदृशांवामः कामोनिकाममनिरंकुशः २

पुनरपिसखीमत्याह रिपुरिति सअयंसखीसंवासः

सखीभिः सहस भ्यक् पासो पासस्थानं रिपुरिव शत्रुरिव मम
मनोतिसंतापयति हिमानिलः शीतलवायुः शिखीव वन्हि
रिव मम मनोदुनोति सुधारश्मिश्चंद्रो विषं कालकूटमिवद्भूरं दु
नोत्यतिसंतापयति तस्मिन् अदये करुणारहिते प्रिये एवं वि-
चारितमेव ममत्दयं पुनः पुनरपिबलात् हठात् लत्ते निवा-
र्यमाणमपितत्रैवनिर्गच्छतीत्यर्थः यतः कुवलयदृशां नीलो
त्पलाक्षीणां कामः कंदर्पोनिकाम निरंकुशः अतिशयेन स्वे-
च्छाचारी अपरतंत्र इत्यर्थः अतएववामः क्रूरः तदुक्तं रसिक-
रहस्ये निषिद्धेवर्तनेप्रायः कामोवामः स्वभावत इति सखीनां
रिपुवद्धिमानिलस्य वन्हिवत् सुधांशोर्विषवदिति विरोधा
लंकारस्तत्र ॥ २॥

श्लोकः॥ बाधांविधेहि मलयानिलपंचबा
ण प्राणान्गृहाणनगृहं पुनराश्रयिष्ये॥
किंते कृतांतभगिनिक्षमयातरंगै रंगानिसिं-
चममशाम्यतु देहदाहः॥ ३॥

पुनरपि जीवितेनिरपेक्षत्वेन मलयानिलादीन्प्रत्याह
बाधामिति हेमलयानिलचंदनवायो बाधां ममपीडांविधेहि
कुरु हेपंचबाण हेकामत्वं ममप्राणान्गृहाण यथापुनरपि
अहंगृहं नाश्रयेन यास्यामितथाप्राणान्रक्षाणेत्यर्थः हेकृ-
तांतभगिनि यमस्वसः यमुने तवक्षमयाशांत्या किं यमभ
गिन्यास्तवशांतिर्नोचितेतिभावः त्वतरंगैः स्वकियैः कल्लोलैः
मेअंगानिषिंचक्षालय तेनमम देहदाहः शरीरतापः शाम्यतु

मरणमेवभवतीत्यर्थः ॥३॥

श्लो० ॥ सांद्रानंदपुरंदरादिदिविषद्वृंदैरमं
दादरादानम्रैर्मुकुटेंद्रनीलमणिभिः संद
र्शितेंदीवरम् ॥ स्वच्छंदं मकरंदसुंदरगल
न्मंदाकिनीमेदुरं श्रीगोविंदपदारविंदमशु
भस्कंदायवंदामहे ॥ ४ ॥

इति श्रीकविराजश्रीजयदेवकृतगीतगोविं
दे महाकाव्ये श्रीनागरनारायणोनाम
सप्तमः सर्गः

सर्गांते कविर्नमस्करोति सांद्रेति श्रीगोविंदस्यपदा
रविंदं श्रीकृष्णस्यचरणपद्मं वंदामहे नमामः किमर्थं अशु
भस्कंदाय अशुभनाशार्थं कथंभूतं पदारविंदं सांद्रानंदाः
निबिडहर्षाः पुरंदरादिदिविषदः इंद्रादिदेवास्तेषां वृंदैः स
मूहैरमंदादरात् अतिशयितबहुमानादानम्रैः समंतान्नति
युक्तैः कर्तृभूतैः मुकुटानामिंद्रनीलमणिभिः नीलवर्णैः
मणिभिः करणभूतैः संदर्शितइंदीवरपत्रसोपत्र पुनः कीदृ
शं स्वच्छंदं यथास्यात्तथा मकरंदवत्सुंदरं पुष्परसवन्मधु
रं यथास्यात्तथागलंत्यामंदाकिन्याविपद्गंगया मेदुरं सांद्रं
स्निग्धमित्यर्थः श्रीशब्दउत्कर्षार्थः नागरश्चतुरो नारायणोय
त्रसः तथा शार्दूलविक्रीडितवृत्तं ॥ ७ ॥

अथ अष्टमसर्गः प्रारभ्यते.

श्लो० ॥ अथकथमपियामिनींविनीयस्मर

शरजर्जरितापिसाप्रभाते ॥ अनुनयवचनं वदंतमग्रे प्रणतमपिप्रियमाहसाभ्यसूयं १

अधुनाराधाप्रियंप्रातरागतं दृष्ट्वा साभ्यसूयवचनमेवमाह अथेति अथानंतरं मंगलार्थेवा कथमपि सकष्टं यामिनींरात्रिंविनिनीयनीत्वास्थितासाराधाप्रियं कृष्णंसाभ्यसूयं सेर्ष्यंयथास्यात्तथाह उक्तवती कीदृशीसा स्मरशरैः कामबाणैः जर्जरितापि विद्धापि कीदृशंप्रियं प्रातःसमयेअनुनयाय प्रबोधायवचनं वाक्यं वदंतं पुनः कीदृशं अग्रेप्रणमंतमपिनम्रमपि ॥१॥

अथसप्तदशप्रबंधो भैरवरागेणयतितालेगीयते॰

रजनिजनितगुरुजागररागकषायितमलसनिमेषं॥ वहतिनयनमनुरागमिवस्फुटमुदितरसाभिनिवेशं ॥१॥ हरि हरियाहि माधवयाहि केशवमावद कैतववादं ॥ तामनुसरसरसीरुहलोचनयातवहरति विषादं॥ ध्रु॰

अस्मिन्खंडितानामनायिकावर्ण्यते तल्लक्षणं उल्लंघ्यसमयंयस्या प्रेयानन्योपभोगवान् भोगलक्ष्यांकितः प्रातरागच्छेत्साहिखंडिता १ निद्राकषायकलुषीकृतताम्रनेत्रोनारीनखव्रणविशेषविचित्रितांगः यस्याः कृतोपिगृहमेतिपतिः प्रभातेसाखंडिते निकथिताकविभिः पुराणैः २ साभ्यसूयवचनमेवगीतेनाह रजनीति भैरवरागः तल्लक्षणं

सरोवरस्थेस्फटिकस्यमंडपेसरोरुहेः शंकरमर्चयंती नाल प्रभेदप्रतिपन्नगीता गौरीतनुर्नारदभैरवीयं इति हरिहरि खेदानुकारे अव्ययं हेकेशवयाहि हेमाधवयाहि कोपाभि व्यंजनहिरुक्तिः कैतववादंच कपटवाक्यंमावद हेसरसीरुह लोचन कमलनयन तांनायिकांअनुसरगच्छ यातवविषादंह रतिदूरीकरोति कथंविषादवत्वमित्याह हेकृष्णतवनयनं नेत्रंस्फुटंव्यक्तंतस्यानुरागमिववहति धारयति कीदृशंनयनं रजनीजनितेन रात्रिकृतेनगुरुणातिशयेन जागररागेणजा गरोत्पन्नलोहितरागेण कषायितं आरक्तं कृतं पुनःकीदृशं रात्रिजागरेणालसोमंथरोनिमेषः पक्ष्मचलनंयस्य कीदृ शंअनुरागं उदितः कथितः रसस्य अन्यकामिनीविषयशृं गाररसस्याभिनिवेशस्तत्परतायेन मालक्ष्मीः तस्याः धव इत्यनेन तत्पतित्वेनचांचल्यंद्योतितं केशवेत्यनेन क्लेशनाशक त्वेनापिक्लेशशब्दानुवृत्तिमनुचितमिति द्योतितं ॥१॥

कज्जलमलिनविलोचनचुंबनविरचितनी लिमरूपं ॥ दशनवसनमरुणंतवकृष्णतनो तितनोरनुरूपं॥२॥

ननुत्वदन्वेषणार्थंजागरान्मेनेत्रयोर्लौहित्यमलंदुः शंकयेत्यतआह कज्जलेति हेकृष्ण तवारुणं तांबूलरागेण लोहितं दशनवसनं अधरः तनोः शरीरस्यानुरूपंसादृश्यं तनोति विस्तारयति कीदृशंदशनवसनं कज्जलेनांजनेन मलिनेश्यामेयेविलोचनेनेत्रे तयोश्चुंबनेनविरचितंकृतं-

नीलिमरूपंश्यामतारूपंयस्य आरक्ताधरस्यनेत्रचुंबनेन श्यामताप्रतिपादनात् तनोरनुरूपत्वं अन्यायांकामिन्यां कृष्णस्यानुरागः स्फुचितः ॥२॥

वपुरनुवहति नवस्मरसंगररवरनखरक्षतरेखं ॥ मरकतशकलकलितकलधौतलिपेरिव रतिजयलेखं ॥ ३॥

किंच वपुरिति हे कृष्ण नववपुः शरीरंरतिजयलेखंरक्तविजयप्रशस्तिलेखनपत्रं अनुवहति अनुकरोति कीदृशं वपुः स्मरसंगरेकामयुद्धेखराणांतीक्ष्णानांनखानांक्षतान्येव रेखायस्यकस्याइव मरकतशकलेनीलमणिखंडेकलितानि मितांयाकलधौतलिपेः स्वर्णविरचिताक्षरस्यविन्यासस्येव वपुषोनीलत्वान्नखक्षतस्फुटत्वान्मरकतखंडार्पितस्वर्णाक्षरसाम्यं ॥३॥

चरणकमलगलदलक्तकसिक्तमिदंतवहृदयमुदारं ॥ दर्शयतीवबहिर्मदनद्रुमनवकिसलयपरिवारं ॥ ४॥

ननुमार्गेविस्मृत्यगच्छतोमेवपुषिवनेकंटकादिस्पर्शलेवंदृश्यतेनतुनखांकमित्यतआह चरणेति इदंउदारं मनोहरंतवहृदयं मदनद्रुमस्यकामवृक्षस्यहृदयांतर्गतस्यनवकिसलयपरिवारं नूतनपल्लवसमूहंबहिर्दर्शयतीव प्रकटयतीव कीदृशंहृदयं चरणकमलादन्यरमणीपादपद्मात् गलतास्रवता अलक्तकेनसिक्तंउक्षितं किसलयपदे

नैवनूतनत्वविधानात्पुनर्नवपदं अद्यतनत्वसूचनार्थं रूपकालंकारश्चात्र ॥४॥

दशनपदंभवदधरगतंममजनयतिचेतसि खेदं॥ कथयतिकथमधुनापिमयासहतव वपुरेतदभेदं॥५॥

ननुतवखेदेनत्वयाऐक्यान्मस्हृदये व्याधिर्विक्रियाजाता कथमन्यथाकल्प्यते सत्यंयदितवमयाऐक्यंनस्यात्तदा तवशरीरगतक्षतेनममवेदनानस्यादित्याह दशनेति भवदधरगतं तवाधरोष्ठवर्तमानं दशनपदं अन्यकामिनीदंतक्षतं ममचेतसिखेदं संतापंजनयति करोतीत्यर्थः एतादृशं नवपदं तववपुरधुनापीदानीमपि मयासह अभेदंकथंकथयतीत्यर्थः नविद्यतेभेदोयस्य पूर्वंमयासह तववपुषोभेदोनास्तीतिस्थितं इदानींतुतद्विपरीतमिति मयासहएवेति विभावनालंकारश्चात्र ॥५॥

बहिरिवमलिनतरंतवकृष्णमनोपिभविष्यतिनूनं॥ कथमथवंचयसेजनमनुगतमसमशरज्वरदूनं॥६॥

ननुतवोपायनार्थंकमलभोजनंकृतवतिमयिपद्मकोशादापतताभृंगेणममाधरोदष्टोनतुदंतक्षतमित्यतआह बहिरिवेति नूनमेवेति वितर्के हेकृष्ण तवचित्तमपिबहिरिवमलिनतरंश्यामंभविष्यतीतिनूनंतर्कयामि ननुमालिन्यंत्वयाकथंज्ञातमित्यतआह अथान्यथात्वं असमशरः

क्षामस्तस्यज्वरेण पीडयादूनमुपतप्तं अनुगतंत्वामनुसृतंम
लक्षणंजनं कथंवंचयसेप्रतारयसि अतःकृष्णात्वंकौटिल्य
मेवेति नूनमितिशब्दोपादानादुत्प्रेक्षालंकारः॥६॥

भ्रमति भवानबलाकवलायवनेषुकिमत्रवि
चित्रं॥ प्रथयति पूतनिकैववधूवधनिर्दयबा
लचरित्रं॥७॥

भ्रमतीति अबलाकवलायस्त्रीणांभक्षणार्थंभवान् वने
षुअरण्येषुभ्रमति अत्रस्त्रीपापेकिंविचित्रं नाकिमपीत्यर्थः
यतः पूतनिकैवराक्षसीववधूवधेस्त्रीवधार्थंनिर्दयंदयारहि
तंतवबालचरित्रं बालचेष्टितंप्रथयतिख्यापयति यद्वा हे
वधूवधनिर्दयशिशुनात्वयायाराक्षसीहता तस्मिंस्त्वयियू
निसंप्रतिकोमलांगीनामस्माकंमारणेकिंचित्रमिति भावः ७

श्रीजयदेवभणितरतिवंचितखंडितयुवति
विलापं॥ शृणुतसुधामधुरंविबुधाविबुधा
लयतोपिदुरापं॥८॥ इतिश्रीगीतगोविंदे
सप्तदशः प्रबंधः॥१७॥

श्रीजयदेवेति हेविबुधाः पंडिताः श्रीयुतजयदेवेनन
भणितउक्तश्चासौरतिवंचितखंडितयुवतिविलापस्तंशृणु
तआकर्णयत कीदृशंविलापं सुधातोपिमधुरंमनोहरं त
त्रहेतुमाह विबुधालयतोपिस्वर्गादपिदुरापंदुर्लभं तदुक्तं
तवकथामृतमितिश्रीभागवते॥८॥

श्लो०॥ तवेदंपश्यंत्याः प्रसरदनुरागंबहिरि

व प्रियापादालक्तच्छुरितमरुणद्योतिरु
दयम् ॥ ममाद्य प्रख्यात प्रणयभरभंगेन
कितव त्वदालोकः शोकादपिकिमपिल-
ज्जांजनयति ॥१॥

तवेदमिति हेकितववंचक त्वदालोकस्तवदर्शनं प्र
ख्यातस्य लोकप्रसिद्धस्य प्रणयभरस्य प्रेमातिशयस्य
भंगेन नाशेनयः शोकस्तस्मादपि मम अद्यकिं अनिर्वच
नीयां लज्जा जनयति कीदृश्यामम तवेदंहृदयं पश्यंत्याः
कीदृशंहृदयं प्रियायाः पादालक्तकेन चरणसंबंधियावकेन
च्छुरितंव्याप्तं अतएवअरुणा रक्ताछायादीप्तिर्यस्यतादृशं
अरुणद्योतीतिपाठे अरुणः संध्यारागस्तद्वद्द्योतितुंशील
मस्येतितादृशंहृदयंसमीक्ष्य कृतेबहिः प्रसरदनुरागमिव
बात्प्रसरन् अनुरागोयस्य रागोहि अरुणोवर्ण्यते ॥१॥

श्लो० ॥ प्रातर्नीलनिचोलमच्युतमुरःसंवीत
पीतांशुकं राधायाश्चकितंविलोक्य हसति
स्वैरंसखीमंडले ॥ व्रीडाचंचलमंचलंनयनयो
राधापराधानने स्वादुस्मेरमुखोयमस्तुजग
दानंदायनंदात्मजः ॥२॥

इतिश्रीकविराजश्रीजयदेवकृते गीतगोविं
दे महाकाव्येखंडितावर्णनेविलक्षल
क्ष्मीपतिर्नाम अष्टमः
सर्गः ॥८॥

इदानींसर्गांतेकविर्भक्तानाशिषयति प्रातरिति नंदा-
त्मजोयंकृष्णः जगदानंदायास्तु लोकसुखार्थंभवतु कीदृ-
शः व्रीडयाचंचलं लज्जयाचलायमानंनयनयोर्नेत्रयोरंचलं
अर्पणंकटाक्षः राधाननेराधामुखेआधायअर्पयित्वास्मेरं
मुखमीषद्धास्ययुक्तंमुखंयस्यसः स्मेरमुखकारणमाह क
स्मिन्सति प्रातःउषसि अच्युतंकृष्णंनीलंनिचोलंवस्त्रंयस्य
श्यामवस्त्रधरंविलोक्यदृष्ट्वा अनुचराधायाउरः वक्षस्थलं
संवीतपीतांशुकंपरिधानीकृतपीतांबरंचकितंसविस्मयंय
थास्यात्तथाविलोक्यसखीसमूहेस्वैरंशनैः हसतिसति व
स्त्रपरिवर्तनमालोक्यजहासइत्यर्थः विलक्षइतिविस्मया
न्वितः विषयीइतिभावप्रसिद्धःशब्दः शार्दूलविक्रीडितं
वृत्तम्॥२॥

अथनवमः सर्गः प्रारभ्यते

श्लोकः॥ अथतांमन्मथखिन्नांरतिरसभि
न्नांविषादसंपन्नां॥ अनुचिंतितहरिचरितां
कलहांतरितामुवाचरहःसखी॥१॥

प्रणयकोपात् हरिमधिक्षिप्येदानीं कृतपश्चात्तापांसखी
आह अथेति अथानंतरंमंगलार्थंवा सखीतांराधांउवाचो
क्तवती कीदृशींतांमन्मथेनकामेनखिन्नांदीनां पुनःकीदृशीं
रतिरसेनभिन्नांरहितां अतएवविषादेनदुःखेनसंपन्नांयुक्तां
अतएवानुवारंवारंचिंतितंहरेश्चरितंपुराविलासोयया तांक
लहेनप्रीतिकलहेनांतरितांव्यवहितां अत्रकलहांतरिता ना

थिकावर्ण्यते तल्लक्षणं भरतेनोक्तं प्राणेश्वरं प्रणयकोपभरे णलभ्य तंचाटुकारमचिरादवधार्यपश्चात् संतप्यतेमदनव न्हिशिखासहस्रैर्वाष्पाकुलानुकलहांतरितेतिसास्यादिति १

अथअष्टादशप्रबंधो गुर्जरीरागेणयतितालेगीयते

हरिरभिसरतिवहतिमधुपवने ॥ किमपरमधिकसुखंसखिभवने ॥ माधवेमाकुरुमानिनिमानमये ॥ ध्रु० ॥

गुर्जरीरागः यतितालस्तु हरिरिति अयेहेमानिनिअभिमानवतिराधे माधवेकृष्णे मानंअभिमानं माकुरुमाकार्षीरिति प्रार्थनायांलोट् यतःमधुपवनेवसंतवायौवहति सति हरिः अभिसरति स्वयमेवत्वदीयांसंकेतभूमिभागच्छतीति हेसखिराधे भवनेपिगृहेपि अपरंअधिकसुखंअतिशयसुखंकिंअपितुनकिंचिदस्ति नायकस्यस्वयमागमनात्कोपोनयुक्तइत्यर्थः ॥ १ ॥

तालफलादपिगुरुमतिसरसं ॥ किंविफलीकुरुषेकुचकलशं ॥ २ ॥

अपिच तालेति हेराधेतालफलादपिकाठिण्येन स्थौल्येन वर्तुलत्वेनच तालफलादपिगुरुं अधिकंकुचकलशं स्तनघटं किंकिमर्थंविफलीकुरुषे कृष्णहस्तव्यापारपरिशीलनाभावाद्वैफल्यमिति भावः कीदृशं अतिसरसं अतिशयरसयुक्तं तस्मिन्रसेपुनारसाविर्भावाराधदयाल्हादकरमिति

यावत् ॥ २ ॥

कतिनकथितमिदमनुपदमचिरं ॥ मापरि
हरहरिमतिशयरुचिरं ॥ ३ ॥

ननुयदाहरिरागतस्तदात्वयानकथितमित्यतआह क तीति हेराधेइदंअनुपदंस्थाने अचिरंसांप्रतं कतिकति वारान्मयानकथितं किंतुबहुकथितमेव किंतदित्यतआह त्वंअतिशयरुचिरंअतिकमनीयं हरिंकृष्णंमापरिहर मांव ज्ञासीरितिमात्यज ॥ ३ ॥

किमितिविषीदसिरोदिषिविकला ॥ विहृ
सतियुवतिसभातवसकला ॥ ४ ॥

एवंस्कमुखींप्रत्याह किमितीति विकलाअसावधानें द्रिया किमितिकस्मात्विषीदसि दुःखिताभवसि रोदि षिचक्रंदसि मदुक्तनिराकरणात् इदानींविषादोरोदनंच व्यर्थमिति सकलासंपूर्णायुवतिसभातरुणीसमाजः भ वत्याविहसतिउपहासंकरोति नवेभिःकर्मण्यपीतिकेचि दितिषष्ठी ॥ ४ ॥

मृदुनलिनीदलशीतलशयने ॥ हरिमवलो
कयसफलयनयने ॥ ५ ॥

तर्हिकिंकरोमीत्यतआह मृदुनलिनीदलेनकोमलप त्रेणशीतलेकृतेशयनेशय्यायांस्थितंहरिंकृष्णमवलोकय पश्य दर्शनान्नयनेनेत्रेसफलयसफलेकुरु ॥ ५ ॥

जनयसिमनसिकिमितिगुरुखेदं ॥ शृणु

मम वचनमनीहितभेदं ॥ ६ ॥

विचारयंतीमत्याह हेराधे त्वंमनसिगुरुखेदंमहदुःखं किमितिजनयसिउत्पादयसि तस्मान्ममवचनंवाक्यंशृणु आ कर्णय कीदृशंवचनं अनीहितः अनाकांक्षितोभेदोविरहोयेन भवत्याहितमेववचनंवदामीत्यर्थः अतएवशृणु ॥ ६ ॥

हरिरुपयातु वदतु बहुमधुरं ॥ किमितिक रोषिहृदयमतिविधुरं ॥ ७ ॥

कीदृशंवचनमित्यतआह हरिरिति हरिः कृष्णउप यातु त्वदंतिकं आगच्छतु बहुमधुरंतवानुनयवचनंवदतु त्वंहृदयंमनः अतिविधुरं अतिविह्वलंकिमिति करोषिन किंचित्प्रयोजनमित्यर्थः ॥ ७ ॥ 317819

श्रीजयदेवभणितमतिललितं ॥ सुखयतु रसिकजनं हरिचरितं ॥ ८ ॥ इतिश्रीगी तगोविंदे अष्टादशप्रबंधः ॥ १८ ॥

श्रीजयदेवेति श्रीजयदेवभणितंउक्तंहरिचरितंकर्तृ रसिकजनं कृष्णभाविकजनंसुखयतु सुखितंकरोतु की दृशं अतिललितं अतिसुंदरंश्राव्यमित्यर्थः कीदृशंजनं स विनीतं अतिविनययुक्तं पाठे ॥ ८ ॥

श्लो० ॥ स्निग्धेयत्परुषासियत्प्रणमति स्त ब्धासियद्रागिणि द्वेषस्थासियदुन्मुखेवि मुखतां यातासितस्मिन्प्रिये ॥ तद्युक्तंवि परीतकारिणि तवश्रीखंडचर्चाविषंशीतां

317819

शशस्तपनो हिमं हुतवहः क्रीडामुदो यातनाः १

इदानीं प्रणतमपि प्रियमतिरोषात् त्यजंतीं राधां निंदंती सखी आह स्निग्ध इति हे विपरीतकारिणि विपर्ययविधायि- निराधे त्वंस्निग्धे मधुरवादिनि तस्मिन् प्रियेकृष्णे यत्परुषा- सि निष्ठुरभाषिणि आसि वर्तसे किंच तस्मिन्प्रिये प्रणमतिस ति विनययुक्ते सति यत्स्तब्धासि स्थाणुवत् स्थितासि यत् रागिणि सानुरागे प्रिये द्वेषस्थासि असंतुष्टासि यत् उन्मुखे संमुखे तस्मिन् प्रिये विमुखता पराङ्मुखतां यातासि तस्मात् श्री खंडचर्चा चंदनकृणापि तवविषमिव शीतांशुश्चंद्रः तपनः सू र्यइव हिमं तुषारः हुतवहः अग्निरिव क्रीडामुदः क्रीडासंतो षाः यातना वेदना युक्तिमुक्तमेव योग्यमेव तव मदीयवचनं विप रीतकारित्वात् विरोधालंकारः शार्दूलविक्रीडितवृत्तं ॥१॥

श्लो०॥ अंतर्मोहनमौलिघूर्णनचलन्मंदार विस्रंसनः स्तब्धाकर्षणदृष्टिहर्षणमहामंत्रः कुरंगीदृशां ॥ दृप्यद्दानवदूयमानदिविषद्दु र्वारदुःखापदां भ्रंशः कंसरिपोर्व्यपोहयतु वोश्रेयांसि वंशीरवः ॥ २॥

इतिश्रीकविराजश्रीजयदेवकृते गीतगोविं दे महाकाव्ये मुग्धमुकुंदवदनो नाम न वमः सर्गः

इदानीं कविर्भक्तानाशिषयति अंतरिति कंसरिपोः कृ ष्णस्य वंशीरवो वेणुनादः वः युष्माकं भक्तानां श्रेयांसि

अशक्शानिव्यपोहयतुखंडयतु कीदृशोवंशीरवः कुरंगीदृ- शांहरिणीनयनानांअंतर्मोहनंमनोमोहः मौलिघूर्णनंसाधु साध्विति शिरः कंपनं वलन्मंदारविस्रंसनंगुंफितपारिजात- पुष्पाधः पतनंसात्विकभावात् स्तब्धाकर्षणंस्तब्धस्य अनिच्छो राकर्षणं दृष्टिहर्षणंनेत्रोत्साहः एतेषुसर्वेषुमहामंत्रः वंशीर वाकर्षेसर्वानायिकाः कामभावापन्नाभविष्यंतीतिभावः पुनः कीदृशः दर्पवद्भिर्दानवैर्दैत्यैर्दूयमानानांदिविषदांदेवता नांदुर्वाराअनिवार्याः आपदः स्वसाधनीभूताःविपत्तयस्तासांभ्रं शः नाशकः वंशीरवंश्रुत्वादुःखिताअपिदेवाः मुदमुद्वहंती- त्यर्थः मुग्धोमूढः अलसः॥२॥

अथदशमः सर्गःप्रारभ्यते

श्लो०॥ अत्रांतरेमसृणरोषवशामसीमनिः
श्वासनिःसहमुखींसुमुखीमुपेत्य॥ सव्री
डमीक्षितसखीवदनांदिनांते सानंदगद्गद
पदंहरिरित्युवाच॥१॥

इदानीसोत्कंठः कृष्णोराधांदृष्ट्वाअनुनयन्नाह अत्रेति अत्रांतरेअस्मिन्नवसरे हरिः दिनांतेसंध्यासमये तांसुमु खींराधांसमुपेत्यसमीपमागत्यसानंदानि अतएवगद्गदा निकंठादत्यंनिर्गच्छंतिपदानि यस्यांक्रियायांतद्यथाभवति तथा वक्ष्यमाणंउवाच कीदृशींराधां मसृणस्य कर्कशस्यक्रो धस्यवशांअधीनांपुनः किंभूतांअसीमस्यमहतोनिश्वास स्यनिः सहंसोढुं असमर्थंमुखंयस्याः सातांकोपवदना-

मित्यर्थः पुनः किंभूतां सव्रीडं सलज्जं ईक्षितं दृष्टं सख्याः व
त्रंसुखं यया सातां पश्य कृष्णाचेष्टित मित्यर्थः ॥१॥

अथ एकोनविंशप्रबंधो देशवराडीरागेण
आडवतालेगीयते.

वदसि यदि किंचिदपि दंतरुचिकौमुदी हरति
दरतिमिरमतिघोरं ॥ स्फुरदधरसीधवेतव
वदनचंद्रमा रोचयति लोचनचकोरं ॥१॥ प्रि
येचारुशीले प्रियेचारुशीले मुंचमयिमान
मनिदानं ॥ सपदिमदनानलोदहतिममभा
नसं देहिमुखकमलमधुपानं ॥ ध्रु० ॥

उत्कमर्थं गीतेनाह वदसीति गीतस्यास्य देशवराडीरा
गः अष्टतालीतालः रागलक्षणं आरब्धगमनमुद्रानिद्रा
घूर्णायमाननयनयुग्माद्या रूरवशायिनिनिजदयिते देश
वराडीभवेद्गौरीति लघु द्रुतौ लघुश्चेत्यष्टताली प्रकीर्तितेति
गीतार्थस्तु हेचारुशीले मनोहरसद्वृत्ते प्रियेराधे त्वंमयि अ
निदानं अकारणं मानं मुंच त्यज किमिति मानत्यागस्तत्राह
मदनानलः कामाग्निर्ममानसं दहति अतः कारणात्सपदि
दाहानंतरमेव मुखकमलमधुपानं मुखमेव पद्मं तत्संबंधि
मधुपानं देहि मधुना वन्हिदाहः प्रशाम्यति ध्रुवपद हेराधे
त्वं यदि यदा किंचिदपि वदसि तदा तव दंतानां रुचिः दीप्तिः
सैव कौमुदी चंद्रज्योत्स्ना अतिघोरं अतिशयेन भयंकरं द
रः भयं स एव तिमिरमंधकारं हरति नाशयति अतश्च तव वद

नत्वं द्रमाइवसः स्फुरदधरसीधवे दीप्यमानाधरामृतार्थेतादर्थ्येचतुर्थी ममलोचनचकोरं नेत्रपक्षिविशेषं रोचयतिरुचिं इच्छांकारयति ममलोचनचकोरं चकोरः पक्षिविशेषः चंद्रामृतलोलुपोमयत्येव ॥१॥

सत्यमेवासियदिसुदतिमयिकोपिनी देहि
खरनखरशरघातं ॥ घटयभुजबंधनंजनय
रदखंडनं येनवाभवतिसुखजातं ॥ २॥

मृषारोषं प्रकारयंतीमाह सत्यमिति हेसुदतिशोभनदंतेयदिमयिविषयेसत्यमेवकोपिनी क्रोधवती असि तदाखरास्तीक्ष्णा येनखराः नखास्तेएवशराबाणास्तैर्घातं प्रहारं देहि तेनापिचेन्नतुष्यसि तर्हि भुजाभ्यां बंधनं घटयकुरु रदैः दंतैःखंडनंघातंजनयविरचय याअथवायेन मुख्यादिनासुखजातं सुखसमूहो भवति तदेवकुरु प्रभूणांहि सापराधेषु जनेषु ताडनबंधनखंडनादयो दंडाः समुचिताः ॥२॥

त्वमसिममभूषणंत्वमसिममजीवनं त्वम
सिममभवजलधिरत्नं ॥ भवतुभवतीहम
यिसततमनुरोधिनी तन्ममहृदयमतिय-
त्नम् ॥ ३॥

ननुपातिप्रियासा दंडंविदधातु किंमयातआह त्वमसीति हेराधेत्वंममजीवनंप्राणोसि त्वांविनास्थातुमशक्यत्वात् त्वंममभूषणंअलंकारोसि त्वंममभवजलधौसंसार

सागरे त्वमसि जातोजातोयदुरूकुले नरत्नमभिधीयते इति त्वोरत्नंउक्तं इदृएतादृशेमयि भवती सततं निरंतरं अनुरोधिनी अनुकूलाभवतु तवानुकूल्येममत्द्दयं मनः अतियत्नं अतिशययत्नयुक्तं भवति तवानुकूल्यार्थं अतिशयं यत्नं करोतीत्यर्थः ॥३॥

नीलनलिनाभमपितन्वितवलोचनं धारयति कोकनदरूपम् ॥ कुसुमशरबाणभावेनयदि रंजयसि कृष्णमिदमेतदनुरूपं ४

नीलेति हेतन्विकृशांगि नीलनलिनस्य नीलोत्पलस्येवाभा कांतिर्यस्य तत्तवलोचनं कोकनदरूपं रक्तोत्पलस्वरूपतां धारयति धत्ते रोषारुणत्वात् यदिइदंचक्षुः कृष्णं श्यामंकुसुमशरः कामस्तस्यबाणः पुष्पाणितेभ्योभाव उत्पत्तिर्यस्य मधुनस्तेनरंजयसिरक्तंकरोषि तदाएतद्रक्तरूपं अनुरूपं योग्यंभवति यदिमधुपानंकरोषि तदानेत्रस्य रक्तत्वमुचितंनरोषादितिभावः ॥४॥

स्फुरतुकुचकुंभयोरुपरिमणिमंजरीरंजयतुतवहृदयदेशं ॥ रसतुरसनापितवघनजघनमंडलेघोषयतुमन्मथनिदेशं ॥५॥

किंचित्प्रसन्नांवीक्ष्याह स्फुरत्विति हेराधे मणिमंजरीहारलतात्वत्कुचकुंभयोः कुचकलशयोरुपरिस्फुरतुशोभतां सारत्नखतातवहृदयदेशंवक्षःप्रदेशंरंजयतुस्वरश्मिभिः शोभयतु तवजघनमंडलेनिबिडकटिपुरोभागदे

शेरशनापि कांच्यपि रसतु शब्दं करोतु साकांचीमन्मथनिदेशं कामार्त्ता घोषयतु शब्दायतां वचनचातुर्येण स्फुरतु मणिमंजरी रसतु रसनादि इत्यादिना विपरीतरतं याचते ॥५॥

स्थलकमलगंजनं ममहृदयरंजनं जनितरतिरगपरभागं ॥ भणमसृणवाणि करवाणि चरणद्वयं सरसलसदलक्तकरागं ॥६॥

हे मसृणवाणि स्निग्धवचने भण आलापय अहं नवचरणद्वयं सरसः सांद्रः सहरसेन शृंगारेण वर्तते इति वा सरसं यथास्यादेवं लसत् शोभमानः अलक्तकरागो यावकरागो यत्र एतादृशं करवाणि कुर्यां प्रार्थनायां लोट् कथंभूतं चरणद्वयं स्थलकमलस्य गंजनं तिरस्कारकं सदृशमित्यर्थः पुनः कीदृशं ममहृदयरंजनं अनुरागकारकं पुनः कीदृशं जनितउत्पादितो रतिरंगे सुरतकौशले संभोगरागस्य वा परभागः परस्परशोभायेन मयालक्तकेन चेदिदं रज्यते तदेदमपि क्रौंचबंधादौ ममहृदये लग्नं लग्नां मत्परां शोभां परस्परं दास्यतीति भावः ॥६॥

स्मरगरलखंडनं ममशिरसि मंडनं देहिपदपल्लवमुदारं ॥ ज्वलति मयि दारुणो मदनकदनानलो हरतु तदुपाहितविकारं ॥७॥

स्मरेति त्वं उदारं मनोहरं पदपल्लवं ममशिरसि मंडनं अलंकारमिव देहि अर्पय कीदृशं पदपल्लवं स्मरगरलस्य कामविषस्य खंडनं नाशकं कामपीडानिवर्तकमित्यर्थः मयि

दारुणः क्रूरकर्मा मदनकदनानलः कामपरितापवन्हिः ज्व
लतिदीप्यते पदपल्लवंकर्तृ तदुपहितविकारं मदनकृतोप
तापं हरतु शिरःपीडानिवर्त्तनेन शरीरपीडानिवृत्तिरिति·
शिरसिदानं अथवापल्लवाच्छादितशिरसः स्पर्शतापोन·
भवतीति ॥ ७ ॥

इतिचटुलचाटुपटुचारुमुरवैरिणो राधिका
मधिवचनजातं ॥ जयतिजयदेवकविभार
तीभूषितंमानिनीजनजनितशातं ॥ ८ ॥ इ
तिश्रीगीतगोविंदेऊनविंशतिमः प्रबंधः १९

इतीति इत्यमुनाप्रकारेण मुरवैरिणः कृष्णस्य राधिकां
अधिअनुराधिकां लक्षीकृत्य प्रोक्तं वचनजातं वाक्यसमूहो
जयति उत्कर्षेण वर्द्धते कीदृशं चटुलं चाटुप्रीतिसूक्तं पटुच
तुरं चारुसुकुमारं पुनः कीदृशं जयदेवकवेः भारत्यावाण्या
भूषितं मानिनीजनस्यजनितं शातंसुखंयेनतत्तादृशं जय
तिपद्मावतीरमणजयदेवकविभारती भणितमतिशातं मि
तिपाठांतरे पद्मावतीजयदेवस्य पत्नीतस्याः रमणोवल्लभो
योजयदेवस्तेन भारतीसंज्ञ याकवित्वं वर्णितं पुनःकीदृशं
अतिशातं अतिशयितसुखं यस्मात्तादृशमितिव्याख्यानं
संदंतथासति पीनरुक्त्यापत्तेः प्रथमपाठस्तु समीचीन एव ८

श्लो० ॥ परिहरकृतातंकेशंकां त्वयासततं
घनस्तनजघनयाक्रांतेस्वांते परानवकाशि
नि ॥ विशतिवितनोरन्यो धन्योनकोपिममां

तरं स्तनभरपरीरंभारंभे विधेहि विधेयतां १

इदानीमात्मानं निरपराधं ज्ञापयन् संभोगार्थं प्रोत्साह्य आह परिहरेति हे कृतातंके विहितकोपे राधे त्वं शंकां त्यज त्वया क्रांते व्याप्ते सति वितनोः कामादन्यो धन्यः जनः कोपि ममांतरं अभ्यंतरं न विशति न प्रविशति कीदृश्यां त्वया घने कठिने स्तनजघने यस्याः तया कीदृशे स्वांते अतएव परानवकाशिनि अन्यस्यावकाशशून्ये हे प्रणयिनि यतो ममांतरं काम एव विशति अतः स्तनभर परिरंभारंभे स्तनातिशयालिंगनोद्योगे विधेयतां कर्तव्यतां विधेहि कुरु मामालिंगेत्याशयः १

श्लोकः ॥ मुग्धे विधेहि मयि निर्दय दंतदंशं दोर्वल्लिबंधनिबिडस्तनपीडनानि ॥ चंडि त्वमेव मुदमंचय पंचबाणचंडालकांडदलनादसवः प्रयांति ॥ २ ॥

यद्येवं न प्रत्येषि तदा मय्यपराधानुकूलं दंडमाचरेत्याह मुग्धेति हे मुग्धे मूढे सुंदरि वा मयि निर्दयदंतदंशं दयारहितं दंतक्षतं विधेहि कुरु किंच दोर्वल्लिबंधो भुजलताबंधस्तेन निबिडं दृढं यथा स्यात्तथा स्तनाभ्यां पीडनानि विधेहि हे चंडि कोपनशीले त्वमेव मम मुदं प्रीतिं अंचजनयनत्वस्यां ममानुराग इत्यर्थः उद्वहेति पाठे कुरु नोचेत् पंचबाणः कामः सएव चंडालस्तस्य कांडदलनाद्बाणक्षतात् असवः मम प्राणाः प्रयांति गच्छंति अतो मयि प्रसीदेत्यर्थः २

श्लोकः ॥ शशिमुखि तव भाति भंगुरभ्रूर्युव

जनमोहनकरालकालसर्पी॥ तदुदितभय भंजनाययूनांत्वदधरसीधुसुधैवसिद्ध मंत्रः॥३॥

ननुकोपोनास्त्येवेत्यतआह शशीति हेशशिमुखि चंद्रवदने तवभंगुरभ्रुकुटिः कुटिलाभ्रूर्भातिशोभते कीदृशी युवजनानांतरुणजनानांमोहनायकराला भीषणा कालसर्पीकृष्णाहिवधूः तस्याःभ्रुवः सकाशादुदितं उत्पन्नंयद्भयंतस्यभंजनायनाशाययूनांतरुणानांतवाधरसीधुमधंतदेवसुधापानसाम्यान्माधुर्याच्चसैवसिद्धमंत्रः साधितमंत्रः विषापहरणार्थंअधरपानंदत्वा तवकोपसर्पदष्टस्यममजीवनंसंपादयेतिभावः॥ ३॥

श्लो०॥ व्यथयतिवृथामौनंतन्विप्रपंचयपंचमं तरुणिमधुरालापैस्तापंविनोदयदृष्टिभिः॥ सुमुखिविमुखीभावंतावद्विमुंचनवंचयं स्वयमतिशयस्निग्धोमुग्धेप्रियोहमुपस्थितः॥४॥

व्यथयतीति हेतन्विसुंदरि तववृथामौनंमांव्यथयति मांइतिज्ञातव्यं तस्मात् हेतरुणिमधुरालापैः कोमलवचनैः पंचमरागंप्रपंचय उद्गिर दृष्टिभिः अवलोकनैस्तापंमानसंतापंविनोदय अपसारय हेसुमुखिसुवदने विमुखीभावं दुष्टदृष्टित्वंविमुंचत्यज हेमुग्धेज्ञानशून्ये अहंप्रियः स्वयंआकरणंविनैवउपस्थितः आगतः अतएव

मेवचनंनवंचयनोलंघस्व कीदृशः प्रियः अतिशयस्निग्धः महावत्सलः स्वयमागतः हातुंनोचित इतिभावः ४

श्लो० ॥ बंधूकद्युतिबांधवोयमधरः स्निग्धो मधूकच्छविर्गंडश्चंडिचकास्तिनीलनलिन श्रीमोचनंलोचनं॥ नासाभ्येतितिलप्रसूनप दवींकुंदाभदंतिप्रियेप्रायस्त्वन्मुखसेवया विजयतेविश्वंसपुष्पायुधः ॥ ५॥

अधुनामानापनोदनाय तदंगस्तुतिंकरोति बंधूकेति हेचंडिकोपनशीले तवायमधरः बंधूकपुष्पस्यद्युतिः कांतिस्तस्या बांधवोमित्रसदृशश्चकास्तिशोभते तथास्निग्ध श्चिक्कणः गंडः कपोलश्चकास्ति कीदृशः मधूकपुष्पवच्छ विर्दीप्तिर्यस्यसः तथा तवलोचनंनेत्रंनीलनलिनश्रियंनी लोत्पलस्यकांतिंमोचयति तवनासा नासिकातिलप्रसून स्यतिलपुष्पस्यपदवींमार्गसादृश्यमित्यर्थः अभ्येतिप्रा प्नोति हेकुंदाभदंति कुंदपुष्पस्येवाभायेषांतादृशादंतायस्यास्तादृशि हेप्रियेवल्लभे प्रायइतितर्कयामि प्रसिद्धः पुष्पायुधः पुष्पमेवायुधशस्त्रंयस्यसः कामस्त्वन्मुखसे वया विश्वंजगद्विजयतेवशीकरोतीत्यर्थः यानिकामस्य पुष्पायुधानि तानिबंधूकमधूकनीलोत्पलतिलकुंदपु ष्पादीनित्वन्मुखेवर्तंतइतिसेवाकारबंधूकइतिदुपहारि यामधूकइतिमहुआइतिकन्यकुब्जभाषायां ॥ ५॥

श्लो० ॥ दृशौतवमदालसेवदनमिंदुमत्या

न्वितं गतिर्जनमनोरमाविधुतरंभमूरुद्वयं ॥ रतिस्तवकलावतीरुचिरचित्रलेखे भ्रुवा वहोविबुधयोवतंवहसितन्विपृथ्वीगता ॥ ९ ॥

दृशाविति अहोइत्याश्चर्ये हेतन्विसुंदरि त्वंपृथ्वीगतापृथ्व्यांस्थितापि विबुधयौवनं देवयुवतीनांसमूहंवहसि केनप्रकारेणेत्यतआह तवदृशौ नयनेमदेनालसेमंथरे अवलोकनायमंदायतः तववदनंमुखंइंदुमत्यान्वंद्रकुल्या अन्वितंयुक्तं त्वन्मुखदर्शनेन सादृश्याच्चंद्रबुद्धिर्भवतीत्यर्थः तवगतिर्गमनंजनमनोरमा तवोरुद्वयंजंघायुगंविधुतास्वशोभयानिरस्कृतारंभाकदलीयेन तवरतिःस्मरतक्रीडाकलावती कामकलाकौशलयुक्ता तवभ्रुवौरुचिराचित्राणांलेखायययोस्ते यथाचित्रेश्यामालेखाविलिख्यते तथेति तदनयापदयोजनयामदालसा,इंदुमती, मनोरमा, रंभा,कलावती,चित्रलेखा संज्ञकाः अप्सरसः प्रतिपादिताः पृथ्वीगतेत्यपिच एकस्यामपित्वयिसर्वासामप्सरसांगुणाः वर्तंतइत्याश्चर्यं प्रेयोनामालंकारः पृथ्वीकंचेदंछंदः ॥ ९ ॥

श्लो० ॥ प्रीतिंवस्तनुतांहरिःकुवलयापीडेनसार्धंरणे राधापीनपयोधरस्मरणकृत्कुंभेनसंभेदवान् ॥ यत्रबिभ्यतिमीलतिक्षणमपिक्षिप्रंतदालोकना द्व्यामोहेनजि

तंजितंजितमभूत्व्यालोलकोलाहलः ७
इतिश्रीकविराजश्रीजयदेवकृतेगीतगो-
विंदेमहाकाव्येमानिनीवर्णनेचतुर
चतुर्भुजोनामदशमःसर्गः ॥१०॥

कविः सर्गांते आशिषंप्रयुंक्ते प्रीतिमिति हरिः कृष्णो वः युष्माकंगायतांशृण्वतांप्रीतिमानंदंतनुताद्विस्तार यतु कीदृशः रणेसंग्रामेकुवलयापीडेन कंसहस्तिनासा र्द्धंसह कुंभस्थलेहस्तेनसंभेदवान् संबन्द्धः अतस्तत्कु भेराधापीनपयोधरस्मरणकृत् राधिकायामांसलस्तन स्मृतियुक्तः हस्तिदर्शनेनपीनकुचस्मरणंयुज्यतएव तदु क्तं सदृशादृष्टचिंताद्याः स्मृतिजीवस्यबोधकाः पन्नेवा हनेबिभ्यति भयंगतेसति अथचमीलति मृतेसति जि तंजितंजितमिति कंससंबंधीव्यालोलश्चंचलः कोलाह लः अभूत्जातः कंसोबालेनजितः इतिसर्वैर्जनैः कल कलशब्दः कृतइत्यर्थः वचनकौशलेन मानिनीमानदा नात् चतुरः चतुर्भुजः कृष्णोयत्र ॥७॥

अथएकादशः सर्गः प्रारभ्यते.

श्लो० ॥ सुचिरमनुनयेनप्रीणयित्वामृगाक्षीं
गतवतिकृतवेषेकेशवेकुंजशय्यां ॥ रचितरु
चिरभूषादृष्टिमोषेप्रदोषे स्फुरतिनिरवसा
दांकापिराधांजगाद ॥ १ ॥

अधुनाराधाप्रतितत्सखीब्रूते रुचिरमिति कापिस-

त्वीप्रदोषेरजनीमुखेस्फुरतिदीप्यमानेसतिप्रासे इत्यर्थः राधांजगाद वक्ष्यमाणमितिशेषः कस्मिन्सति केशवेकृष्णेअनुनयेनप्रीतिवचनेनसुचिरंबहुकालंमृगाक्षींराधांप्रीणयित्वासंतोषयित्वा कुंजशय्यांललागृहशयनंगतवतिसति कीदृशेकेशवे कृतवेषे कृतश्रृंगारालंकारेराधायाइति कीदृशींराधां रचिताकृतारुचिरामनोहराभूषालंकारोयया कृष्णस्येति अन्योन्यालंकारकरणेनान्योन्यरागः सूचितः कीदृशेप्रदोषे अंधकाराधिक्येन दृष्टिंमुष्णातीति दर्शनचोरकेपुनःकीदृशींराधां निरवसादांनिर्गतः मानसभंगरूपोऽवसादःउपतापोयस्यास्तां ॥१॥

अथविंशः प्रबंधो वसंतरागेणरूपकतालेगीयते.

विरचितचाटुवचनरचनं चरणरचितप्रणिपातं ॥ संप्रतिमंजुलवंजुलसीमनिकेलिशयनमनुयातं ॥१॥ मुग्धेमधुमथनमनुगतमनुसरराधिके॥ ध्रु०॥

वसंतरागः उक्तार्थगीतेनाह विरचितेति हेराधिके मुग्धेमूढे अनुगतंअनुकूलं मधुमथनंकृष्णं अनुसरअनुगच्छ विरचिताउक्ताचाटुप्रियावचनरचनापरंपरायेनतं पुनःकीदृशं चरणेपादेरचितः कृतः प्रणिपातः प्रणामोयेनतं तन्मानभंगाय पुनःकीदृशं संप्रतिइदानींमंजुलोमनोहरोऽशोकोवेतसोवातस्यसीमनिपर्यंतेतटे केलिशयनंअ

रतार्थशय्यां अनुयातंप्राप्तमित्यर्थः अतस्त्वयाशीघ्रंगं-तव्यमिति ॥ १॥

घनजघनस्तनभारभरेदरमंथरचरणविहारं ॥ मुखरितमणिमंजीरमुपेहिविधेहिमरालविकारं ॥ २॥

तांप्रोत्साहयंतीत्वरयति घनेति घनयोर्मांसलयोः जंघनस्तनयोर्भारस्यभरोभाराधिक्यंयस्यास्तत्संबोधनं दरमंथरईषन्मंदश्चरणविहारः पादक्रमोयस्यांक्रियायां मुखरितः शब्दितः मणिमंजीरो मणिसहितमंजीरोयस्यांक्रियायांतंकृष्णमुपेहिउपगच्छ अतएवमरालानांराजहंसानांविकारंविलासंविधेहिकुरु ॥ २॥

शृणुरमणीयतरंतरुणीजनमोहनमधुरिपुरावं ॥ कुसुमशरासनशासनवंदिनिपिकनिकरेभजभावं ॥ ३॥

अन्यमप्युद्दीपनविभावंवर्णयति शृण्विति त्वंरमणीयतरं अतिमनोहरंश्राव्यं तरुणीजनानांमोहनं मधुरिपोः कृष्णस्यरावंवंशशब्दंशृणुआकर्णय मधुपविरावमितिपाठे भ्रमरशब्दं किंचपिकनिकरे कोकिलसमूहे कुसुमान्येवशरासनंधनुर्यस्यसतादृशः कामस्तदाज्ञातयावंदिनिस्तावकेसति भावंकृष्णेऽनुरागंभजआश्रय हेमानिन्यः मानंत्यक्त्वाशृंगारभजनंकुरुतेति कोकिलाः घोषयंतीत्यर्थः ॥ ३॥

अनिलतरलकिसलयनिकरेणकरेणलता
निकुरंबं ॥ प्रेरणमिवकरभोरुकरोतिगतिं
प्रतिमुंचविलंबं ॥ ४ ॥

अनिलेति हेकरभोरु कनिष्ठांतो मणिबंधपर्यंतं करस्यबाह्यभागस्तद्वदूरूजंघाद्वयंयस्यास्तत्संबोधनं गतिं गमनं प्रति विलंबंमुंच शीघ्रंगच्छेतियावत् यतः लतानिकुरंबंलतासमूहं अनिलेनतरलश्चंचलोयः किसलयनिकरः पल्लवसमूहस्तद्रूपेण करेण हस्तेन नवप्रेरण मिवक्षापनमिवकरोति अचेतनो लतापित्वांप्रेरयति किंपुनरहं ॥ ४ ॥

स्फुरितमनंगतरंगवशादिवसूचितहरिपरि
रंभं ॥ पृच्छमनोहरहारविमलजलधारम
मुंकुचकुंभं ॥ ५ ॥

अपिच स्फुरितमिति हेराधे त्वं अमुंकुचकुंभं स्तनद्वयंपृच्छ सम्यग्गतिवर्तुलत्वात्काठिन्यत्वाच्चकुंभसाम्यं कीदृशंकुचकुंभं अनंगस्यकामस्ययेतरंगाविकारास्तद्वशादिवस्फुरितंसकंपं अतएवसूचितः हरेःपरिरंभः आलिंगनंयेन अन्योपिकलशोनद्यांतरंगैःप्रेर्य्यमाणःसकंपोभवति इवशब्दोत्रोत्प्रेक्षकाद्योतकः पुनःकीदृशं मनोहरोयहारःसएवविमलानिर्मलाजलधारायत्र ॥ ५ ॥

अधिगतमखिलसखीभिरिदंतववपुरपि
रतिरणसज्जं ॥ चंडिरसितरशनारवडिंडि
ममभिसरसरसमलज्जं ॥ ६ ॥

अधिगतमिति हेचंडि अत्यंतकोपने इत्याक्षेपेसंबोधनं अखिलसखीभिरपितवेदं वपुः शरीरं रतिरणेस्मरतसंग्रामेसज्जंसन्नद्धं अधिगतंज्ञातंतवमनसि अभिमानोनास्तीत्यर्थः एवंसति रसिताशब्दिता रशनाक्षुद्रघंटिकासेव आरवडिंडिमोवाद्यविशेषोयस्यांक्रियायां सरसंसोत्कंठंयथास्यात्तथा अलज्जं लज्जारहितं यथास्यात्तथाऽभिसरकृष्णामित्यध्याहारः ॥६॥

स्मरशरसुभगनखेनसखीमवलंब्यकरेण
सलीलं॥ चलवलयक्वणितैरवबोधय हरि
मपिनिजगतिशीलं॥७॥

स्मरेति हेराधे त्वंकरेणहस्तेन सखीं अवलंब्यसलीलं सविलासंयथास्यात्तथा चलगच्छ कीदृशेनकरेण स्मरशरवत्कामबाणवत्सुभगानि सुंदराणि नखानियस्मिन्‌रणेशस्त्राणिभवंति रतिरणेतुनखान्येवस्मरस्यशस्त्राणीतिभावः गत्वाचवलयक्वणितैः कंकणशब्दैः हरिंकृष्णंअवबोधय अहमागतेतिज्ञापयेत्यर्थः अपिक्रियासमुच्चये कथंभूतंहरिं निजेआत्मनिगतिर्यस्य सनिजगतिः कामस्तस्मिन्‌शीलंसमाधिश्चित्तैकाग्र्यंयस्य कामपरवशमित्यर्थः॥७॥

श्रीजयदेवभणितमधरीकृतहारमुदासित
वामं॥ हरिविनिहितमनसामाधितिष्ठतुकं
ठतटीमविराम॥८॥ इतिश्रीगीतगोविं

द्वेविंशतिमः प्रबंधः

श्रीजयदेवेति श्रीजयदेवेन भणितं गीतं हरौ कृष्णे विनिहितमारोपितं मनश्चित्तं येस्तेषां भक्तानां कंठतटीं अविरामं सर्वदा अधितिष्ठतु कंठदेशेवसत्वित्यर्थः अधिशीडुस्थासामाधरिकर्म कीदृशंभणितं अधरीकृतः स्वगुणोहीनः कृतः मुक्ताहारोयेन पुनः कीदृशं उदासितास्वगुणैस्तिरस्कृतावामासुंदरीयेन यद्यपि हारस्यरमणांचकंठदेशस्थितस्ययाशोभा तत्प्रदत्वं संभवति तथापि तयोरागिणामेवशोभाप्रदत्वं नतुमुमुक्षूणां तत्रापि तारुण्य एव नतुसर्वदा जयदेवभणितं तु कृष्णकथात्वेन हारापेक्षयाचाधिकमित्यर्थः ॥८॥

श्लो०॥ सामां द्रक्ष्यति वक्ष्यति स्मरकथां प्रत्यंगमालिंगनैः प्रीतिं यास्यति रंस्यते सखि समागत्येति चिंताकुलः ॥ सत्वां पश्यति वेपते पुलकयत्यानंदति स्विद्यति प्रत्युद्गच्छति मूर्छति स्थिरतमः पुंजे निकुंजे प्रियः १

इदानीं सखी कृष्णस्यस्नेहातिशयमाह सामामिति हेराधे सप्रियः कृष्णः स्थिरे निश्चले तमः पुंजे अंधकारसमूहे अन्यत्र तस्मिन्निकुंजे लतागृहे त्वां पश्यति ध्यानेन दृष्ट्वापि किमियं परुषं मधुरं वदिष्यतीति भयात् वेपते कंपते पुलकयति अंगानीत्यर्थात् ध्यानेनैव तदालिंगनं परिकल्प्य सरोमांचोभवतीत्यर्थः ध्यानेन तत्कृत तकेलिं परिक

ल्यस्विद्यति पश्चात्केलिंकृत्वा उत्थायगंतुं प्रवृत्तायांत्व यिप्रत्युद्गच्छति प्रत्युत्थानंकरोति ततः ध्यान विच्छेदे त्वामदृष्टामूर्छति कीदृशः प्रियः चिंताकुलः चिंतायुक्तः इतीतिकिं हेसखि साराधा मांद्रक्ष्यति अनुकूलतयाईक्ष ते दृष्ट्वाचप्रियकथांमनोहरांकथांवक्ष्यतिवदिष्यतिउ क्काप्रत्यंगंप्रति अवयवंप्रति आलिंगनैः प्रीतिंसंतोषंया स्यति प्राप्स्यति समागम्यमिलित्वारंस्यते मयासहक्री डिष्यति इतिप्रश्नेसमागम्येतिपूर्वार्द्धं सर्वत्रयोज्यं दीपका लंकारः शार्दूलविक्रीडितंवृत्तं ॥१॥

श्लो०॥ अक्ष्णोर्निक्षिपदंजनंश्रवणयोस्ता
पिच्छगुच्छावलींमूर्ध्निश्यामसरोजदामकु
चयोःकस्तूरिकापत्रकम्॥ धूर्तानामभि
सारसत्वरहृदांविष्वक्निकुंजेसखिध्वां
तंनीलनिचोलचारुसुदृशांप्रत्यंगमालिं
गति॥२॥

गमनकालयोग्यंअंधकारंवर्णयति अक्ष्णोरिति हे सखिराधे ध्वांतंअंधकारः सुदृशांनायिकानांप्रत्यंगंप्रत्य वयवं आलिंगति आश्लिष्यति किंकुर्वत् अक्ष्णोर्नेत्रयोरं जनंकज्जलं निक्षिपत् विन्यस्यत् श्रवणयोः कर्णयोः तापिच्छगुच्छावलीं तमालपुष्पस्तवककर्णपूरं किंनि क्षिपत् कुचयोः स्तनयोः कस्तूरिकापत्रकं मृगमदपत्राव लींनिक्षिपत् मस्तकेश्यामसरोजदामनीलकमलमालां

निक्षिपत् कीदृशीनांस्फदृशां धूर्तानांपरिवंचकानां पुनः कीदृशीनां विष्वक्सर्वत्र निकुंजे लतागृहे अभिसाररसत्वरंगमनायसाहसंत्द्दत् यासांतास्तासां कीदृशंध्वांतं नीलनिचोलवत् श्यामवस्त्रवत् चारु सदृशमित्यर्थः नीलवस्त्रस्थानेध्वांतंजातमित्यर्थः अतोऽभूषणादिनिर्माणेनापिकालातिक्रमोनयुक्त इति भावः ॥२॥

श्लो०॥ काश्मीरगौरवपुषामभिसारिका-
णामाबद्धरेखमभितोमणिमंजरीभिः॥ ए
तत्तमालदलनीलतमंतमिस्रं तत्प्रेमहेमनि
कषोपलतांतनोति॥३॥

अंधकारमेववर्णयति काश्मीरेति हेराधे एतत्तमिस्रं अंधकारः तत्प्रेमतासामभिसारिकाणांयत्प्रेम प्रीतिस्तदेव हेमसुवर्णं तस्यनिकषोपलतां घर्षणपाषाणतांतनोति विस्तारयति कीदृशंतमिस्रं काश्मीरकुंकुमंतद्वद्गौरं पीतंवपुर्यासांतासामभिसारिकाणां स्त्रीणांमणिमंजरीभिः मणि किरणैः अभितः सर्वतः आबद्धाकृतारेखायस्मिन् तमालदलंनूतनपत्रं तद्वन्नीलतमं अतिश्यामं कांतार्थिनीतुयायातिसंकेतं साभिसारिकेत्यमरः इत्यभिसारिकालक्षणं अभिसारिकाणांप्रेमपरीक्षासमयस्त्वयमेव यदंधतमसिगमनमिति ३

श्लो०॥ हारावलीतरलकांचनकांचिदाम
केयूरकंकणमणिद्युतिदीपितस्य॥ हारेनि
कुंजेनिलयस्यहरिंनिरीक्ष्य व्रीडावतीम·

थसखीनिजगाद्राधां॥ ४॥

हारावलीति अथानंतरं सखीराधांनिजगाद पुनरपि उवाच कथंभूतांराधां निकुंजनिलयस्य लतागृहमेवनि लयं निभृतगृहंतस्य द्वारे हरिंकृष्णंनिरीक्ष्य दृष्ट्वा व्रीडाव तींसलज्जा अस्मिन्मयाकति निष्ठुराणि वचांसिउक्ता निसंप्रतितत्समक्षं कथंयामीतिलज्जा कीदृशस्यनिलय स्य मुक्ताहारमध्यद्युमणेः द्युत्याकांचनकांचीदाम्नः सुव र्णकांचीरशनायाः द्युत्या केयूरस्यबाहुभूषणस्यच द्युत्या एतेषु खचितायेमणयस्तेषांद्युत्यादीपित स्य प्रकाशितस्य एतेन ध्वांतेपिदर्शनयोग्यता उक्ता ४

अथएकविंशतिमप्रबंधो वराडीरागेण आ डवतालेगीयते॰

मंजुतरकुंजतलकेलिसदने॥ प्रविशराधे माधवसमीपमिहविलस ॥ रतिरभसह सितवदने॥१॥

तदेवगीतेनाह॰ वराडीरागे मंजुतरेति हेराधेरतिरभ सेनस्फुरतोत्साहेन हसितं हास्ययुक्तं वदनंमुखंयस्यास्त त्संबोधनं इहअस्मिन्मंजुतरं मनोहरंनिकुंजाभ्यंतरदे शस्तदेव केलिसदनंक्रीडागृहंतस्मिन् माधवसमीपं प्र विशागच्छपश्चाद्विलसक्रीडांकुरु॥१॥

नवभवदशोकदलशयनसारे॥ प्र॰ ॥ कु चकलशतरलहारे॥२॥

अपिच नवेति हेकुचकलशयोश्चंचलहारो मुक्ताहारो
यस्यास्तत्संबोधनं हेराधे इहक्रीडागृहेमाधवसमीपंप्र
विशविलसच कीदृशे इह नवानिनूतनानिभवंतियानिअ
शोकदलानिपर्णानितत्कृताशय्या कृष्णशय्यातदेवसारो म
हाधनंयस्मिन् ॥२॥

कुसुमचयरचितशुचिवासगेहे ॥ प्र० ॥ कु
सुमसुकुमारदेहे ॥ ३ ॥

कुसुमेति हेकुसुमवत्सुकुमारो देहो यस्यास्तत्संबोध
नंकीदृशेइह कुसुमचयेनपुष्पसमूहेनरचितंकृतं शु
चिअनुपहतं नायिकांतरेणानुपभुक्तंयद्वासगृहंतत्रविल
स ॥३॥

मृदुचलमलयपवनसुरभिशीते ॥ प्र० ॥ रस
वलितललितगीते ॥ ४ ॥

मृदुचलेति हेरसवलितंकृतंललितंमनोहरंगीतंय
यातत्संबुद्धिः हेराधे इहकोकिलसदनेविलस कीदृशेइ
ह चलश्चंचलोयोमलयपवनस्तेन संपर्कवशात् सुरभि
एवंभूतंसत् शीतलंतस्मिन् ॥४॥

विततबहुवल्लिनवपल्लवघने ॥ प्र० ॥ चिर
मीलितपीनजघने ॥ ५ ॥

विततेति हेचिरमीलिते बहुकालेअन्यन्यसंबंधेपी
नेमांसलेजघनेयस्यास्तत्संबुद्धिः हेराधे इहविलस की
दृशेइह वितताइतस्ततोविशीर्णाबहुवल्लयः पल्लवस्ता

सांनवपल्लवास्तैर्घनेनिबिडे शयने इत्यध्याहारः निबिड शयन इत्यर्थः॥५॥

मधुमुदितमधुपकुलकलितरावे॥ प्र०॥
मदनरभसरसभावे॥ ६॥

मधिनि हेमदनरभसः कामरभसः श्रृंगारभावोऽभिप्रायो यस्यास्तत्संबुद्धिः कीदृशेइह मधुनि पुष्परसे मीलितानिलत्पानार्थमित्यर्थः यानि मधुपकुलानि भ्रमरसमूहास्तैः कलितः कृतोरावः शब्दोयस्मिन् ॥६॥

मधुतरलपिकनिकरनिनदमुखरे॥ प्र०॥
दशनरुचिरुचिरशिखरे॥ ७॥

मधुतरलेति हेदशनरुचिरे नवदंतदीप्तिरेवरुचिरं शिखरं माणिक्यविशेषो यस्यास्तत्संबुद्धिः कीदृशे इह मधुनापुष्परसेन तरलश्चंचलः पिकनिकरो भ्रमर समूहस्तस्य निनदेनशब्देन मुखरे शब्दायिते पक्वदाडिमबीजाभं माणिक्यंशिखरं विदुः इतिशाश्वतः ॥७॥

विहितपद्मावतीसुखसमाजे। कुरुमुरारे मंगलशतानि भणतिजयदेवकविराजराजे॥ ८॥ इतिश्रीगीतगोविंदे एकविंशतिमः प्रबंधः॥ २१॥

विहितेति हेमुरारे कृष्णात्वंजयदेवकविराजे मंगलशतानिकुरु कीदृशेजयदेवकविराजे विहितः कृतः पद्मावत्याः स्वस्त्रियः सुखसमाजः शुभसमूहोयस्मिन् एतेन

स्वनायिकायामेव प्रेमातिशयो दर्शितः नत्वन्यस्यां पुनः कीदृशे भणतिन्वगुणान्वदति कविअविशराधे माधव समीपभणितेतिपाठः॥८॥

श्लो०॥ त्वांचित्तेनचिरंवहन्नयमतिश्रांतो
भृशंतापितः कंदर्पेणचपातुमिच्छतिसु
धासंबाधबिंबाधरं॥ अस्यांकंतदलंकुरु
क्षणमिहभ्रूक्षेपलक्ष्मीलवक्रीतेदास
इवोपसेवितपदांभोजेकुतःसंभ्रमः॥१

त्वामिति हेराधे अयंकृष्णस्तवसुधयामृतेनसंबाधंग हनं बिंबाधरंपातुमिच्छति कीदृशः कृष्णः यतः चित्तेनम नसात्वांचिरंवहन् अतिश्रांतः यतः कंदर्पेणभृशं तापितः अन्योपिभारवाहीसूर्यतापितश्चजलानि पातुइच्छति त द्वदित्यर्थः तत्तस्मादस्यकृष्णस्यांकंक्रोडं क्षणं मुहूर्तमा त्रअलंकुरुभूषय तत्समीपंगंतुंबिभेमीत्यत आह इह कृष्णेसंभ्रमः भयंकुतः कीदृशेइह दासइव सेवकइव स्थिते पुनःकीदृशे भ्रूक्षेपःकटाक्षक्षेपः सएवलक्ष्मीः सं पत्द्रव्यंतेनलवक्रीतेनूतनः क्रीतो दासोऽतिभीतोभवती तिभावः अतएवउपसेवितं पदांभोजं चरणकमलंयेन॥१

श्लो०॥ सासस्माध्वससानंदंगोविंदेलोल
लोचना॥ सिंजानामंजुमंजीरंप्रविवेश
निवेशनम्॥२॥

सेति साराधा निवेशनं लतागृहं प्रविवेश सखीवच

नात् कीदृशीराधा ससाध्वसंविदग्धः कृष्णः कथंमयारं
जनीयइति सानंदंसहर्षंचइतिनेकस्यात् गोविंदेकृष्णे लो
लेलोचनेयस्याः सलज्जत्वात् पुनःकीदृशी मनोहरशब्दयु
क्तंमंजीरंनूपुरंसिंजानागमनवशात्सशब्दंकुर्वती क्वचित्सा
ध्वससानंदगोविंदेइतिपाठः तदाससाध्वसः पूर्वापराधा
त् सानंदःराधायाःआगमनात् एवंनागरयोः समागमेरसो
त्पत्तिरुक्ता॥२॥

अथद्वाविंशतिमप्रबंधोवराडीरागेणरूपकतालेगीयते·

राधावदनविलोकनविकासितविविधवि·
कारविभंगं॥जलनिधिमिवविधुमंडलद
र्शनतरलिततुंगतरंगं॥१॥ हरिमेकरसं·
चिरमभिलषितविलासं॥ सादर्शगुरु
हर्षवशंवदवदनमनंगनिवासं॥ ध्रु०॥

लीलागृहप्रवेशं निरूप्येदानीं दर्शनमहोत्सवेन रसः
विक्रियांगीतेनाह वराडीरागः रूपकतालः साराधा एवंभू
तंहरिंददर्श सप्तपद्यां सर्वाणि हरिविशेषणानि कीदृशं ह
रिं राधावदनविलोकनेन विकासितः प्रकाशितः विविधः
नानाप्रकारः विभागः विभंगोकटाक्षादिरचनायेनतं पुनः
कीदृशं जलनिधिंसमुद्रमिवस्थितं कीदृशंजलनिधिं वि
धुमंडलदर्शनेन चंद्रमंडलालोकेन तरलिताश्चंचलीकृताः
तरंगाः कल्लोलायस्यतं पुनःकीदृशं एकरसं एकस्यांराधा

यामेवरसः प्रीतिर्यस्यतं पुनःकीदृशं चिरंबहुकालं अभिलषितः प्रार्थितः विलासः केलिर्येनतं पुनःकीदृशं गुरुहर्षस्यातिशयस्य हर्षस्यवशंवदंअधीनंवदनंमुखंयस्य सानंदमुखमित्यर्थः पुनःकीदृशं अनंगस्यकामस्यनिवासस्थानभूतं कंदर्पकोटिलावण्यमित्यर्थः अत्रागाधशृंगाररसाश्रयत्वेनकृष्णास्यजलनिधिसाम्यं राधामुखस्याल्हादकारित्वादीनाचंद्रसाम्यंबोध्यं उपमालंकारश्च॥१॥

हारममलतरतारमुरसिदधतंपरिलंबित दूरं॥ स्फुटतरफेनकदंबकरंबितमिवयमुनाजलपूरं॥२॥

हारमिति पुनःकीदृशं हारंमुक्ताहारंदधतंधारयंतंउरसिहृदये कीदृशंहारं अमलतरतारंअत्यंतविशद्धवृहत्तरं पुनःकीदृशं स्फुटतरोयोफेनकदंबस्तेनकरंबितंमिश्रितंयमुनाजलपूरमिवश्रीकृष्णस्यश्यामत्वाद्यमुनाप्रवाहसाम्यं हारशुभ्रत्वात् फेनसाम्यंबोध्यं॥२॥

श्यामलमृदुलकलेवरमंडनमधिगतगौरदुकूलं॥ नीलनलिनमिवपीतपरागपटलभरवलयितमूलं॥३॥

श्यामलेति श्यामलंकृष्णंमृदुलंकोमलंकलेवरमंडनं शरीरालंकारोयस्यतं पुनःकीदृशं अधिगतंपरिहितंगौरदुकूलंपीतवस्त्रंयेन कमिव नीलोत्पलमिवेत्यर्थः कीदृशंनीलनलिनं पीतपरागाणां कुंकुमरेणूनांपटलस्यसमू

हस्यभरः अतिशयस्तेन वलयितं वेष्टितं मूलं यस्य तत्तथा ३

तरलदृगंचलचलनमनोहरवदनजनितरतिरागं॥ स्फुटकमलोदरखेलितखंजनयुगमिवशरदितडागं॥ ४॥

तरलेति कीदृशं हरिं तरलश्चंचलोपांगकटाक्षस्तस्य चलनेन मनोहरं सुंदरं यद्वदनं तेन जनितउत्पादितो रसो रागोऽभिलाषोऽर्थात् नारीणां येन नारीणामतिकामकरमिति भावः कमिव शरदि शरत्काले तडागमिव कीदृशं तडागं स्फुटकमलस्य विकाशितपद्मस्योदरमध्ये खेलितं क्रीडितं खंजनयोर्युग्मं युगलं यत्र तथा शरत्काले खंजनवर्णनमुचितमेव॥ ४॥

वदनकमलपरिशीलनमीलितमिहिरसमकुंडलशोभं॥ स्मितरुचिरुचिरसमुल्लसिताधरपल्लवकृतरतिलोभं॥५॥

वदनेति वदनकमलस्य परिशीलनाय मिलिते मिहिरसमे सूर्यतुल्ये ये कुंडले ताभ्यां शोभा यस्य तं तथा पुनः कीदृशं स्मितरुचिरो हास्यदीप्तिसुभगः समुज्ज्वलित दीप्यमानो योऽधरपल्लवस्तेन कृतो रतौ लोभो युवतीनां रताभिलाषो येन तं तथा त्वत्पक्षे त्वयि रतिलोभमित्यत्र गमकत्वात्समासः५

शशिकिरणच्छुरितोदरजलधरसुंदरकुसुमकेशं॥ तिमिरोदितविधुमंडलनिर्मलमलयजतिलकनिवेशं॥ ६॥

शशीकिरणेति कीदृशं हरिं शशिकिरणेन चंद्रदीप्त्या छुरितं मंडितं सुंदरमप्यंतरं यस्य जलधरस्य मेघस्य तद्वत्सुंदराः पुष्पसहिताः केशाः यस्य तं अनकेशानांश्यामलतया मेघसाम्यं तत्रस्थकुसुमानांच मेघांतश्चारिचंद्रकिरणसाम्यं बोध्यं पुनःकीदृशं तिमिरे अंधकारे उदित उत्थितो यो विधुमंडलश्चंद्रबिंबस्तद्वन्निर्मलं मलयजतिलकं चंदनबिंदुस्तस्य निवेशोवस्थानं यत्र तं शृंगारिणां नागराणां तिलकं वर्तुलमेवेति तस्य चंद्रसाम्यं चंद्रोदये तिमिरस्यासंभवादभूतोपमेयं बोध्या ॥ ६॥

विपुलपुलकभरदंतुरितं रतिकेलिकलाभिरधीरं ॥ मणिगणकिरणसमूहसमुज्ज्वलभूषणसुभगशरीरं ॥७॥

विपुलेति कीदृशं हरिं विपुलोधिकोयः पुलकभरो रोमांचातिशय स्तेन दंतुरितं निम्नोन्नतं व्याप्तमित्यर्थः पुनः कीदृशं रतिकेलिकलाभिः सुरतक्रीडाकथाभिरधीरं चंचलं पुनःकीदृशं मणिगणानां किरणसमूहेन समुज्ज्वलं दीप्यमानं यद्भूषणं तेन सुभगं सुंदरं शरीरं यस्य तं तथा ॥७॥

श्रीजयदेवभणितविभवद्विगुणीकृतभूषणभारं ॥ प्रणमत हृदि विनिधाय हरिं भवजलसुकृतोदयसारं ॥८॥

श्रीजयदेवेति श्रीजयदेवस्य भणितं विभावेन भाषितप्रपंचेन द्विगुणीकृतस्यालंकारस्य भारो यस्य तं हरिं हेकृ

ष्णाभक्ताः प्रणमतनमस्कुरुत किंकृत्वाक्षचिरंचिरकालं. हृदिविनिधायस्थाप्य कथंभूतंहरिं कृकृतस्ययोउदयः स्तस्यसारं यद्वाकृकृतोदय एवसारोधनंयस्मात्तं ॥८॥

श्लो०॥ अतिक्रम्यापांगंश्रवणपथपर्यंतग
मनप्रयासेनेवाक्ष्णोस्तरलतरतारंपतित-
योः॥इदानींराधायाःप्रियतमसमालोकस
मयेपपातस्वेदांबुप्रसरइवहर्षाश्रुनिकरः१

एवंभूतस्यकृष्णस्यदर्शनाद्राधायास्तदानींकिंजात मितिहरिराह अतिक्रम्येति इदानींप्रियतमसमालोक- समये प्रवाहसदृशः राधायाःहर्षाश्रुनिकरः सात्विकभा वेननेत्रांबुपूरःपपातनत्वोत्प्रेक्षते अपांगंनेत्रप्रांतं अतिक्र म्योल्लंघ्य श्रवणपथस्यकर्णमार्गस्य पर्यंतगमनंयेनतेनयः प्रयासस्तेनेवाक्ष्णोः स्वेदांबुप्रसरोभूत् कीदृशयोरक्ष्णोः तरलतरतारंचंचलाक्षकनीनिकंयथास्यात्तथा पतितयोः अन्यस्यापिगमनेनश्रमोभवतितेनच पतातितद्वत् ॥१॥

श्लो०॥ भजंत्यास्तल्पांतंकृतकपटकंडूति
पिहितेस्मितेयातेगेहाद्बहिरवहितालीं
परिजने॥ प्रियास्यंपश्यंत्याःस्मरशरव
शाकूतसुभगंसलज्जायालज्जाव्यगम-
दिवदूरंमृगदृशः॥२॥

भजंत्याइति मृगदृशःमृगाक्ष्याःराधायाः लज्जापि दूरंव्यगमदिवगतेव कीदृश्याःराधायाः अवहितःसाव

धानोय आली परिजनः सखीसेवकवर्गस्तस्मिन् गेहाद्बहि र्यातेगतेसति तल्पांतंशय्यापर्यंतं भजंत्याः प्राप्नुवत्याः कीदृशेपरिजने कृताकपटेनकर्णादिकंडूतिः कंडूयनंतेन पिहितंछादितंहास्यंयेन पुनः कीदृश्याः प्रियास्यंकृष्णमु खंपश्यंत्याः कीदृशंप्रियास्यंस्मरशरवशंकामबाणाधीनं आकूतंस्फुरताभिप्रायस्तेनस्फुभगंमनोहरं कामविकारहा वभावादिमनोहरमित्यर्थः पुनः कीदृश्याः सलज्जायाः ल ज्जासहितायाः तस्याश्चेष्टंदृष्ट्वा वचनांतरेण अपृष्ट्वा बहि र्गमनात्सखीनांसाम्यंसर्वाः सख्योगताः इतिकथमत्रस्थात व्यमितिलज्जापिगतेतिभावः ॥२॥

श्लोकः ॥ जयश्रीविन्यस्तैर्महितइवमंदार कुसुमैः स्वयंसिंदूरेणद्विपरणमुदामु द्रितइव ॥ भुजापीडक्रीडाहतकुवलया पीडकरिणः प्रकीर्णासृग्बिंदुर्जयतिभु जदंडोमुरजितः ॥ ३ ॥

इतिश्रीकविराजश्रीजयदेवकृतेगीतगो विंदमहाकाव्येसानंदगोविंदोनामे कादशः सर्गः

जयेतिमुरजितः कृष्णस्यभुजदंडोदंडाकारबाहुर्जयति सर्वोत्कर्षेणवर्तते भक्तानांरक्षणार्थमितिशेषः दंडशब्दे नआजानुबाहुत्वंद्योतितं कीदृशोभुजदंडः प्रकीर्णाः सर्वत्र लग्नाः असृग्बिंदवोरक्तबिंदवोयस्मिन् अतएवकुवलयापी

डसंग्रामसंतोषेण स्वयंसिंदूरेणमुद्रित इवचिह्नित इवहि
पद्मोसिंदूरेणमुद्रितस्तर्हिमदीयोबाहुरपिसिंदूरमुद्रितोभ
वतु पुनःकीदृशइव जयश्रियाजयलक्ष्म्याविन्यस्तैर्विक्षि
प्तैः मंदारकुसुमैः पारिजातपुष्पैर्मोहित इवपूजितइव ज
यिनः शूरस्योपरिपुष्पवृष्टिरुचिता कीदृशस्यमुरजितः
भुजापीडस्यबाहुदंडस्यक्रीडयाहतः कुवलयापीडनामा
करीहस्तीयेन अनेनसामर्थ्यलक्षणोनायकगुणउक्तः एवं
भूतेभुजदंडेगाढालिंगनादिना श्रीराधायाः निःशंकक्रीडनं
सूचितमितिभावः अत्रोत्प्रेक्षालंकारः सानंदोराधासमा
गमेनसौंदर्येतिक्षेपकः॥३॥

अथ द्वादशः सर्गः प्रारभ्यते.

**श्लो०॥ गतवतिसखीवृंदेमंदत्रपाभर
निर्भरस्मरशरवशाकूतस्फीतस्मितस्न
पिताधरां॥ सरसमनसंदृष्ट्वाराधांमुहु
र्नवपल्लवप्रसवशयनेनिक्षिप्ताक्षीमुवा
चहरिःप्रियां॥१॥**

गतवतीति अथहरिःकृष्णः प्रियांवल्लभांराधां सरस
मनसंरसोनुरागस्तत्सहितंमनोयस्यास्तांदृष्ट्वा उवाचवक्ष्य
माणमितिशेषः कस्मिन्सतिसखीवृंदेसखीसमूहेगतव
तिसति कीदृशींराधां मंदोल्पोयोत्रपाभरोलज्जाभरस्तेन
निर्भरोतिशयितोयः स्मरस्तत्परवशस्तदायत्तो आकूतोभि
प्रायस्तेनस्फीतंप्रवृद्धंयत्स्मितमीषद्धसितंतेनस्नपितोव्या

मावधरोयस्यास्तां अथमदङ्कूरइतिस्मरविशेषणं पुनः
कीदृशीं मुहुः पुनःपुनः नवपल्लवप्रसवशयनेनवपल्लवपुष्प
मयेशयनेविक्षिप्ताक्षीनिहितनयनां शय्यालोकनेनस्फुरते·
च्छाध्वन्यते· अस्मिन्सर्गेस्वाधीनभर्तृकानायिकावर्ण्यते
यस्यारतिगुणाकृष्टः पतिः पार्श्वंनमुंचति विचित्रविभ्रमा
सक्तासास्यात्स्वाधीनभर्तृका ॥१॥

अथत्रयोविंशतिमःप्रबंधोविभासरागेण
एकतालीतालेगीयते·

किसलयशयनतलेकुरुकामिनिचरणन·
लिनविनिवेशं॥ नवपदपल्लववैरिपराभव
मिदमनुभवतुसुवेशं॥१॥ क्षणमधुनाना
रायणमनुगतमनुसरभोराधिके॥ ध्रु०॥

किसलयेति विभासरागः तल्लक्षणं स्वच्छंदसंमानि
तपुष्पचापः प्रियाधरस्वादुसुरवातिलग्नः पर्यंकमध्यास्यकृ
तोपवेशोविभासोविभूषः किलहेमगौरइति हेराधे अधुना·
क्षणं अनुगतंआधीनंनारायणंअनुसर अनुगच्छ अनुस
रणप्रकारमाह· हेकामिनिहेकामुके त्वंकिसलयैरचितशय
नेशय्यातले उपरिभागेचरणनलिनस्यविनिवेशंपादप्रक्षे·
पंकुरु इदंकिसलयशयनंनवपदपल्लवेनवैरितस्मात्त
स्यार्पणंकुरु इदंकिसलयशयनंनवपदपल्लवस्यकांतिह
राभवंतिरस्कारंअनुभवतु प्राप्नोतु नवपदपल्लवस्यकांति ह
रणात् शत्रुमस्तकेहिचरणोदीयते कीदृशइदं सुवेशमपि·
पत्रचनादिनाऽलंकृतमपि ॥१॥

करकमलेन करोमि चरणमहमागमितासि विदूरं॥ क्षणमुपकुरु शयनोपरि मामिव नूपुरमनुगतिशूरं॥ २॥

हे राधे अहं करकमलेन ते चरणं करोमि संवाहयामि धातूनामनेकार्थत्वात् यतस्त्वं विदूरं आगमितासि मया आनीतासि दूरागतस्य चरणसंवाहनमुचितं त्वं शयनोपरि क्षणं नूपुरं उपकुरु कमिव अनुगतिशूरं तवानुसरणे शूरं मामिव यथा आलिंगनादिना मामुपकरोषि तथा नूपुरमपि शय्यातलमलंकुरु इति भावः॥ २॥

वदनसुधानिधिगलितममृतमिव रचय वचनमनुकूलं॥ विरहमिवापनयामि पयोधररोधकमुरसि दुकूलं॥ ३॥

वदनेति त्वं अनुकूलं वचनं वाक्यं अमृतमिव रचय वद कीदृशं वदनमेव सुधानिधिश्चंद्रस्तस्माद्गलितं सुसन्नं अनंतरं उरसि वक्षसि वर्तमानं दुकूलं पट्टवस्त्रं विरहमिव अपनयामि स्फोरयामीत्यर्थः कीदृशं पयोधररोधकं स्तनाच्छादकं विरहपक्षे स्तनाश्लेषप्रतिबंधकं॥ ३॥

प्रियपरिरंभणरभसवलितमिव पुलकितमन्यदुरापं॥ मदुरसि कुचकलशं विनिवेशय शोषय मनसिजतापं॥ ४॥

कुटिलमवलोकयंती मतिविह्वलः सन्नाह प्रियेति हे राधे त्वं मदुरसि मम वक्षसि कुचकलशं विनिवेशय स्थापय स्तन

कलशार्पणेन मनसिजतापंकामपीडांशोषय खंडय कीदृशं प्रियपरिरंभणाय ममालिंगनाय रभसोत्साहेन वलितमिव सं मुखमिव पुनः कीदृशं संजातरोमांचं पुनःकीदृशं अतिदुःखे नप्राप्यतेइतिदुरापं सजलकुंभक्षेपेण तापशांतिर्युज्यतएव ४

अधरसुधारसमुपनयभामिनिजीवय मृतमिवदासं ॥ त्वयिविनिहितमनसंविरहानलदग्धवपुषमविलासं ॥५॥

त्वदेकजीवनंमांत्वमेवजीवयेत्याह अधरेति हेभामिनि कामकुशले त्वंअधरसुधारसंओष्ठामृतरसंउपनयदेहि अनेनदासंसेवकंमांमृतमिवजीवय कीदृशंत्वयिविनिहितमनसं दत्तमानसं पुनःकीदृशं विरहानलेनवियोगाग्निना दग्धं वपुःशरीरंयस्य अतएवाविलासंनिश्चलंमृतस्तु निश्चलो भवति ॥५॥

शशिमुखिमुखरयमणिरसनागुणमनुगुणकंठनिदानं ॥ ममश्रुतियुगुलेपिकरवविकलेशमयचिरादवसादं ॥६॥

चाटुकेनप्रसन्नांभत्याह शशीति हेशशिमुखिचंद्रवदने त्वंमणिरसनागुणंमणियुक्तंकांचीदाम मुखरयशब्दितंकारय कीदृशं अनुगुणःसदृशः कंठनिनादोयस्यकंठगीतनादसदृशमित्यर्थः तेनशब्देनत्वंममश्रुतियुगुलेकर्णयुग्मे चिरात्तवविरहेणयोवसादः खेदस्तंशमयनाशय खेदकारणमाह कीदृशेश्रुतियुगले पिकरुतैः कोकिलशब्दैर्विकले

दुःखिते विरहिणोहि पिकरुतंदुःसहंभवति ॥६॥

मामतिविफलरुषाविफलीकृतमवलोकितुम· धुनेदं ॥मीलतिलज्जितमिवनयनंतवविरमवि सृजरतिखेदं ॥७॥

किंचिदवलोकयंतीमाह मामिति हेराधे तवेदंनेत्रंनय नंअधुनामामवलोकितुंद्रष्टुं लज्जितमिवमीलितमिवधत्ते· कीदृशंमां अतिविफलरुषाअतिविफलकोपेन विफलीकृतं दुःखितं नयनविशेषणंवा विफलीकृतं कर्णांतरंप्रापितं· अतएवरोषाद्विरमविरक्ताभव रतिखेदंक्रीडादैन्यंविसृज· त्यज कोपंत्यक्त्वा मयासहरमणंकुर्वित्यर्थः ॥७॥

श्रीजयदेवकवेरिदमनुपदंनिगदितमधुरि पुमोदं ॥जनयतुरसिकजनेषुमनोरमरति रसभाववविनोदं॥८॥ इतिश्रीगीतगोविं देत्रयोविंशतिमःप्रबंधः॥१३॥

श्रीति श्रीजयदेवेनभणितमिदंगीतं रसिकजनेषुशृंगा ररसलोकेषुमनोरमं मनःप्रीतिकरं रतिःसंभोगः रसःशृं गाररसः भावाःसंचारिसात्विकादयस्तेतेषांविनोदंकौतु कंजनयतुउत्पादयतु कीदृशमिदं अनुपदं पदेपदेनिगदि तोउक्तोमधुरिपोः कृष्णस्यमोदो हर्षोयत्रगीते ॥८॥

श्लो०॥ प्रत्यूहःपुलकांकुरेणनिबिडाश्ले षेनिमेषेणच क्रीडाकूतविलोकितेधरसु धापानेकथाकेलिभिः॥आनंदाधिगमे

नमन्मथकलायुद्धेपियस्मिन्नभूदुद्भूतःसत
योर्बभूवस्फुरतारंभःपियंभावुकः॥१॥

इदानींस्फुरतारंभंनिरूपयति प्रत्यूहइति तयोःराधा
कृष्णयोःसः स्फुरतारंभः प्रियंभावुकः प्रियंभवितुं शीलंय-
स्यसः उद्भूतःप्रकरोबभूव सकः यस्मिन्स्फुरतारंभे निबिडाश्ले
षेगादालिंगनेकर्तव्येपुलकांकुरेणरोमोद्गमेनप्रत्यूहः विघ्नो-
ऽभूत् व्यवधानकर्तृत्वाद्रोमोद्गमस्य यस्मिन्स्फुरतारंभेक्रीडा
कूतविलोकिते क्रीडास्कअभिप्रायपूर्वकंयद्विलोकितंतस्मि-
न्कर्तव्ये निमेषेणपक्ष्मचलनेनप्रत्यूहोऽभूत् यस्मिन्नधर
स्फुधापानेओष्ठामृतपानेकर्तव्ये कथाकेलिभिः प्रत्यूहोभूत्
अपिसमुच्चये यस्मिन्मन्मथकलायुद्धेकामकलान्वितस्फुरत
संग्रामेकर्तव्ये आनंदाधिगमेन आनंदप्राप्त्या प्रत्यूहोऽभूत्
प्रीत्याआनंदप्राप्तिः॥१॥

श्लो०॥ दोर्भ्यांसंयमितःपयोधरभरेणापी-
डितःपाणिजेराविद्धोदशनैःक्षताधरपुटःश्रो
णीतटेनाहतः॥ हस्तेनानमितःकचेधरम-
धुस्यंदेनसंमोहितःकांतःकामपित्तृप्तिमा
पतदहोकामस्यवामागतिः॥२॥

तदेवविपरीताख्यंउक्तिवैचित्र्येणकथयति दोर्भ्यामिति
कांतः कृष्णः कामपि अनिर्वचनीयांतृप्तिसंतोषमापप्राप्तवत् की
दृशः कृष्णः दोर्भ्यांहस्ताभ्यां संयमितः बद्धः अर्थान्नायिका
याः पुनःकीदृशः पयोधरभरेणस्तनभरेणपीडितः पाणिजे

नैरवैराविद्धः खंडितः दशनैर्दंतैः क्षतमधरपुटंयस्यसः पुनः कीदृशः श्रोणीतटेनकटिप्रदेशेनाहतस्ताडितः कचेकेशबंधे हस्तेन आनमितः नम्रीकृतः पुनः कीदृशः अधरमधुस्यदेन अधरामृतरसेन मोहितः यत्क्रोधजनकं तदेवातिसंतोषका रकमतएव कामस्यमदनस्य वामाविपरीतैवगतिरित्यर्थः २

श्लो०॥ मारांकेरतिकेलिसंकुलरणारंभेतया
साहसप्रायंकांतजयायकिंचिदुपरिप्रारंभि
यत्संभ्रमात्॥ निष्पंदाजघनस्थलीशिथि
लितादोर्वल्लिरुत्कंपितंवक्षोमीलितमाक्षि
पौरुषरसः स्त्रीणांकुतः सिद्ध्यति ३

तदेवपुनः कथयति मारांकेइति मारांकेमारांकसंज्ञ केरतिकेलिसंकुलरणारंभे सुरतक्रीडातुमुलयुद्धारंभे त याराधया यत्संभ्रमात्कांतजयाय कृष्णजयार्थं साहसप्रा यंकिंचिदुपरि विपरीतरतंप्रारंभि आरब्धे तदैवजघनस्थ लीनिस्पंदास्तब्धोजाता दोर्वल्ली भुजलताशिथिलाजाता व क्षस्थलमपिकंपयुक्तमभूत् तथाअक्षिनेत्रयुग्मंमीलितम भूत् अतएवस्त्रीभिरतिसाहसात्आरब्धमपिपौरुषंकुतः सिद्ध्येन्नैवसिद्ध्यतीत्यर्थः॥३॥

श्लो०॥ तस्याःपाटलपाणिजांकितमुरोनि
द्राकषायेदृशौनिर्धूताधरशोणिमाविलुलि
तस्रस्तस्रजोमूर्धजाः॥ कांचीदामदरश्ल
थांचलमितिप्रातर्निखातैर्दृशोरेभिःकाम

शरैस्तदद्भुतमहोपत्युर्मनः कीलितं॥४॥

तस्याइति एभिः पूर्वोक्तैः कामशरैर्यत्पत्युः स्वामिनोमनः कीलितं किंह्यं एतदद्भुतमाश्चर्यमभूत् कथंभूतैः कामशरैः प्रातःकाले दृशोर्नेत्रयोर्निखातैरारोपितैः इतीतिकिं तस्याराधायाउरः पाटलपाणिजैः श्वेतरक्तनखैश्चिन्हितं तस्याश्रिद्राकषाये निद्रालोहिते दृशौनेत्रे तस्यानिर्धूतःपतिः अधरशोणिमाअधरलौहित्यं तस्याविलुलितामालाः स्रस्ताःशिथिलनाःस्रजोमालायेभ्यस्ते मूर्द्धजाः केशाः दरः ईषत् स्लथंशिथिलं अंचलं वस्त्रंयस्य तादृशं कांचीदाम मेखलागुणः कामशरैः नखक्षतजागरचुंबनकेशाकर्षणनीवीमोचनानि पंच शराः निरूपिताः अन्यत्रनिखातैर्बाणैरन्यत्कीलितमित्याश्चर्यमित्यर्थः॥४॥

श्लोकः॥ त्वामप्राप्यमयिस्वयंवरपरांक्षीरोदतीरोदरेशंकेसुंदरिकालकूटमपिबन्मूढोमृडानीपतिः॥ इत्थंपूर्वकथाभिरन्यमनसोविक्षिप्यवामांचलं राधायास्तनकोरकोपरिलसन्नेत्रोहरिःपातुवः॥५॥

त्वामप्राप्येति हरिःकृष्णःवःयुष्मान्पातु कीदृशोहरिः राधायाःस्तनकोमलत्वापतिततल्पादिनागुणेन कोरकाविवतयोरुपरिचलंतीसंबद्धनेत्रेयस्य किंकृत्वा वामांचलं हृदयवामदेशालग्नांचलं विक्षिप्य दूरीकृत्य कीदृश्याः राधायाः इत्थं इतिपूर्वकथाभिः अन्यमनसः कृष्णदत्तचित्तायाः

इत्यर्थः कथामेवाह हेस्कंदरिक्षीरोदतीरोदरे क्षीरसमु
द्रतीरमध्ये मृडानीपतिर्महादेवस्त्वामप्राप्य कालकूट
विषमपि वदित्यहंशंकेतर्कयामि यतः मूढः ज्ञानरहितः
कीदृशींत्वां मयिमन्निभिन्ने निभिन्ने सप्तमी स्वयंवरपरां
मदेकपतिकामामित्यर्थः इत्थंपूर्वकथा अनेनगौरीपति
त्वेपिनवालाभाद्विषमपिबत् इतिगोपी अपि अधिक
गुणेतिभावः॥ ५॥

श्लो०॥ व्यालोलः केशपाशस्तरलितमलकैः
स्वेदलोलौकपोलौ स्पष्टादष्टाधरश्रीः कु-
चकलशरुचा हारिता हारयष्टिः॥ कांचीकां
चिद्गताशांस्तनजघनपदंपाणिनाच्छाद्य-
सद्यः पश्यंतीचात्मरूपंतदपिविलुलितं
स्रग्धरेयंधिनोति॥ ६॥

व्यालोलइति इयंराधा तदपितथाधिनोतिप्रीणय
ति अर्थात्कृष्णं कीदृशीराधापाणिनाहस्तेन जघनयोःपद
आभोगंसद्यःआच्छाद्य आत्मरूपंपश्यंती विलुलितांम्ला
नां स्रजंधारयतीति पुनःकीदृशी आत्मरूपंपश्यंती आ
त्मरूपमेवाह केशपाशोव्यालोलः इतस्ततोविक्षिप्तोऽभूत्
अलकैश्चूर्णकुंतलैस्तरलितंस्थानाच्चलितं कपोलौस्वेदेनघ
र्मजलेनलोलौ व्याप्तौ दष्टाधरश्रीः खंडिताधरलक्ष्मीः स्प
ष्टाव्यक्ता कुचकलशरुचास्तनघटदीप्त्या हारयष्टिः मुक्ता
कलापः दूरीकृत्यकांचीरसना कांचिदाशांदिशंगता चलि

तायद्य प्रीतिसर्वत्रयोजनीयं स्त्रग्धरानामकंछंदश्चेदं ॥ ६॥

श्लो०॥ ईषन्मीलितदृष्टिमुग्धहसितः सीत्कारधारावशात् व्यक्तव्याकुलकेलिकाकुविकसद्दंतांशुधौताधरं। श्वासोत्कंपिपयोधरोपरिपरिष्वंगात्कुरंगीदृशो हर्षोत्कर्षविमुक्तनिःसहतनोर्धन्योधयत्याननं॥७॥

ईषदिति कुरंगीदृशोहरिणनयनायाः आननंमुखंधन्यो भाग्यवान्जनोधयति पिबति कीदृश्याः कुरंगीदृशः श्वासेन कामजनितेनस्वरपवनेनउत्कंपो किंचिच्चलितौ पयोधरौस्तनौ तयोरुपरिपरिष्वंगादालिंगनात् यः हर्षोत्कर्षः हर्षाधिक्यंतेन विमुक्तास्त्यक्ता सालसाअतएवनिःसहाकार्यक्षमा तनुः शरीरंयस्याः परिष्वंगंकृत्वा आलिंग्यधन्योधयति पिबतीतिभावः कीदृशमाननं ईषन्मीलितदृष्टिं मुकुलितनयनं मुग्धसुंदरंहसितंहास्यंयस्मिन् पुनःकीदृशं सीत्कारधारावशात् कामविकारपरंपरावशात् अव्यक्ताआकुलाया केलिस्तस्यांयः काकुःशोकभीत्यादिभिः ध्वनिविशेषस्तेन विकसंतः प्रकटीभवंतोयेदंतादशनास्तेषामंशुभिःकिरणैर्धौतः क्षालितः अधरोयस्मिन् ७

श्लो०॥ अथसानिर्गतबाधाराधास्वाधीनभर्तृका॥ निजगादरतिक्लांतंकांतंमंडनवांछया॥८॥ इतिसहसास्फुरितंसुरतांतेमानितांतखिन्नांगी॥ राधाजगाद

सादरमिदमानंदेनगोविंदं ॥९॥

अथेति अथानंतरं राधास्फुरतांतरे आनंदेन गोविंदंकृष्णमिदं वक्ष्यमाणंसादरं निजगाद कीदृशी सहसाईषद्धास्ययुक्ता निर्गता आसमंताद्भावेनबाधाकामपीडा यस्याः सा स्फुरत्वेनाधीनःभर्ताप्रियोयस्याःसा किमर्थं निजगादेत्यत आह मंडनवांछयाप्रियकर्तृकालंकरणवांछयेत्यर्थः तस्याः स्वाधीनभर्तृकायाः लक्षणंभरतशास्त्रेउक्तं क्षणं कराहतेनैवक्षणंचरणपातिते कंदुकेनेवकांतेन क्रीडेत्स्वाधीनभर्तृका कथंभूतंकृष्णं कांतंप्रियंकमनीयंसुंदरं पुनःकीदृशं रतौस्फुरतेक्लांतंपरिश्रांतं ॥ ० ॥ ९॥

अथचतुर्विंशतिमःप्रबंधोरामकरीरागेण यतितालेगीयते

कुरुयदुनंदनचंदनशिशिरतरेणकरेणपयोधरे ॥ मृगमदपत्रकमत्रमनोभवमंगलकलशसहोदरे ॥ १ ॥ निजगादसायदुनंदने ॥ क्रीडतिहृदयानंदने ॥ ध्रु० ॥

यद्राधानिजगादतदेवगीतेनाह कुर्विति रामकरीरागः हृदयानंदने चित्तहर्षके यदुनंदने कृष्णे क्रीडतिसतिसाराधानिजगादउक्तवती किंनिजगादेत्यत आह हेयदुनंदनकृष्ण त्वंमम अत्रास्मिन्पयोधरे करेणस्वहस्तेन मृगमदपत्रकं कस्तूरिकापत्रावलींकुरु कीदृशेनकरेण चंदनवच्छिशिरेण अतिशीतलेन कीदृशे पयोधरे मनोभवस्य काम

स्यमंगलायकलशः पूर्णकुंभस्तस्यसहोदरे तुल्ये मंगलंहि रण्यमितिवा॥१॥

अलिकुलगंजनसंजनकंरतिनायकसायक मोचने ॥ त्वदधरचुंबनलंबितकज्जलमुज्ज्व लयप्रिय लोचने ॥२॥

अलीति हेप्रियकृष्ण त्वंलोचनेमदीयेनेत्रेत्वदधरा भ्यांचुंबनेनलंबितंगलितंकज्जलंउज्ज्वलय पुनरुद्दीपय कीदृशंकज्जलं अलिकुलस्य भ्रमरसंघस्यगंजनमभिभवं संजनयतीतिसंजनकंविधायकं कीदृशेलोचने रतिनाय कस्यकामस्यसायकान् मोचयति तस्मिन्नयनकटाक्षप्रत्यं चिकामासाद्यकामोबाणान् मोचयतीतिभावः एतत्प्रेरणा य कामोबाणंमुंचतीत्यर्थः ॥२॥

नयनकुरंगतरंगविलासनिरोधकरेश्रुति मंडले ॥ मनसिजपाशविलासधरेशुभवे षनिवेशयकुंडले ॥३॥

नयनेति हेशुभवेषरुचिरालंकार कृष्ण त्वममश्रुति मंडले कर्णप्रदेशेकुंडलेनिवेशय कुंडलयुग्मंस्थापय की दृशेश्रुतिमंडले नयनेएवकुरंगोमृगस्तस्यतरंगविलासस्य उत्फालगमनस्यनिरासंनिषेधंकरोतीतितथा पुनःकीदृशे मनसिजस्यकामस्ययःपाशस्तस्यविलासंसादृश्यलीलां धारयतीति पाशःपशूनयमनानिरोधकोभवतीति॥३॥

भ्रमरचयंरचयंतमुपरिरुचिरंसुचिरंस

मसन्मुखे ॥ जितकमलेविमलेपरिकर्मयन
र्मजनकमलकंमुखे ॥ ४ ॥

भ्रमरेति हेकृष्ण ममसन्मुखे सुंदरमुखे अलकंकेशपाशंपरिकर्मयप्रसाधयमंडयेत्यर्थः कीदृशमलकं उपरिमुखोपरिरुचिरंबहुकालं व्याप्यरुचिरंभ्रमरसमूहंरचयंतंकारयंतं स्वजातीयबुद्ध्याभ्रमरस्तत्रपततीतिभावः यद्वामुखकमलस्थानीयंकमलेभ्रमरास्तिष्ठंतितद्वत् कीदृशेमुखे जितंकमलंयेनतादृशे विमलेनिर्मले कीदृशमलकं नर्मजनकंक्रीडाकारकं ॥ ४ ॥

मृगमदरसवलितंललितंकुरुतिलकमलि
करजनीकरे ॥ विहितकलंककलंकमलान
नविश्रमितश्रमसीकरे ॥ ५ ॥

मृगमदेति हेकमलाननकृष्ण त्वंअलिकरजनीकरे ललाटचंद्रेतिलकंकुरु मृगमदरसेनवलितंनिर्मितं अतएवललितंमनोहरं पुनःकीदृशं विहिताकृताकलंकस्यांकस्यषोडशभागोयत्र अथवाकलाशोभायत्रद्वितीयाचंद्रप्रायं तिलकंकुर्वित्यर्थः कथंभूतेऽलिकरजनीकरे विश्रमिताः उपशांताः श्रमसीकाराः प्रयासजलकणायत्र एतेनचंद्रोपिमकरलांछनछविर्दृश्यतइति ॥ ५ ॥

ममरुचिरेचिकुरेकुरुमानदमनसिजध्वज
चामरे ॥ रतिगलितेललितेकुसुमानिशि
खंडिशिखंडकडामरे ॥ ६ ॥

[library stamp]

ममेति हेमानदमानखंडन मानदायकवा ममरुचिरेस्त दरेचिकुरे जात्येकवचनं कुसुमानिपुष्पाणि कुरुरचयेत्यर्थः कीदृशेचिकुरे मनसिजस्य कामस्य ध्वजचामरतुल्ये पुनः कीदृशेरतिगलिते स्मरतसमये मुक्तबंधने पुनः कीदृशे कलितेशृंगारवेशयायुक्ते पुनः कीदृशे शिखंडिनोमयूरस्यशिखंडस्येवपिच्छस्येवडामरोयस्यआरोपोआडंबरमित्यर्थः॥६॥

सरसघनेजघनेममशंबरदारणवारणकंदरे॥ मणिरशनावसनाभरणानिशुभाशयवासयसुंदरे॥७॥

सरसेति हेशुभाशय महोदारचित्त त्वंममसुंदरे जघने मणिरशनामणियुक्तघंटिका वसनानिवस्त्राणि आभरणानिअलंकरणानि वासयपरिधानंकारय कीदृशे जघने सरसः कामजनकः घनोनिबिडश्च पश्चात्कर्मधारयः पुनः कीदृशेशंबरदारणः कामःसएववारणःकुंजरस्तस्य कंदरेवासस्थाने॥७॥

श्रीजयदेववचसिशुभदेहृदयंसदयंकुरुमंडने॥ हरिचरणस्मरणामृतनिर्मितकलिकलुषज्वरखंडने॥८॥ इतिश्रीगीतगोविंदेचतुर्विंशतिः प्रबंधः॥

श्रीजयदेवेति हेभक्तजन त्वंमंडनेअलंकारभूते शुभदेकल्याणप्रदे श्रीजयदेववचसिगीतरूपे हृदयं मनः सदयंदयायुक्तंतत्परंकुर्वित्यर्थः कीदृशे वचसि

कोऽकृतपापरूपज्वरस्य खंडननाशः यत्न ॥८॥

श्लोकः ॥ रचयकुचयोः पत्रंचित्रंकुरुष्वक
पोलयो घटनजघनेकांचीमंचस्रजाक
बरीभरं ॥ कलयवलयश्रेणींपाणौपदेकु
रुनूपुराविति निगदितः प्रीतः पीतांबरो
पितथाकरोत् ॥१॥

रचयेति इतिराधयानिगदितःउक्तः प्रीतः संतुष्टः पी
तांबरोपितथाऽकरोत् इतिकिं हेकृष्ण ममकुचयोःस्त
नयोश्चित्रंचित्रविशेषंरचय कपोलयोः पत्रंपत्रावलींकरे
णरचय कुरुष्व जघनेकांचींक्षुद्रघंटिकांअर्पय स्रजापुष्प-
मालयाकबरीभरं केशपाशंअंच पूजय बंधनंकुर्वित्यर्थः
हस्तेवलयश्रेणींकंकणपंक्तिंस्थापय पदेचरणयोः नूपु-
रौकुरुस्थापय गीतोक्तस्यसंक्षेपार्थकथनेनदोषउक्तः १

श्लोकः ॥ पर्यंकीकृतनागनायकफणाश्रे
णीमणीनांगणे संक्रांतप्रतिबिंबसंकल
नयाबिभ्रद्वपुर्विक्रियां ॥ पादांभोरुहधा
रिवारिधिसुतामक्ष्णांदिदृक्षुः शतैः काय
व्यूहमिवाचरन्नुपचिताकूतोहरिःपातुवः २

पर्यंकीकृतेति उपचितंसमृद्धं आकूतं कामभावोयस्य
स हरिः कृष्णः वःयुष्मान्पातु कीदृशोहरिः वपुर्विक्रि
यांदेहविक्रियांशरीरपरामित्यर्थः बिभ्रद्धारयन् किंकुर्व

न् पर्यंकीकृतः शय्यास्थाने कृतो नागनायकः शेषस्तस्य फणाश्रेणी फणासमूहस्तस्य मणयस्तेषां गणे समूहे सं क्रांतं संबद्धं तत्प्रतिकृतिस्तस्य संकलनया अन्वयेनाश्रित इत्यर्थः कायव्यूहमिव बहुशरीरतामिवाचरन् कुर्वन् किमिति कायव्यूहइत्यत आह पुनः कीदृशः पादांभोरुहं श्रीकृष्णाच्चरणकमलं धारयतीति धारिणी या वारिधिसुता लक्ष्मीस्तां अक्ष्णां शतैर्नेत्रसहस्रैर्दिदृक्षुः द्रष्टुमिच्छुः लक्ष्मीदर्शनं नेत्रद्वयेन तथा न संभवतीति कायव्यूहेन नेत्रबाहुल्यात् ॥२॥

श्लोकः॥ यद्गांधर्वकलासु कौशलमनुध्यानं च यद्वैष्णवं यच्छृंगारविवेकतत्वरचना काव्येषु लीलायितम्॥ तत्सर्वं जयदेवपंडितकवेः कृष्णैकतानात्मनः सानंदाः परिशोधयंतु सुधियः श्रीगीतगोविंदतः॥ ३॥

यद्गांधर्वेति यत् जयदेवकवेः गांधर्वकलासु गानविद्यासु कौशलं पटुत्वं प्रावीण्यमित्यर्थः अस्तीत्यध्याहारः यद्वैष्णवं विष्णोरनुध्यानमस्ति तथा श्रृंगाररसस्य यो विवेकः संभोगविप्रलंभादिरूपेण यद्विवेचनं तस्य तत्वं अर्थज्ञानं तस्य रचना सु लीलायितं क्रीडाविलाससर्वस्वं यद्वा लीलायितं श्रृंगारादिरसविभावनमस्ति तत्सर्वं जयदेवपंडितकवेः श्रीगीतगोविंदतः गीतगोविंदग्रंथात् सुधियः

परिशोधयंतु विवेकिनः विचारयंतु सर्वतोभावेनशुद्धंकुर्वं त्वित्यर्थः कीदृशस्यजयदेवपंडितकवेः कृष्णीकृतात्मनः कृष्णपरायणस्येत्यर्थः जयदेवपंडितः शास्त्राध्यापकः कविः काव्यकर्ताचेतिजयदेवपंडितकवेः श्रीशब्दस्तुग्रंथांतेमंगलार्थं ॥३॥

श्लो०॥ श्रीभोजदेवप्रभवस्यराधादेवीसु
तश्रीजयदेवकस्य॥ पराशरादिप्रियवर्ग
कंठेश्रीगीतगोविंदकवित्वमस्तु॥ ४॥

श्रीभोजदेवेति पराशरादयः कविश्रेष्ठास्तेषां वर्गोगोष्ठीतस्य कंठेगलदेशेअस्तुतस्य श्रीगीतगोविंदकवित्वं भोजदेवप्रभवस्य भोजदेवोत्पन्नस्य तथाराधादेव्याः सुतस्येत्यनेनस्वपितृप्रतिपादनेन मंगलमाचरितं निजग्रंथे आशीरपिदत्तेतिराधास्मरणात् आनंदयुक्तता द्योतिता॥४

श्लो०॥ साध्वीमाध्वीकचिंतानभवतिभव
तः शर्करेकर्कशासिद्राक्षेद्रक्ष्यंतिकेत्वा-
ममृतमृतमसिक्षीरनीरंरसस्ते॥ माकंद
क्रंदकांताधरधरणितलंगच्छयच्छंति
भावं यावच्छृंगारसारस्वतमिहजयदेव
स्यविष्वग्वचांसि॥५॥

इतिश्रीकविराजश्रीजयदेवपंडितकृतौ
गीतगोविंदेमहाकाव्येप्रीतपीतांब
रोनामद्वादशःसर्गः

साध्वीति नैष्ठकसर्वतः यावच्छृंगारसारस्वतं भावं ज यदेवस्य वचांसि यच्छंति तावत् हे माध्वीक मधो भवतस्त्व मधुर महमिति चिंता साध्वी न भवति हे द्राक्षे त्वां केद्र क्ष्यं त्यास्वादयंति अमृतमृतमसि हे क्षीरनीरं रसस्ते माकंद क्रंद आक्रोशं कुरु किंच हे कांताधर त्वं पातालं गच्छ श्री जयदेवकाव्यमधुराख्यभगवद्रसास्वाद निर्वृताजनास्तदे कनिष्ठाः संतः एतेषां तिरस्कारं करिष्यंतीति भावः ॥ ५॥

लक्ष्मीदासतनूजेन भीषदासेनधीमता ॥
कारितागीतगोविंदटीकेयंसुखदास्तुवः॥ १॥
भीषदासनियुक्तेन कृष्णपत्यात्मसेविना॥
नारायणेनसंकृतं गीतगोविंदटिप्पणं ॥ २॥
टिप्पणेचेन्मदीयेवैस्खलितंस्यात्प्रमादतः॥
नतर्कव्योममाक्षेपोगंतुर्हिस्खलितंभवेत्॥ ३

इतिगीतगोविंदंसटीकं
समाप्तं.

अथराधाविनोदकाव्यं प्रारभ्यते·

श्लोक ॥ मालीनोघनमालीमालीनोवनमा
ली ॥ मालीनोवनमालीमालीनोवतु मा
ली ॥१॥

श्रीगणेशायनमः श्रीराधाकृष्णायनमः पितृवचन मवश्यमेवपाल्यंजगतिजनानितिशासितुंवनांतं गतमति करुणारसार्द्र चित्तंरघुपतिमेवसुपस्महेसदारं १ राधाविनोदाख्यं काव्यंचिकीर्षुर्निर्विघ्नपरिप्सितसमाप्ति कामोरामचंद्रकविः परमेश्वरप्रार्थनारूपं मंगलमाचरति वनमालीवनमाला आपादलंबिनीमालातद्वान्विष्णुः आपादलंबिनीमालांवनमालांविदुर्बुधाः इत्याभिधानात् नोस्मान् ग्रंथकर्तॄन् श्रोतॄन्वाअवतुरक्षतु कीदृशः मालीनःमालक्ष्मीः मातुलक्ष्म्यांचमायायांचेत्येकाक्षरः दर्पणइवहृदिलग्नायस्यसः यद्वामायांलीनोलोकपरंपरया कामाद्युत्पादनेनतदासक्तइत्यर्थः एतादृशः पुनः कीदृशः मालीनः मायांमायायां अलीनः निरंजननिराकारत्वात्तस्यामसक्तः मायांलक्ष्म्यां अलीनः सातुलीनासतुनोसक्तइत्यर्थः एकोदासीनत्वात् पुनःकिंभूतः मांशोभां अलंतिव्रजंतितेमालयः यद्वागोपादयस्तेषांइनःस्वामी इनःसूर्येप्रभौराज्ञि

मृगांके स्वभिये नृप इति विश्वः यद्वामालं तेशोभंतेतेमालि नः इंद्रादयः तेषां इनः स्वामीईश्वरेश्वर इत्यर्थः पुनः कीदृ शः मालीनः मालापुष्पस्त्रक् सायस्य अस्तीति मालीस्त दामा तस्य इनः स्वामी दारिद्र्यभंजनत्वात् यद्वामेशिवेअ- लीनः तदभिन्नत्वात् यद्वामः वेधासएवअलिः कमलानुष गित्वात् भृंगौपम्यं तस्यइनः मः शिवश्चंद्रमावेधाइत्येका क्षरः पुनः कीदृशः घनमाली घनवत् श्यामइत्यर्थः पुनः की दृशः बलमाली बलभद्रेण मालते सो बलमाली परसामर्थ्य वान् पुनःकीदृशः मालीमालापुष्पस्त्रक् सायस्यास्तीतिमा लीपुष्पस्त्रग् वानित्यर्थः यद्वामा अलीति पदछेदः कर्तव्यः कीदृशः अली अलति सर्वव्याप्नोतीति अलीपरमात्मरूपे ण सर्वांतर्यामीत्यर्थः विश्वव्यापीत्यर्थः १ अथ दशावता रवर्णनमारभते वनजोवनजो रवर्यास्थिरामी सकपोकपः अवतारा दशैवैते कृष्णस्तु भगवान् स्वयं १ वनमालीवनेजले मालते शोभत इति वनमाली वने सलिलकानने इत्यमरः मत्स्य रूपीविष्णुःनोअवतु कीदृशः बलमाली बलेन शंखासुरो न्मूलन करणेन बलेन मालतेसो पुनः वनमाली कूर्मरूपीवि ष्णुः नोस्माक मवतु कीदृशः बलमाली सकल भूभरणनि ष्पंद फणामंडलानंतो द्वहन करणेन बलेन मालतेसौ पु० व० वनेरण्ये मालतेसौ० वराहरूपीविष्णुः नोवतु की० व० सागरानिमग्न महीमंडलोद्धरण करणेन मालते पुनः वन मालीनृसिंहरूपीविष्णुः नोवतु की० ब० हिरण्य

विद्यापीठ

काशिपुसमुच्छेदकरणेन बलेन मालतेसो पुनः अघनमाली अइव रुद्रइव घनं यथा तथा मालत इति अघनमाली यद्वा अघनं ह्रस्वं माली वामनरूपी विष्णुः नोवतु की० ब० बलेन बलिछलनकरणेन मालतेसो पुनः वनमाली रुन्द्रस्वर्यानलानीर्थार्थं वने परिक्रमन् जामदग्न्यरूपी विष्णुः नोवतु की० ब० सकलक्षत्रियोत्पाटनकरणेन बलेन मालतेसो पुनः वनमाली दंडकारण्यदेशे रामरूपी विष्णुः नोवतु की० घनमाली घनवत् श्यामः पुनः की० ब० पौलस्त्यासमुच्छेदकरणेन मालतेसो की० ब० बलरामेति सरामपदेन मालतेसो बलभद्ररूपो विष्णुः नोवतु कीदृशः बलमाली कालिंदीकर्षणेन बलेन मालतेसो की० ब० घनमाली शरदंबुदगौरः पुनः अवनमाली अवनेन रक्षणेन मालतेसो बुद्धरूपी विष्णुः नोवतु की० ब० प्राण्यहिंसादिकरणेन बलेन मालतेसो पुनः की० ब० बलेन म्लेंच्छोच्छेदनकरणेन मालतेसो कल्किरूपी विष्णुः नोवतु अथ संमोहन काममंत्रोद्धारणपक्षमाह संमोहनकाममंत्रमथरूपो हरिः नोवतु मंत्रमयत्वं विशिनष्टि मालीनः माशक्तिः सामान्यस्वरास्तेषु आलीनः ककारः तद्गतत्वेनैवोच्चार्यमाणत्वात् प्रथमत्यागे कारणाभावात् इति न्यायेन ककारो प्राप्त्यः तथाच ककारात्मक इत्यर्थः घनमाली घनेन मायस्य सः घनमः इंद्रः तस्य इदं बीजं घनमंत दलतीति घनमाली तथा चलकारात्मक इत्यर्थः मालीनः माया इदं तस्मिन् इकारे अलीनः पुनः मालीनः मः

चंद्रः अलीनो अस्मिन् असौ तदुक्तंशारदातिलके ब्रह्माभ्रू
म्यांसमासीनः शांतिबिंदुविभूषितः बीजंमनोभुवः प्रोक्तं
जगत्त्रितयमोहनं १

श्लो० ॥ विधुस्फुरद्विरहानलपीडिता विधु
स्फुरद्दृत्तरलानिलपीडिता ॥ विधुस्फुरद्वद
नालिमपीडिताविधुस्फुरद्दृत्स्फुगिरोकिरदी
डिताः ॥२॥

विधुस्फुरदिति विधुस्फुरत् विधुः विष्णुः स्फुरत् प्रियो
यस्याः साराधिका विधुश्चंद्रमसि विष्णोविधुः कर्पूरकामयो
रितिविश्वः अलीसखींप्रति ईडिताः स्तुत्याः स्फुगिरः अकिरत्
उवाचेत्यर्थः कीदृशी विधुस्फुरद्विरहानलपीडिता विधुः वि
ष्णुः सएवस्फुरत्प्रियः तस्यविरहः वियोगः सएवअनलः
वन्हिः तेनपीडिता पुनः कीदृशी विधुस्फुरत्तरला विधुश्चं
द्रस्तस्य स्फुरन्मन्मथः तेनतरलाचंचला चंचलंतरलंचैवपा
रिप्लवपरिप्लवइत्यमरः यद्वाविधुः कर्पूरः तस्यस्फुरन् सम
स्तरलो हारमध्यमणिर्यस्याः सा तरलः स्यान्मध्यगोमणि
रिति शाश्वतः कामज्वराभिस्तेजस्कमुक्ता इत्यमरः पुनःकी
दृशी अनिलपीडिता अनिलो मलयानिलः तेनपीडिता पु
नः विधुस्फुरद्वदना विधोश्चंद्रस्य स्फुरत्समंतुल्यं वदनंय
स्याः सा विरहसमयत्वात् चंद्रसाम्यंस्फुटमेव यद्वाकर्पू
रपांडुरवदना पुनः कीदृशी ईडितास्तुत्या पुनः कीदृशी अ
पीडिताएनकृष्णेन पीडिता अपीडिता यद्वाअपि इडिता

इति पदच्छेदः कर्तव्यः कृष्णाविरहपीडितेत्यर्थः ॥२॥

श्लो० ॥ उदयते दयते तिमिराकरैः शशिकरैरकरैस्तिमिराकरैः ॥ दिशमिमां चर माचर मांचर मारम कमलकोमललोललल्लोचनं ॥ ३

उदयत इति हे सखि शशी चंद्रः उदयंते चपरंकरैः इमां हस्ते वर्तमानां दिशं दयते प्राप्नोति रूपयतीत्यर्थः रूपयितृत्वे हेतुमाह कीदृशैः करैः तिमिराकरैः तिमिरस्य अकरैः अकर्तृकैः यद्वा तिमिरंअसमंतात्किरंति हिंसंतीति तिमिराकरैः तद्वत्ध्वांतनाशकैरित्यर्थः चपरंकरैः मांदयते पीडयतीत्यर्थः दयदानगतिहिंसादर्शनेषु भौवादिकः पीडनत्वमाह कीदृशैः करैः अकरैः अकंदुःखंराति ददातीति दुःखदैरित्यर्थः यद्वा कंजलं रातिस्वीकुर्वंतीति कराः नभवंतीति अकरास्तैरुष्णैरित्यर्थः अतस्त्वंरमारमं लक्ष्मीकांतंप्रति चरगच्छसः रमासक्तोस्ति अतः सनागमिष्यति कीदृशं. रमारमं कमलकोमलल्लोलल्लोचनं लुल्यते तल्लोलं लोलत्वं लातः ते लोलले कमलं सरोजमिव शृंगीवासइव कोमले मनोहरे लोलले चंचले लोचने यस्य तं यद्वा कीदृशः शशी अंकमलकः अंकः कलंकः सएव मलो यस्मिन् तदंकमलंकं मूर्धायस्य सः एतत्पक्षे कीदृशंरमारमं लक्ष्म्याकीडंतं यद्वा चरमां दिशं अन्त्यामवस्थां दयते प्रापयति पुनः कीदृशंरमारमं लक्ष्मीरमं यद्वा शशीकमलः केसुखेमलकः दुःखद इत्यर्थः ३

श्लो० ॥ कुमुदबंधुरबंधुरबंधुरः सतनुते तनुते

ननुतेननः ॥हिमकरोहिमतांहिमतांमतां
किमनुमांसदृशंसदृशंविधोः ४

कुमुदबंधुरिति हेसखिहिमकरःचंद्रः मांअनूद्दिश्य अहिमतांउष्णातां ननुतेविस्तारयति हियततल् विधोः सदृशंकुलपरंपरागतं विरहिणीपीडनंउचितंकिं कीदृशंमां नतांमतांमान्यां पुनःकीदृशीं मांसदृशंसज्ञानांदृक्ज्ञानेज्ञातरिष्वित्यमरः कीदृशःहिमकरः अबंधुरः अपांअंधुः कूपः तंरातिप्राप्नोतीत्यबंधुरः शीतलः पुंस्येवांधुः प्रहीकूपइत्यमरः पुनःकीदृशः कुमुदबंधुरबंधुरः कुमुदानांबंधुरः प्रियः बंधुरित्यर्थः पुनःकीदृशः अतनुतेनतः अतनुतांमहत्त्वं ननुनेप्राप्तः अतएवनुतःस्तोतृत्वंइतः सएवइतिततः यद्वा अइतिपदच्छेदः हिमकरः शीतहस्तः अः विष्णुः मां अनुदिश्याविधोः चंद्रमसःसदृशंसमानं अहिमतांउष्णातां परितापंतनोति की० अः कौपृथ्व्यांमुत् हर्षोयेषांतेकुमुदः कुमुदांजलानांअबंधवः राक्षसादयः तान् रातिगृण्हाति इतिकुमुदबंधुरः दुष्टहंतासचासौबंधुरबंधुः शिष्टस्कृदृदित्यर्थः ॥४॥

श्लो०॥ कमलिनीमलिनामलिनालिना
विचलताचलतास्कलताशृणाम् ॥ विधु
तमाविधुतांविधुभानुभिर्नयनयोरनयोर्न
यसीनयाः ॥५॥

पुनःप्रकारांतरेण चंद्रंनिंदति कमलिनीति हेअलि

विद्यापीठ

त्वंइमांकमलिनीं ईनयोर्दीर्घयोः अनयोः नामनयोः नानय सिनापास्यसि कीदृशः मलिनालतास्फ विच्चलतालिनावि धुनां त्यक्तां पुनः की॰ लताशफभां लताश्रेष्ठां की॰ चंद्र· रश्मिभिर्विधुतभांत्यक्तकांतिं यथाकेनचित्पुंसाकरस्पर्शा काचित्प्रोषितभर्तृकांत्यजति यद्वामलीकृष्णः गोपीवि हारत्यादित्यर्थः मलिनाकृष्णेनविधुतांत्यक्तां लताशफभां गोपीश्रेष्ठांतनुत्वाल्लतासाम्यं विधुभानुभिः विधुतभांदुः खीकृतां मां पश्यसि अतोकृष्णानयनायगच्छेत्यर्थः ॥५

श्लो॰॥ सखिविभातिविभातिविभाविभा नसरसीसरसासरसारसैः॥ अलिकुलैर्विधुनाविधुताधुनाविनमदब्जमुखीविमुखीस्थिता॥६॥

पुनः भंग्यंतरेणचंद्रंनिंदति सखीति हेसखि विधुनेंदुनाविधुतामुकुलितपंकेरुहाकृता अतएवअलिकुलैः शिलीमुखवृंदैः सरसासरसारसैः सरसंसविलासमास तिशब्दंकुर्वंतितेसरसारसाः सारसाः तैश्चतैश्चधुतात्यक्ता अ· तएवअतिविभाविभिः पक्षिभिः यत्कांतिः तस्याअतिक्रांता अतएवविभागतकांतिरविभाकृष्णकांतसदृशीविनम दब्जमुखीविलमंतिअब्जमुखानियस्याः सातएवविमु· खीमुखीपराङ्मुखीस्थितासरसीनविभातिएतादृशीं दृष्ट्वा दुःखातिशयं प्राप्नोतिअतः कृष्णमानयेत्यर्थः ॥६॥

श्लोकः॥ कुमुदिनीदयितोदयितोनतां निज

करैरकरैर्दहतिस्फुटं॥ यदयमेकपदेविपदे भवद्विकचपुष्करिणीहरिणीदृशः॥७॥

पुनः भंग्यंतरेण चंद्रनिंदति कुमुदिनीति हेसखि कुमुदिनीदयितःचंद्रः अकरैः अकंदुःखंगातिददतितेअकरास्तेदुःखदैरित्यर्थः निजकरैःस्वकिरणैः दयितोनतांदयितेनभर्त्राऊनतांस्वामिशून्यांविरहिणीमित्यर्थः स्फुटंअत्यर्थं यथातथादहतितापयतिपीडयतीत्यर्थः अथदृष्टांतमाह कुतःयतोयतःकारणात्अयंचंद्रः विकचपुष्करिणी प्रफुल्लपद्मिनीसेवहरिणीदृक्कांतातस्याः विपदेविपत्तये एकपदे विपत्तये तत्क्षणे क्षणमात्रे अभवज्जातः॥७॥

श्लो०॥ विधुरिताधुरिताधुरितादहनविधुरयनज्जनितोजनितोकभृत्॥ इहतदक्षिगतेक्षिगतेक्षिनीरविमनिर्विमनिर्निमिमीलसा॥८॥

विधुरिति विधुरिप्रथमतः विधुरिताः विरहिण्यःताः प्रसिद्धाः वनिताः दहन्तापयन् अयंविधुः विध्यतिविरहिणमितिविधुः चंद्रःजनितःजन्मतः अंकभृत् जनितःजातः संभूतः नहन्याद्विपदंप्राप्तकातरंवाप्रतिक्षतमितिप्राधः कीदृशाताः धुरिताः धुरंमुख्यत्वंइताः प्राप्ताः अतःदृष्टांतमाह कुतःयतः हेतोः क्षिगतेक्षिंक्षीणत्वंगतः क्षिगतःतस्मिन् नामैकदेशग्रहणं नामग्रहणमिति न्यायात् क्षीणत्वंगतइत्यर्थः इहचंद्रमसिअक्षिगतेसति दृक्प्राप्तेसति

रविमनि॰ सूर्यसक्ताविमतिः विरुद्धवुद्धिः चंद्रमसीतिभा
वः अब्जिनीपद्मिनीनिमिमीलमुकुलिताबभूव सकलंकि
निदृष्टेसतिनेत्रोन्मीलनंरविदर्शनंकुर्यादितिभावः ॥८॥

श्लो॰ ॥ मलयपन्नगपन्नगमंडलीकवलितो
वलितोनुवनानिलः ॥ अदयमंगमदंगमदं
गकदहतियतभ्रमयंभ्रमयन्नयं ॥ ९ ॥

मलयपन्नगेति हेआलिकवलितः आगतः कवलिः काम-
धेनुः वनानिलः वनवायुः मलयस्यपदः प्रांतपर्वताः पादाः
प्रत्यंतपर्वताइत्यमरः तेषुनगाः वृक्षाः तेषुपन्नगाः सर्पाः ते-
षांमंडलीआलिः तयाकवलितःपीतः तुवितर्केनुः पृच्छायां
वितर्केनेत्यमरः कुतः अंगआलिहेआलि स्युःप्याद्‌पांडग
हेहेभोरेहोसंबोधनार्थकाइत्यमरः यत्‌यतःकारणात्‌भ्र-
मयन्‌भ्रांतिंकारयन्‌ अंगमत्‌अंगानि मथ्नातीति अंगमदं
गमथकः अयंवायुः भ्रमयभ्रम मंप्राप्तं मदंगकं ह्रस्वशरीर-
सयौवनमित्यर्थः अदयंदयारहितंयथातथा दहतितापय
तीत्यर्थः अन्यथाकथंपीडयतीत्यर्थः ॥ ९ ॥

श्लोक ॥ अयिरसालवनीनवनीरनीरनव
नीनवनीपवनीवली ॥ अलिकुलालिकुला
लिकुलाकुला प्रतिहिमामहिमा महिमा
हिमा ॥ १० ॥

अयीति नवनीनवीनत्वंमामानवानूतनायेनीपाः क-
दंबास्तेषांवनीवनंतद्वतीसकिसलयकदंबयुक्ताइत्यर्थः

अतएवानवनीअरक्षकामत्पीडनतत्पराइत्यर्थः अलिकुला लिकुला अलिनाकुःस्थानंअप्रामित्यर्थः तांलांति स्वीकुर्वे तीते कोकिलास्तेषांआलिस्तस्याः कुलंगृहंयस्यांकोकिलास क्तेत्यर्थः कुलंकुलेगणेगेहेदेहेजनपदेपिचेत्यमरः आलि कुलाकुलाअलिवृंदासक्ताअतएवाहिमाअहेःसर्पस्य माइ वमायस्याः सर्पवत्भयानकाव्यथकाचेत्यर्थः हिमासीत लारसालवनीसहकारवनंरहस्वार्थेङीप् अहिमाउष्णात द्विरहवतींमांप्रतिरनीःरः अग्निः तन्नयतिसाअस्तिहिअन लतापजननीत्यर्थः ॥१०॥

श्लो० ॥ वकुलमाकुलमालिपरागितंमधुप
रागपरागपरालिभिः ॥ विशदशारदशार
दशारदशशकलंककलंककलंकित ॥ ११

वकुलमिति हेअलि तद्वकुलंवकुलपुष्पंदृश्यते की० परागितंसंजातं किंजल्कितंपुनः कीदृशं मधुपरागान् पि बंतितेमधुपरागपा अतएवरागपराः स्नेहगायनपरास्तेचते अलयश्चतैराकुलंव्याप्तं पुनःकीदृशं विगतशंसुखंयस्याः साविशासुखासादशायेषांते विशदशा विरहिणीजनास्ता न् अर्दतिपीडयतितत् शंअरातीसाशारादशावस्थायेषांते स्व्यादिसुखंभुंजाना तेषां आअभ्यंतरं अनलं तापं द्यतिखं डयतिएवंविधं वियोगिनामसुखदंसुखभाक्तानां तापखं डनमित्यर्थः पुनः कीदृशी· शशकलंककलशशकलंकश्चं द्रः तस्यकलाकांतिरिव कांतिर्यस्यतच्चंद्रसदृशंव्यापकमि

वि जा बो ब

मितिभावः पुनः कीदृशं ककलंकितं केन वायुना कलंकितं कंपितम्॥ ११

श्लो॰॥ नवमशोकमशोकमशोकदे स्फुरभि तारभितालिरतारत॥ सखिसमाश्रयमाश्रयमाश्रयकमलिनीमलिनीपइवागतः॥१२

नवमशोकमिति हेअशोकदे शोकं द्यति साशोकदा न शोकदा अशोकदा तस्याः संबोधने हेअशोकदे हेदुःखिते त्वं नवं अशोकं अशोकनामानं वृक्षं आश्रय की॰ अशोकं शोकरहितं पु॰की॰ स्फुरभितारभितालिरतारतं स्फुरभिलया स्फुगंधितया रभिता अनन्यशोभासंजाताः पुष्परागरंजिता इत्यर्थः तेचते अलयश्चतेषां रतं रतिस्फुरवं तस्मिन्नारतं आश्रितं भ्रमराणां स्फुरवमस्ति अतस्ते दुःखं हरिष्यंतीत्यर्थः पु॰की॰ माश्रयं मायाः शोभायाः आश्रयस्थानं अतो हे सखि सः माश्रयः लक्ष्मीपतिः आगत एवेति अवेहि कइव यथा अलिनीपः भ्रमरिणीपतिः कमलिनीं प्रति आगच्छति तथा हरिर्लक्ष्मीं मुक्त्वा त्वां प्रत्यागत एव जानीहीत्यर्थः॥१२॥

श्लो॰॥ सखिहितासि मतासि मतास्थमां नवमशोकमशोकमशोकदा॥ नदिहमाम वमामवमाममां व्रज हरिं नवनीरदनीरदं १३

सखीति हेसखि त्वं हिता पूर्वं प्रिया अधुना त्वं असिमता असेरिव मतं अभिप्रायं यस्याः असिवत्पीडाकर्त्रीत्यर्थः मता मान्यासि कुतः यतः त्वं मां नवं अशोकं आस्थ क्षेप

की॰ अशोकंअस्यविष्णोःशोकोयस्मादसोतंतद्दर्शनादधिकदुः
खदमित्यर्थः की॰ मांअशोकदांअस्यविष्णोःशोकदुःखंददाती-
त्यात्मनेत्यर्थः अशोकदातांतस्मात्त्वंहरिंव्रजगच्छ मांअवदुःख
तःअवरक्ष की॰ मांअमांअशोभांविष्णुविरहेणकर्शितां की॰
इहंइकामजिहितेप्राप्नोतिइहसकामुक मित्यर्थः यमकत्वादनु
स्वगच्युतालंकारः पु॰की॰ मामवंमालक्ष्मीर्मोब्रह्मातोवातिग
च्छतिइतिमामवंलक्ष्मीब्रह्माथामपिसेवितमित्यर्थः पुनः कीदृशः
नवनीरदनीरदंनवोनूतनोयोनीरदः मेघःतस्यनीःनितरांईःया
शोभातांरदतिप्राप्नोतिनवांबुदश्याममित्यर्थः ॥१३॥

॥श्लोकः॥ इतिसखीगदितागदितादितानव
नरायवराय वरायवा॥ इतिगिरंकलयाकल
याकलापटुगिरामृदुतामृदुतादुता॥१४॥

इतीति कलानाम्नीसखीकलयागंभीरयागिरा अनवनरा
यनवोनरःनवनरःननवनरःअनवनरःतस्मैपुराणपुरुषायइति
वक्ष्यमाणांगिरं यत्पटुयथातथाअदितददातिस्म की॰ गिरा
कंसुखंलातिददातिसाकलातयाप्रियोषेतेनसुखकारिणेत्यर्थः
पुनः की॰ मृदुतामार्दवंअमृदुताकठोरत्वंताभ्यांदुनोतीतितया
की॰ कलातथाइतिगदिताउक्ता पु॰की॰ अगदितावाशब्दइवा
र्थेस्वचातुर्यादनुक्तेवकीदृशायवरायवरायवरःअयोयस्यवरा
यः सचासौवरश्चशुभावहविधिमतेश्रेष्ठायच ॥१४॥

श्लोकः॥ मलयजंतनुतेतनुतेतनोसहचरीन
लिनीनलिनीदलं॥स्तनयनानलदंज्वलदंच

[library stamp]

सानदपिसीदतिसीदतिबंधुना ॥ १५ ॥

मलयजेति हेकृष्ण तेसहचरीसखीतनौ अनतुभूरिमलयजं मलयाचलसंबंधिचंदनंमनुते विस्तारयति लेपनंकरोतीत्यर्थः पुनः तेकमलिनीतेप्रियातनुत्वात् पद्मिनीसाम्यंतनौअतनुबहुलंनलिनीदलंतनुतेपुनः तेस्फुनायेनादीर्घलोचना अनलदंतापनाशकंनलदंउशीरंतनौमनुते तदपिसासीदतिदुःखंप्राप्नोति अपरंबंधुताअस्मदादिसखिना सीदति परितापयतिनश्यतिवेत्यर्थः ॥१५॥

श्लोक ॥ समुदितेमुदितेमुदितेक्षणोहिमकरेमकरेनकरेश्रुती ॥ पिकरवेबरवेबरवेतिसाहरिणलांछनलांछनलांछना ॥१६॥

समुदितेति ईश्वरलक्ष्मीपतेअमुदितामुद्रहितासातेप्रिया ईक्षणेअमुदिते मुद्राहिते मुकुलिते करोति संकोचयतीत्यर्थः कस्मिन्सति हिमकरे चंद्रेसमुदितेसति उदयतिसति की० मकरेनकरेमकराणांमत्स्यानां इनःप्रभुः समुद्रस्तस्यकरानिनिकरःस्फुरवदःयस्मिन्सर्वस्यापिस्फुरवकरेतस्यास्तुदुःखदइत्यर्थः चपुनः श्रुतिकर्णौ अमुदितेकरोति आच्छादयतीत्यर्थः कस्मिन् सति पिकरवेकोकिलाकूजितेसमुदितेसति कीदृशी अवरवाअवेतिशब्दंकुर्वाणा पुनःकीदृशीवेत्यर्द्धाक्षरेणाइइतिउक्ता हरिणलांछनश्चंद्रः सएवलांछनंचिन्हंयस्यसःशिवःलीसःलांछनं चिन्हंयस्याः साशिवाशिवेतिजपतीत्यर्थः ॥१६॥

श्लो० ॥ नसहतेसहतेसहतेसखीनववियोग

वियोगमयोगहृदत्॥सपदितांतरुणिंसरणिंम
णिंकिरतुनामनवंनवनीविजं॥१७॥

नसहतइति हेअयोगहृदत् अयःलोहतत्वंगच्छतितंन्हृद
यंयस्य हेकठिणहृदय हेवियोगगरूडारूढ हेसह हेशांततेस·
खीप्रियानववियोगंनसहतेसहतेईत दुःखित्वाहिप्सार्थत्वं अतः
सपदितामधुनामनसिवर्तमानांतरुणिंकिरतुत्यजतु सरणिंकिर
तुसरणिं प्रियाकुंजमार्गराधावनमार्गकिरतुगच्छतु सरणिःपद्ध
तिःपद्येत्यमरः रूपरंनवंनूतनंनवनीविजंवसनग्रंथिस्थंमणिंकि
रतुक्षिपतुनामनिश्चयेन ॥१७॥

श्लो०॥अयतयाकलयाकलयाशुभांवनजदा
मजदामजदीधितिः॥हरिरगान्नमगान्नमगा·
च्चसामुदमतीवमतीवहृशोःस्थितं॥१८॥

अयतयेति हरिःतयाकलयासहशुभांराधिकांअगात् की
दृश्याकलया कंसुखंलातिप्राप्नोति हृष्टचित्ता कीदृशःहरिः
वनजानिकमलानितेषांदामसमूहः तस्माज्जातंदाम मालातस्याः
जानायाकांतिःसाविद्यतेयस्यतथोक्तः साप्रियातंवीक्ष्यअतीवमु
दंअगात्प्रापआगतंविष्णुंआलोक्यहृष्टाभूदित्यर्थः कीदृशंआ
गतंअगःगोवर्धनःअत्तोयेनतं पुनःकीदृशः अतीवमतअनौद्धतंपु
नःकीदृशंदृशोःस्थितं॥१८॥

श्लो०॥रामचंद्रकविनाकविनादःपूरुषोत्तमकृते
नकृतेन॥राधिकाहृदयशोकदमासीद्राधिका
हृदयशोकदमासीत्॥१९॥

रामचंद्रेति अदःराधिकात्हृदयशोकदंराधिकायाःहृदयं तस्यशोकःतंद्यतिखंडयतितत्काव्यंरामचंद्रकविनाकृत्वाआसीत्रामचंद्रेणकृतमभूदित्यर्थः कीदृशेनकविना कःब्रह्माउःशिवःअःविष्णुःअः वायुःअःअग्निःअःसूर्यः तेविद्यंते आराधनीयत्वेनयस्यतेनपुनःकीदृशेन पुरुषोत्तमःद्विजःतस्यसुतःजनार्दनःतस्यईनेनज्येष्ठसुतेनराधिकाचत्हृदयशोकादिराधिकात्हृदयशोकदुःखनाशिकाकलामश्चंद्रश्चअःविष्णु अः वायुश्चअस्यनिविरहिणामिति असः मधुश्चंद्रःकामश्चतेषां इत्प्रापकंवर्णनीयत्वेनतत्राधिकात्हृद यशोकदमासीत् ॥१९॥

इतिश्रीपुरुषोत्तमात्मजजनार्दनस्तस्यनंदन
रामचंद्रकविकृतं
राधाविनोदाख्यंकाव्यंसटीकं
समाप्तं.

इदं पुस्तकं श्रीकृष्णदासात्मजेन गंगाविष्णुना
मुंबयाख्य पत्तने जगदीश्वरास्य शिलायंत्रे मुद्रितम्.
संवत् १९३५ शकाब्दाः १८००.